
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

३

॥श्रीगणेशाय नमः॥ आहावं विदः सस्त्वमन्थावाकस्य चोदनं यजमानपुनर्जन्म ब्रूयंते साधिदैवतं २ स्त्वमाज्यशास्त्रं
निरूप्य प्रउगशास्त्रं निरूपयितुं प्रस्तौति ॥ ॥ग्रहो कथं वा एतद्यत्प्रउगं नव प्रातर्ग्रहा गृह्यंते नवभिर्बहिष्पवमाने स्तुवते स्तु
ते स्तोमे दशमं ग्रहा ति हिंकार इतरासा दशमः सोमा सम्मेति ॥ प्रउगाख्यं यच्छस्त्रमस्ति तत्क्रुहो । स्तैवैंद्रवायवादिग्रहा
एनच्छं ग्रहो । स्त्रं तदीयदेवता प्रसोरूपमिसर्थः । नवेसादिना ग्रहसंबंध एव स्पष्टीक्रियते । प्रातःसवने ऐंद्रवायवमैत्राव
रुणाद्यो धाराग्रहा नवसंख्याका गृह्यंते । ग्रहीताचाध्वर्युः । तथा बहिष्पवमानाख्ये स्तोत्रं उद्गातारो नवभिर्नवसंख्याभि
र्ऋग्भिः स्तुवते । उपास्मै गायतेत्येक स्तृचः । द विद्युतत्येति द्वितीयः । पवस्वेति तृतीयः । एतेषु त्रिषु तृचेषु नवसंख्याका ऋ
चो विद्यंते । ता आवृत्तिरहिताः गीयंते । एवं स्तोमे बहिष्पवमानस्तोत्र उद्गातृभिः स्तुते सति अध्वर्युर्दशमं ग्रहं आश्विना
ख्यं गृह्णाति । यद्यप्यध्वर्यवयोर्मंत्रब्राह्मणकांडयोराश्विनग्रहो धाराग्रहेषु तृतीयत्वेनाम्नातः तथाप्यसौ दृश्यमत्वेन
ग्रहीतव्यः । आश्विनो दश— म गृह्यते तं तृतीयं जुह्वतीति श्रुत्यंतरवचनात् । तथा च ग्रहेषु दशमः सपन्नः तथैव इतरा सा
बहिष्पवमानस्तोत्रगतानामृचां हिंकारो सा सम्मेति वाक्येनोच्यते । उकारो निपातः समुच्चयार्थः सन् स्त्रीलिंगाभ्यान
छब्दाभ्यां संबध्यते । तथा सति सात्र ग्रहसंख्या सा च स्तोत्रियसंख्येत्युक्तं भवति । सम्मेत्यत्र द्वितीयामकार श्छंदसः ।
तस्मिन्नयगते सति समानुत्येत्युक्तं भवति । एवं सांतयथा बहिष्पवमानस्तोत्रस्य ग्रहसंबंधः । तथा प्रउगशस्त्रस्यापि ग्र

हसंबंधो दृष्टव्य इत्यभिप्रायः । अथ प्रउगशास्त्रं विद्यमानानां तृचानां मध्ये प्रथमं तृचं विधत्ते ॥ वायव्यं शंसति तेन वायव्य उ
क्थवानिति । वायुर्देवता यस्य तृचस्य सोयं वायव्यः वाय वायाहि दर्शतेत्यादिकस्तं शंसेत् । तेन शंसनेन वायव्यो ग्रह उक्थ
वान् शास्त्रवान् भवति । यद्यपि वायव्यः पृथग्ग्रहो नास्ति तथाप्यैंद्रवायवस्य ग्रहस्य पूर्वो भागो वायव्य इत्युच्यते । स च
प्रथममावायोभूषेसनेन केवलवायुदेवताकेन मंत्रेण गृह्यते न वायव्यो भवति पश्चादिंद्रवायू इमे सुता इत्यनेनेंद्रस
हितवायुदेवताकेन मंत्रेण गृह्यते तेनैंद्रवायवोपि भवति । अत एव वायवे द्विर्ग्रहणे तैत्तिरीया अधीयते । सकृदिंद्रा
यमध्यतो गृह्यते द्वितीयवदिति तत्र प्रथमभागरूपो पायव्यो ग्रहः केवलेन वायव्यतृचेन शस्त्रवान् संपद्यते । द्वितीयं तृ
चं विधत्ते । ऐंद्रवायवं शंसति तेनैंद्रवायव उक्थवानिति । इंद्रश्च वायुश्च मिलित्वा देवता यस्य तृचस्य सोयमैंद्रवाय
वः । इंद्रवायू इमे सुता इत्यादिकः । तं शंसेत् । तच्छंसनेनैंद्रवायवग्रहस्योत्तरभागः शस्त्रवान् भवति । तृतीयं तृचं विधत्ते ।
मैत्रावरुणं शंसति तेन मैत्रावरुण उक्थवानिति । मित्रो वरुणश्च मिलित्वा देवता यस्य तृचस्य सोयं मैत्रावरुणो मित्रं
हुवे पूतदक्षमित्यादिकः । शंसतीत्यादिकं पूर्ववद्योज्यं । चतुर्थं तृचं विधत्ते । आश्विनं शंसति तेनाश्विन उक्थवानिति ॥ अ
श्विनौ मिलित्वा देवता यस्य तृचस्य सोयमाश्विनः अश्विना य— रीरिषइत्यादिकः । पंचमं तृचं विधत्ते । ऐंद्रं शंसति तेन शु
क्रामंथिनावुक्थवंताविति । इंद्रो देवता यस्य तृचस्य सोयमैंद्रः इंद्रायाहि चित्रभानो इत्यादिनेंद्रस्तृचः । तेन शुक्रग्रहमंथि

ग्रहयोरुभयोः शस्त्रवत्त्वं । षष्ठं तत्त्वं विधत्ते । वैश्वदेवं शंसति तेनाग्रयण उक्थ्यवानिति । ओमासश्चर्षणीधृत इत्येष वैश्वदेवस्तृ-
चः । तेनाग्रयणग्रहस्य शस्त्रवत्त्वं । तथापि विश्वेदेवदेवताकत्वात् वैश्वदेवं । एवं सर्वत्र ग्रहशस्त्रयोरेकदेवताकत्वं द्रष्टव्यं
। सप्तमं तत्त्वं विधत्ते । सारस्वतं शंसतीति । पावका नः सरस्वतीत्यादिकः सारस्वतस्तृचः । ननु पूर्ववदत्रापि ग्रहस्य शस्त्रव-
त्त्वं कुतो नोपन्यस्यत इत्याशंक्याह । न सारस्वतो ग्रहोस्तीति । आध्वर्यवमंत्रकांडे सारस्वतमंत्रस्यापठितत्वाद्ब्राह्मणे
विध्यभावाच्च ग्रहाभावः । तर्हि ग्रहोक्थेस्मिन्नस्य सारस्वतस्य तृचस्य किमर्थं शंसनमाम्नातमित्याशंक्याह । वाक्तु स-
रस्वती ये तु के च वाचा ग्रहा गृह्यंते तेन तस्य सर्वे शस्तोक्थ्या इति । सरस्वती हि वाग्देवता । ग्रहाणां च वाचा गृह्यमाणत्वात्सारस्वततृ-
चेन सर्वेपि ग्रहाः शस्तोक्थ्याः पठितशस्त्रा भवंति । वेदनं प्रशंसति उक्थ्यो भवंति य एवं वेदेति । तस्य वेदितुः सर्वे ग्रहाः
शस्त्रवन्तो भवंति ग्रहदेवतास्तुष्यंतीत्यर्थः ॥ ॥ इत्येकादशाध्याये प्रथमः खंडः ॥ ॥ विहितं प्रउगशस्त्रं प्रशंसति ॥ अ-
न्नाद्यं वा एतेनावरुंधे यत्प्रउगमन्नाद्यं देवता प्रउगे शस्यते मदन्त्युक्थं प्रउगं क्रियत इति । यदेतत्प्रउगाख्यं शस्त्रमस्ति त-
देतदन्नाद्यस्यान्नस्य साधनं । अतस्तेनान्नं प्राप्नोति । यस्मादस्मिन्शस्त्रे पृथग्वै देवताः शस्यते । प्रथमतृचे केवलो
वायुर्द्वितीयस्मिन्निंद्रवायू तृतीयस्मिन्मित्रावरुणावित्यादिर्देवताभेदः । यथैव देवताभिद्यते तेन तेनास्मिन्शस्त्रे
न्नमदन्त्युक्थं वायवा याहि दर्शतेंद्रवायू इत्यादिकं परस्परविलक्षणं शस्त्रं क्रियते । तस्मादोदनशाकसूपादिविलक्षणम

स्पभोज्यत्वेह्यचोष्यसाम्यादंनाद्यहेतुत्वंयुक्तं।वेदनंप्रशंसति।अन्नदन्नदस्यान्नाद्यंग्रहेष्वध्रियंनेयएवंवेदेति।अन्न
दन्नसरस्यरविलक्षणंमधराम्लादिरूपंप्पकारांतरेणप्रउगंप्रशंसति।एतद्वैयजमानस्याध्यात्मतममिवात्छंयत्प्र
उगंतस्मादेनेनैतदुपस्पृततममिवसाहुरेतेनह्येनंहोतासंस्करोतीतीति।प्रउगाख्यंयच्छस्त्रमस्तिएतदेवयजमानस्या
ध्यायात्मतममिव।आत्मानंशरीरमधिष्ठायवर्ततेनइत्यध्यात्मं।शरीरसंबंधीसर्थः।पूर्वत्राज्यशस्त्रस्ययजमानशरीर
निष्पत्तिहेतुत्वाभिधानात्तद्[illegible]प्यध्यात्मं।इदंतुसन्नस्यशरीरस्यसंस्कारत्वा[illegible]दतिशयेनैवाध्यात्मंयस्मादेनेन
यजमानेनैतत्प्रउगशस्त्रमुपस्पृततममिव।।अतिशयेनोपसमीपइक्षणीयमादर्शणीयमित्यर्थः।इत्येवमभिज्ञाआहुः
तेषामयमभिप्रायः एतेनप्रउगशस्त्रेणैनंयजमानमाज्यशस्त्रादुत्पन्नंहोतासंस्करोतितस्माददर्शणीयंयुक्तं।अथप्रथम
तृचंविहितमनूद्यस्तौतिवायव्यंशंसतितस्मादाहुर्वायुःप्राणःप्राणोरेतोरेतःपुरुषस्यप्रथमंसंभवतःसंभवतीतियद्वा
यव्यंशंसतिप्राणमेवास्यतत्संस्करोतीति।पूर्वोक्तोविधिर्वायव्यंशंसतीतिवाक्येनानूद्यते।यस्माद्वायव्यंशंसनायतः
स्मादभिज्ञाएवमाहुः।प्राणस्यवायुकार्यत्वेनवायुरेवप्राणोरेतस्तुःप्राणधारकशरीरनिष्पादकत्वाद्रेतःप्राणःप्राणस्व
रूपं।सदरेतःसंभवदुत्पाद्यमानस्यपुरुषस्यदेहस्यकारणत्वेनरूपितंदेहग्रथमंसंभवतिएवमभि—रुक्तत्वाद्वायव्य
स्तृचःसमीचीनस्तच्छंसनेनहोतायजमानस्यप्राणमेवसंस्करोति।द्वितीयंविधिमनूद्यस्तौति।। ।।ऐंद्रवायवंशंस

२

॥१·३

ति यत्र वा वप्राणस्तदपानो यदैंद्रं वायवं शंसति प्राणापानावेवास्य तत्संस्करोतीति ॥ उच्छ्वासरूपः प्राणो यत्रास्ति तत्र नि
श्वासरूपोऽपानोऽप्यस्ति इंद्रवायू च प्राणापानरूपौ तस्मात्तेन सूक्तेन प्राणापानयोः संस्कारः । ततो यं विधिमनूद्य

३

स्तौति ॥ मैत्रावरुणं शंसति तस्मादाहुश्चक्षुः पुरुषस्य प्रथमं संभवतः संभवतीति यन्मैत्रावरुणं शंसति चक्षुरेवास्य
तत्संस्करोतीति ॥ अक्षसंनरे चक्षुर्मित्रावरुणाविति मित्रावरुणसंबद्धस्य यद्दृष्टस्य चक्षुष्ट्वाभिधानात्त्वोपि चक्षुः स्व
रूप एव । तच्च चक्षुः ग्रमस्मात् श्रोत्रादींद्रियात् प्रथममुत्पद्यते । अस्यार्थस्यागमागम्यत्वादाहुरभिज्ञा इत्युक्तं एवं वि
धचक्षुःस्वरूपेण मैत्रावरुणत्वेन मज्जमानचक्षुषः संस्कारः । चतुर्थं विधिमनूद्य स्तौति । आश्विनं शंसति तस्मात्कु
मारं जातं संवदंत उपवेशश्रूषते ति वै ध्यायतीति यदाश्विनं शंसति श्रोत्रमेवास्य तत्संस्करोतीति । उत्पन्नं बालं मुग्ध
मेवेक्षमाणा मातापित्रादयः परस्परमेवमाहुः । नानाविधैरुपलालनैराहूतो बालकोऽस्मन्मुखमवलोकयतीति यस्मादय
मस्मदीयां वाचं श्रोतुमिच्छति नैरंतर्येणावलोकनमामेव ध्यायतीति । तदेतन्मित्रावरुणाविति अहक्तं । तस्मात्तच्छंस
नेन श्रोत्रस्य संस्कारः । पंचमं विधिमनूद्य स्तौति । ऐंद्रं शंसति तस्मात्कुमारं जातं संवदंते प्रतिधारयति वै ग्रीवा अथो

३

शिर इति यदैंद्रं शंसति वीर्यमेवास्य तत्संस्करोतीति । दोलायां शय्यानं बालमवेक्ष्य परस्परमेवमाहुः । अयमिदानीं
ग्रीवाः प्रतिधारयति । उत्थातुमादौ गतमुन्नतिमतः शिर उन्नमतीति । एतस्य व्यापारस्य वीर्यनिमित्तत्वादैंद्रस्य च

वीर्यप्रदत्वात्तदीयत्वेन शक्तेः संस्कारः । षष्ठं विधिमनूद्य स्तौति । वैश्वदेवं शंसति तस्मात्कुमारो जातः पश्चेव प्रचरति
वैश्वदेवानि हि गानि यद्वैश्वदेवं शंसत्संगानेवास्यतत्संस्करोतीति । उत्पन्नो बालः पश्चेव दर्शनश्रवणभाषात्र
मनादिक्रियाभ्यः पश्चादेव समर्थः सन्हस्ताभ्यां पादाभ्यां चेतस्ततः प्रचरंति हस्तादीन्यंगानि च वक्रु देवता
कानि तस्माद्वैश्वदेवत्वेनांगसंस्कारः । सप्तमं विधिमनूद्य स्तौति ॥ सारस्वतं शंसति तस्मात्कुमारं जातं जघन्या
वागाविशति वाग्घि सरस्वती यत्सारस्वतं शंसति याचमेवास्यतत्संस्करोतीति । हस्तपादप्रचारावस्थाया ऊर्ध्वं
र वक्तुमारभते । अतो जघन्या वागित्युच्यते । वाचः सरस्वतीरूपत्वात्तदीयत्वेन तस्याः संस्कारः । वेदितारमनुष्ठा
तारं च प्रशंसति ॥ ॥ एष वै जातो जायते सर्वाभ्य एताभ्यो देवताभ्यः सर्वेभ्य उक्थेभ्यः सर्वेभ्यश्छंदोभ्यः सर्वेभ्यः प्रउगे
भ्यः सर्वेभ्यः सवनेभ्यो य एवं वेद यस्य चैवं विदुष एतच्छंसंतीति । यो होता यथोक्तप्रकारेण वेद एष एव पूर्वं स्वमातुरपि
तृभ्यो जातो नापि पुनर्देवतादिभ्यो जातो भवति । यथोक्तार्थविदुषो यस्य यजमानस्य होतर एतत्प्रउगं शंसति सोपि यज
मानो देवतादिभ्यः पुनर्जायते देवता वाय्वादयः उक्थान्याज्यप्रउगादीनि छंदांसि गायत्र्यादीनि प्रउगाणि तदवयवा
स्तृचाः । सवनानि त्रीणि प्रसिद्धानि एतेभ्यः सर्वेभ्यः पुनरुत्पद्यते ॥ ॥ इत्येकादशाध्याये द्वितीयः खंडः ॥ ॥ प्रकारांत
प्रशं रेण प्रउगशस्त्रं प्रशंसति ॥ ॥ प्राणा वा एत उक्थं यत्प्रउगं सप्त देवताः शंसति सप्त वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधा

3

ब्रा·३

४

तीति ॥ शिरोगतत्समष्टिद्रूवर्त्तिप्राणानां पूर्वोक्तसमस्तत्वगतवाय्वादिदेवतानां च संख्यासाम्यात् शास्त्रस्य प्राणरूपत्वं तेन य
जमानस्य शिरसि प्राणधारणं भवति । अथ प्रश्नोत्तराभ्यां प्रउगशास्त्रस्य सामर्थ्यं दर्शयति ॥ किं स यजमानस्य पापभद्रमा
द्रियेतेति ह स्माह योऽस्य होता स्यादित्यत्रैवेनं यथाकामयेत तथा कुर्यादिति ॥ अस्य यजमानस्य होता स्यात्तस्य पापभद्रं कि
माद्रियेत । पापमनिष्टफलं भद्रमिष्टफलं चादृशं किं फलं संपादयितुं समर्थ इति प्रश्नः । अत्रैवं जानन्नेनं यजमानं प्रति यथा
होता कामयेत तथा कर्तुं शक्नोतीत्युत्तरं तत्र प्रथमं तं च प्रयुक्तमनिष्टं दर्शयति ॥ यं कामयेत प्राणेनैनं व्यर्धयानीति वाय
व्यमस्य लुब्धं शंसेदृचं वा पदं वा वीयात्तेनैव तल्लुब्धं प्राणेनैवैनं तद्व्यर्धयतीति ॥ यं यजमानमुद्दिश्य होता कामयेत कथ।
मिति तदुच्यते । एनं यजमानं प्राणेन व्यर्धयानि व्यृद्धं वियुक्तं करवाणीति । एवं कामयमानो होतास्य यजमानस्य संब।
धिनं वायव्यं तृचं लुब्धमामूढं यथा भवति तथा शंसेत् । लुभ विमोहन इति धातुः । व्यामोहमुकार उच्यते । एकामृचं वा
तदीयमेकं पदं वा त्यजेत् । स्तभयेत्तत्र पठेदित्यर्थः । तावतानेन तृचं स्वरूपं लुब्धं व्यामूढं भवति । तथा सति प्राणरूपत्वे
न पूर्वं निरूपितस्य वायोः क्रोधादेनं यजमानं प्राणेन वियोज[illegible]यति । द्वितीयं तच्च निमित्तमनिष्टं दर्शयति ॥ ॥ यं का
मयेत प्राणापानाभ्यामेनं व्यर्धयानीत्यैन्द्रवायवमस्य लुब्धं शंसेदृचं वा पदं वा वीयात्तेनैव तल्लुब्धं प्राणापानाभ्या
मेवैनं तद्व्यर्धयतीति । पूर्ववद्व्याख्येयं तच्च निमित्तमनिष्टं दर्शयति ॥ ॥ यं कामयेत चक्षुषैनं व्यर्धयानीति मैत्राव

४

रूणायस्य खलु ध्वंशो भेदश्चंचापदंवाती यत्तेनैव तत्खलु ध्वं चक्षुषैवैनं तत्समर्धयतीति। पूर्ववद्व्याख्येयं। चतुर्थतत्त्वप्रयुक्तमनि
ष्टं दर्शयति॥ ॥यं कामयेत श्रोत्रेणैनं व्यर्द्धयानी साग्निनमस्य खलु ध्वंशं शंसेद्वंचापदंवाती यात्तेनैव तत्खलु ध्वं श्रोत्रेणैवैन (त्रे)
त्समर्धयतीति॥ पूर्ववद्व्याख्येयं। पंचमतत्त्वप्रयुक्तमनिष्टं दर्शयति॥ ॥यं कामयेत वीर्येणैनं व्यर्द्धयानी सैंद्रमस्य खलु
ध्वंशं सेदश्चंवापदंवाती यात्तेनैव तत्खलु ध्वं वीर्येणैवैनं तत्समर्धयतीति। पूर्ववद्व्याख्येयं। षष्टतत्त्वप्रयुक्तमनिष्टं दर्श
यति॥ ॥यं कामयेताङ्गैरेनं व्यर्द्धयानी तिवैश्वदेवमस्य खलु ध्वंशं सेद्वंचापदंवाती यात्तेनैव तत्खलु ध्वमङ्गैरेवैनं तत्समर्ध
यतीति॥ पूर्ववद्व्याख्येयं। सप्तमतत्त्वप्रयुक्तमनिष्टं दर्शयति॥ ॥यं कामयेत वाचैनं व्यर्धयामीति सारस्वतमस्य खलु
ध्वंशं सेंदश्चंवापदंवाती यात्तेनैव तत्खलु ध्वं वाचैवैनं तत्समर्धयतीति। पूर्ववद्व्याख्येय। अथास्य शस्त्रस्येष्टफलसामर्थ्यं
दर्शयति॥ यमुकामयेत सर्वैरेनमङ्गैः सर्वेणात्मना समर्द्धयानीसेन्द्वास्य यथापूर्वमस्तु खलु अंशं शंसेत्सर्वैरेवैनं तदं
गैः सर्वेणात्मना समर्द्धयतीति। पूर्वोक्तानि प्राणादीनि सर्वाण्यंगानि सपूर्णो देहः सर्व आत्मा तत्समृद्धिकामो होता
स्य यजमानस्य सर्वधितदेवप्रउगशस्त्रं यथापूर्वं गुरोः समीपे पुरायेन क्रमेण पठितं तथा वस्तुतु खलुक्तं [illegible] कस्यचिद्द्वय
वस्यान्यथाभावाद्वनुस्वेनथाल्कस्य संपादितं कल्पाशंसेत्। तत्र कामयमानस्य समृद्धिः सिध्यति। वेदनप्रशंसति॥ ॥
सर्वैरंगैः सर्वेणात्मना समृध्यते य एवं वेदेति॥ स्पष्टोर्थः॥ ॥इत्येकादशाध्याये तृतीयः खण्डः॥ ॥अथ स्तोत्रशस्त्र

ब्रा·३

योदेवतावैलक्षण्यरूपमाक्षेपमुद्भावयति॥ तदाकुर्यथावावस्तोत्रमेवंशस्त्रमाग्नेयीषुसामगास्तुवतेवायव्ययाहोता
प्रतिपद्यतेकथमस्यायेणानुशंसाभवतीति। सामगानांयान्यस्तोत्राणितद्दृच आग्नेय्यमाम्नातः। अग्नआया

५

हीसादिषुसामगैराज्यस्तोत्रपाठात्। होतातुवायवायाहीसनयावा वायव्ययाप्रउगशस्त्रमारभतेअतोतेनविलक्ष
णदेवताकेनशस्त्रेणाग्नेय्यस्तृचःकथमनुशंसाभवतीति। अनुकूलशंसनाभावेस्तुतमनुशंसतीतिशास्त्रांतरं
विरुध्येतेत्याक्षेपः। तस्योत्तरंदर्शयति॥ ॥अग्नेर्वाएताःसर्वास्तन्वोयदेवतादेवताइति। सप्तसुतन्वेषुयाए
तावायुप्रभृतयोदेवताः प्रतीयंतेताः सर्वाअग्नेरेवशरीरभूताः अतोग्निविषयमेवकृत्स्नंशस्त्रंसंपद्यतइतिस्तो
त्रगताआग्नेय्यस्तृचोनुशंसाभवंति। अग्नेः प्रथमतृचप्रतिपादितायावायुदेवताया वायुदेवतायास्वरूपंदर्शयति।

शं

सयदग्निःप्रवानिवाद्दहतितदस्यवायव्यंरूपंतदस्यतेनानुशंसतीति। प्रवानिवप्रकर्षेणानेवसन्नधिकज्वालयादहसग्नि
रितियदस्तितस्यप्रकर्षात्मकंवायुसंबंधिरूपंवायुनाज्वालाधिक्योदयात् अतोप्रउगशस्त्रस्यसंबंधिनावायुरूपेणायं
होतातदग्निरूपमनुशंसति। द्वितीयतृचप्रतिपादितायाइंद्रवायुदेवतायाःसारूप्यंदर्शयति॥ ॥अथयद्वैधमिवकृत्वा
दहतिद्वौवाइंद्रावायूतदस्यैंद्रवायवंरूपंतदस्यतेनानुशंसतीति। ज्वालाद्वयमिवकृत्वायदादहतितदानीमस्यान्त

५

ज्वालाद्वयमिंद्रवायुसंबंधिरूपंभवति। अन्यत्पूर्ववत्। तृतीयतृचेसारूप्यंदर्शयति॥ ॥अथयदुच्चहृष्यन्निवहृष्य

तितदस्य मैत्रावरुणं रूपं तदस्य तेनानुशंसतीति। ज्वलतोग्नेरौन्नत्यसमुत्कर्षः ज्वालाशांत्यानीचत्वं निहर्षः तदुभयं मित्रावरुणसंबंधि
रूपं मित्रं दृष्टवतो हर्षेणोन्नतत्वात् अग्निमित्ररूपं। वरुणसंबंधिनी नामपानीचगामित्वादितरत्तु वरुणस्य रूपं तदायत्तत्वेनाग्निरनु
प्रस्तो भवति। तत्रैव युक्त्यंतरमाह॥ सयदग्निर्घोरसंस्पर्शस्तदस्य वारुणं रूपं तं यद्घोरसंस्पर्शं संतं मित्रकृत्येवोपासते तेन तदस्य
मैत्रं रूपं तदस्य तेनानुशंसतीति। सोग्निर्घोरसंस्पर्श उष्णसंस्पर्श इति यदस्ति तदस्याग्नेर्वरुणसंबंधिरूपं वरुणस्यायत्तत्वात्। घोरसं
स्पर्शं संतं स्प्रष्टुमशक्यम[illegible]पि तमपि तमग्निं शीतत्ताः प्राणिनो मित्रकृत्सा मित्रस्य कृतिः कार्यं समीपवर्त्तित्वानं तेनैवैनमुपासते। शीत
परिहारायह स्तोउदरं दृष्टं च वन्हिसमीपे प्रतापयंतो वन्हिं सेवंते। तदेवत्सेवनं अस्याग्नेर्मित्रसंबंधिरूपं ततोस्यायः संबंधिना नैमैत्रा
वरुणरूपेणायं होता वन्हिमनुशंसति चतुर्थेत्त्वचे सारूप्यं दर्शयति॥ ॥अथयदेनं द्वाभ्यां बाहुभ्यां द्वाभ्यामरणीभ्यां मंथंति तदस्याश्वि
नौ तदस्याश्विनं रूपं तदस्य तेनानुशंसतीति॥ अश्विनोर्द्वित्वाद्धस्तद्वयेनारणिद्वयेन च मंथनमस्याग्नेराश्विनं रूपं। पंचमत्त्वचे सारूप्यं द
र्शयति॥ ॥अथयदुच्चैर्घोषः स्तनयन् बबाकुर्वन्निव दहति यस्माद्भूतानि विजंते तदस्यैंद्रं रूपं तदस्य तेनानुशंसतीति। स्तनयन्गर्ध्व
निं कुर्वन्स एव ध्वनिस्त्रिभिर्विकारैरनुक्रियते। यत्तईदृशाद्ध[illegible]नि सहितादग्ने रूपात् भूतानि प्राणिनो विजंते बिभ्यति। तदुभय कारणध्व
निसहितं इंद्रस्य संग्रामार्थमास्फोटनं कुर्वतः शत्रुभयकारिणो रूपं। षष्टत्त्वचे सारूप्यं दर्शयति॥ ॥अथयदेनमेकं संतं बहुधा विहरं

ब्रा·३
६

तितदस्य वैश्वदेवं रूपं तदस्य तेनानुशंसतीति ॥ अग्नेराहवनीयादिस्थानेष्वाग्नीध्रादिविधिस्तोष्वु च बहुधा विहरणं यदस्ति तद्विश्वे
षां देवानां रूपं तेषामपि बहुत्वात् । सप्तमं तृचे सारूप्यं दर्शयति ॥ ॥ अथ यत्स्फूर्जयन्वाचमिव वदन्दहति तदस्य सारस्वतं रूपं त
दस्य तेनानुशंसतीति । यथा जनो वाचं वदति तथैवाग्निः स्फूर्जयति ॥ इषद्विच्छिद्य विलक्षणोच्चारणमिव शब्दं करोति तदेतद्वागु
च्चारणसदृशं ध्वनिकरणं सरस्वतीसंबद्धं रूपं । इत्थमग्नेर्वाय्वादिदेवतानां च सारूप्यद्वारानुशंसनमुपपाद्योपसंहरति ॥ ॥ एव
मुहास्य वायव्ययैव प्रतिपद्यमानस्य तृचेन तृचेनैवैताभिर्देवताभिस्तोत्रियानुशस्तो भवतीति । एवमुहानेनैव वाक्यप्रकारेणवा
यवायाहीत्येतया वायुदेवताकयैव ऋचा शस्त्रं प्रारभमाणस्य हेतुः तेन तेनोक्ततृचेन वप्रतिपादिताभिर्वाय्वादिदेवताभिर
ग्निसदृशीभिस्तोत्रियः स्तोत्रसंबंधी तृचो ग्न आयाहीत्यादिक आग्नेयो ऽप्यनुशस्तो भवति । तस्यानुष्ठानं यथा भवति तथा प्रउ
गशास्त्रमनुष्ठितं भवतीत्यर्थः । अथ शस्त्रयाज्यां विधत्ते ॥ ॥ विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिरिति
वैश्वदेवमुक्तं शस्त्रं वैश्वदेव्या यजति यजति यथाभागं तद्देवताः प्रीणाति । हे अग्ने विश्वेभिः सर्वैर्देवैः सह विशेषत इन्द्रेण
वायुना च सह तथा मित्रस्य धामभिस्थानैर्युक्तः सन् सोम्यं मधु सोमसंबंधिनं मधुरं रसं पिब । विश्वेभिरित्यादिका सेयमृ
क्वैश्वदेवी तया यजति तां याज्यामुपवेत् । कदा पठेदिति तदुच्यते । वैश्वदेवं बहुदेवताकमुक्तं शास्त्रं प्रउगनामकं शस्त्रं ।

६

पश्चात्सदेत्। तथासति स्वस्वभागमनतिक्रम्य सर्वा देवतास्तर्पयति॥ ॥इत्येकादशाध्याये चतुर्थः खंडः॥ ॥अथ शस्त्रया
ज्यांते पठनीयं वषट्कारं विधत्ते॥ ॥देवपात्रं वा एतद्यद्वषट्कारो देवपात्रेणैव तद्देवतास्तर्पयतीति॥ वौषळिति मंत्रे दवष
ट्कारः स च देवपात्रं देवानां पानसाधनं तस्माद्वषट् कुर्यात्। वौषळित्येव पठेत्। तथासति देवानामुचितेनैव पानसाधने
न सर्वा देवतास्तर्पयतीति। तत ऊर्ध्वं पठनीयमनुवषट्कारमंत्रं विधत्ते॥ ॥अनुवषट्कारोति तद्यथादोश्वान्वा गावा
पुनरभ्याकारं तर्पयेयुरेवमेवैतद्देवताः पुनरभ्याकारं तर्पयतीति यदनुवषट्करोतीति॥ सोमस्याग्ने वीहीत्ययं मंत्रोऽनुव
षट्कारस्तं पठेत्। तत्र लोकेऽदः। किंचिदिदं निदर्शनमस्ति कथमिति तदुच्यते। तथा मनुष्याः स्वकीयानश्वान्वा स्वकीया

मे

गा वा पुनरभ्याकारं पौनःपुन्येन तृणोदकादिभिरभिमुखीकृत्याभिमुखीकृत्य तर्पयंति। कंडूयनेन प्रियशब्देन वा लाल
यित्वा यथेष्टं ग्रासं प्रयच्छंति। एवमेवैतेनानुवषट्कारेण पुनःपुनर्देवता अभिमुखीकृत्य यजमानो हविषा तर्पयति। अनु
वषट्कारस्य प्रशंसार्थं चोद्यमुद्भावयति॥ ॥इमानेवाग्नीनुपासत इत्याहुर्धिष्ण्या यत्कस्मात्पूर्वस्मिन्नेव जुह्वति पूर्वस्मिन्व
षट्कुर्वंतीतीति॥ सोमस्य मध्यवर्तिषु धिष्ण्येष्वग्नयो ये याज्या विहिताः तानग्नीनृत्विजः समीपे स्थिता उपासत एव
सेवंत एव केवलं न तु तेषु जुह्वति नापि वषट्कुर्वंति। पूर्वस्मिन्नेवाहवनीये तिष्ठतेऽग्नावृत्विजो जुह्वति च तत्रैव वषट्कुर्वंति

6

ब्रा॰भा॰३

७

च । अथैवं सति धिष्ण्यगतानामग्नीनां प्रतिर्नास्ति ॥ ॥ यदेव सोमस्याग्नेर्वाहीत्यनुवषट्करोति तेन धिष्ण्यान्प्रीणाति ।
ति । हे अग्न इति तत्साकारेणाग्निं संबोध्य सोमस्य सोमरसं वीहि पिबेत्येवं मंत्रेण होतानुवषट्करोतीति यदस्ति तेन धिष्ण्या
नग्नीन् होता तर्पयति । तस्मात्त्वैषम्यं । प्रकारांतरेण प्रशंसितुं पुनश्चोद्यद्वयमुद्भावयति ॥ ॥ असंस्थितान्सोमान्
भक्षयंतीत्याहुर्येषां नानुवषट्करोति को नु सोमस्य स्विष्टकृद्भाग इतीति ॥ येषां छिदेवस ग्रहाणामर्थं होता नानुव
षट्करोति ते छिदेवसाः सोमा असंस्थिता असमाप्तदेवतार्थहोमस्यासमाप्तेः कथमृत्विजस्तान् छिदेवतान्भक्ष
यंतीत्येके चोद्यमाहुः । दर्शपूर्णमासादिषु स्विष्टकृद्भागेन तत्तत्पूर्वेषां हविषां संस्कारो भवति । नूनः सोमस्यापि संस्का
रायको नाम स्विष्टकृद्भाग इति द्वितीयं चोद्यं । तत्रोत्तरमाह ॥ यद्वाव सोमस्याग्ने वीहीत्यनुवषट्करोति तेन व संस्थिता
न्सोमान्भक्षयंति स उ एव सोमस्य स्विष्टकृद्भागो वषट्करोतीति मंत्रे सोमस्येति ज्ञाति मात्रस्तु द्विगुणानुषट्करोतीति
यदेवास्ति तेनैवानुवषट्काररहिता छिदेवसादयः सर्वे सोमाः संस्थिताः समाप्तास्तस्मात्संस्थितानेव छिदेवसा
न्नृत्विजो भक्षयंति । स उ एव यथोक्तोनुवषट्कार एव सोमस्य स्विष्टकृद्भागः अतोवषट्करोतीत्युक्तस्य प्रयोजनस्य प्रयो
जनस्य सिद्ध्यर्थमनुवषट्कुर्यादित्यर्थः ॥ ॥ इत्येकादशाध्याये पंचमः खंडः ॥ ॥ अथ वषट्कारमात्मिसेव अभिचा

७

रत्रयोगउच्यते ॥ ॥वज्रो वा एष यद्वषट्कारो यं द्विष्यात्तं ध्यायेद्वषट्करिष्यंस्तस्मिन्नेव तं वज्रमास्थापयतीति । वषट्का
रस्य वज्ररूपत्वात्तल्लक्ष्याने च द्वेष्ये वज्रप्रहारो भवति । अथ वौषळिति तस्य वषट्कारस्योत्तरभागं प्रशंसति ॥ ॥ष
ळिति वषट्करोति षड्वा ऋतव ऋतुष्वेवैनं तत्कल्पयत्यृतुषु प्रतिष्ठापयत्यृतून्वै प्रतितिष्ठत इदं सर्वमनुप्र
तितिष्ठति यदिदं किं चेति । षळिति मंत्रभागे नव संतादिषडृतुसंख्याया बुद्धिस्थत्वादृतून्कल्पयति । स्वस्व
प्रयोजनसमर्थान्करोति । ता वृतामू तेनाव्याकुलेन मंत्रेण प्रतितिष्ठति ॥ तत्प्रतिष्ठार्थं ब्राह्मणिकपुरुषवचनो
दाहरणेन द्रढयति । तदु ह स्माह हिरण्यदन्वैद एता वा एतेन षट्प्रतिष्ठाः प्रतिष्ठापयति द्यौरंतरिक्षे प्रतिष्ठितांतरिक्षं पृथिव्यां
पृथिव्यप्स्वापः सत्ये सत्यं ब्रह्मणि ब्रह्म तपसीत्येता एव तत्प्रतिष्ठाः प्रतितिष्ठंतीरिदं सर्वमनु प्रतितिष्ठति यदिदं किं च प्रतितिष्ठति य
एवं वेदेति ॥ ॥हिरण्मया दंता यस्यासौ हिरण्यदन्बिदस्य पुत्रो वैदः तादृशो मुनिस्तदु ह तदेव वचनमाह स्म । किं व
चनमिति तदुच्यते । एतान्येव द्युलोकादीनि ब्रह्मांतानि षट्स्थानानि यानि संति एतान्येव तेन वषट्कारेण होता प्रतिष्ठा
पयति । तत्र द्युलोकस्याधस्तादंतरिक्षं तस्मादंतरिक्षे द्युलोक आश्रितः । तच्चांतरिक्षं पृथिव्यामाश्रितं । पृथिवी
चाधोवर्तिनीष्वप्स्वाश्रिता ॥ आपश्च सत्ये समाश्रिताः जलेषु सत्यवादिषु सत्सु यथाकालं वृष्टिसंभवात् सत्यं ब्रह्मणि

ब्रा·भा·३
८

वेदेप्रतिष्ठितं । ईदृशमाचरणं सत्यमिति वेदेनैवावगमात् । वेदस्यपरिवषट्कारमंत्रानुष्ठानरूपेप्रतिष्ठितवेदस्यानुष्ठा
नप्रतिपादनार्थत्वात् । इत्यनेनप्रकारेणैताद्यु लोकादयोएवयथावत्तेनवषट्कारेणयदापरस्परप्रतिष्ठिताभवंति
तदाभवंतितदानीप्रतिष्ठारूपास्ता: पृथिव्याद्या एकैकत्रप्रतिष्ठिता: सन्ति अनुपश्याद्यदिदंकिंचजगदस्तितत्सर्वंप्र
तितिष्ठतियएवंवेदतास्यचप्रतिष्ठितिनि । अथवषट्कारंमंत्रस्यपूर्वोत्तरभागावुभौप्रशंसति ॥ ॥वौषळितिवषट्क
रो सप्तसोवावषवाहृत्तवृ:बलत्तमेवत्तमेवतदनुष्ठाद्धात्स्येषुप्रतिष्ठापयतियाहृगिवदेवेभ्य:करोतितादृगिवास्मैदेवा: तु
कुर्वंतीति ॥ मंत्रेष्ठवभागोवौशब्दोनिपत्वाद्वागतिप्रजननेसादिधातुजत्वाद्धागमनस्वभावमादिसमभिधत्ते ॥ तदेत
दभिप्रेत्यअसौवावववाविस्तुक्तंवसंताद्या ऋतवः संख्यावशात्षडित्यभिधीयंते । तन्मंत्रपाठेनेतमेववौशब्दाभिधेय
मादित्यषट्शब्दाभिधेयषड्दधातिनकेवलमाधनमात्रं किंतुतेष्वृतुषुप्रतिष्ठापयतिस्थैर्येणावस्थापयति एवंसत्यसौ
होतादेवेभ्योयादृशमेवप्रयोजनंकरोतितादृशमेवप्रतिष्ठारूपंप्रयोजनमस्मैहोत्रेतद्द्वारेणयजमानायदेवा:कुर्वं
ति ॥ ॥इत्येकादशाध्यायेषष्ठ:खंड: ॥ ॥अथफलविशेषार्थंवषट्कारस्यावांतरभेदानाह । त्रयोवैवषट्काराव ८
ज्रोधामच्छद्रिक्तइति । वज्रइतिप्रथमस्यवषट्कारभेदस्यनाम । धामच्छदितिद्वितीयस्यारिक्तइतितृतीयस्यातेषांमध्येव

ज्रस्यस्वरूपंदर्शयति॥ ॥सयमेवोच्चैर्वलिवषट्करोतिसवज्रइति।सहोतायमेवमंत्रमुच्चैर्यथाभवतिवलिचयथाभवति
तथावषट्करोतिसमंत्ररूपोवषट्करोवज्रइत्युच्यते।अत्रोच्चैःशब्देनध्वनेराधिक्यमुच्यतेवलिशब्देनाक्षरपारुष्यं
तदुभययुक्तोवज्रःतस्यप्रयोगंविधत्ते॥ ॥तंतंप्रहरछिषतेभ्रातृव्यायवधंयोस्मस्त्वस्त्वस्मैस्तृत्वैवतस्मात्सभ्रातृव्यमेव
तावषट्कृतस्तृशति॥ ॥योद्विष्योयजमानस्यस्तंतोहंतव्योभवतितस्मैस्तृत्वैवतंहंतुंछिपतेधंकुर्वतेभ्रातृव्यायशत्रवेतंतंव
धंप्रहरेतिवधशब्दोहननसाधनंवज्रंब्रूते।यदायदापेक्षितस्तदातदेतिविवक्षयातंतमितिवीप्सायस्मात्प्रहरणेहेतु
र्वज्रःतस्मात्सवज्रोभ्रातृव्यवतायजमानेनवषट्कृतःवषट्काररूपेणप्रयोक्तव्यः।होतृप्रयोगएवयजमानप्रयोगःद
क्षिणयाहोतुःक्रीतत्वात्।धामछदस्वरूपंदर्शयति॥ ॥अथयःसमःसंततोनिर्हाणर्चःसधामछदिति।योवषट्कारः
पूर्वोक्तवलित्वादिदोषरहितोयथाधीतस्तथैवोच्चारितःसंततोयाज्ययासहविच्छेदरहितःनिःशेषेणहानंपरित्यागो
यस्याऋचःसानिर्हाणात्याविधाकाचिदृग्याज्यारूपायस्यवषट्कारस्यसोयंनिर्हाणर्चःयाज्यापाठहीनइत्यर्थःतद्
लक्षणपदंनिर्हाणर्चःसंपूर्णयाज्यापाठोपेतइत्यर्थःकीदृशोवषट्कारोधामधामछदिति।धामयज्ञस्थानंतत्रयथारक्षां
सिनप्रविशंतितथाछादयतिसधामछत्।तस्यप्रयोगंविधत्ते॥ ॥तंतंप्रजाश्चपशवश्चानूपतिष्ठंतेतस्मात्सप्रजाकामेन

ब्रा॰भा॰२ ९

पशुकामो न वषट्कुर्यादिति ॥ ॥ प्रजाभिः पशुभिश्चान्वयार्थं तं तमिति वीप्सा । तं वषट्कारं धामच्छदं प्रजाश्च पशवश्चानुसंन
वेते तस्मान्नाहं धामच्छद्वषट्कारः प्रयोक्तव्यः । रिक्तस्य स्वरूपं दर्शयति ॥ ॥ अथ येनैव षलवराप्नोति स रिक्त इति ॥ व
षट्शब्दो वषट्कारमभिधत्ते भीमसेनो भीम इतिवदेकदेशेन व्यवहारात् येनैवोच्चारणेन षलवराप्नोति वषट्कारो वराधां समध्य
भावं प्राप्नोतीत्येनोच्चारणेन वषट्कारस्य समध्यभावः स तथोच्चारितो वषट्कारो रिक्त इत्युच्यते । उच्चध्वनियोगे तदभावे
रिक्तप्राप्तत्वात् । तमेतं रिक्तं निंदति । रिणक्त्यात्म । न रिणक्ति यजमानं पापीयान्वषट्कर्ता भवति पापीयानस्मै वषट्क
रोतीति तस्मात्तस्याशां नेयादिति । रिक्ताख्यो वषट्कारः प्रयुज्यमानः सन् होतुरात्मानं रिणक्ति अतस्तेन वषट्कर्ता होता पा
पीयान् भवति असंक्तनरकसानपापेन युक्तो भवति तस्मै यजमानाय वषट्करोति सोऽपि पापीयान् भवति तस्मात्तस्य वषट्
कारस्याशां नेयान्न प्राप्नुयादिच्छामपि न कुर्यात् किंमुत प्रयोगमित्यर्थः । प्रश्नोत्तराभ्यां वषट्कारस्येष्टानिष्टफलप्राप्तिसा
मर्थ्यं दर्शयति ॥ ॥ किं यजमानस्य पापभद्रमाद्रियेतेति ह स्माह यो ऽस्य होता स्यादित्यत्रैवैनं यथाकामयेत तथा कुर्यादिति ।
तदेतद्वाक्यं प्राणो वा एत इत्युक्तमिति स्मिन्नुत्तरखंडे उक्तविषयं यथा व्याख्यातं तथैवात्र वषट्कारविषयं व्याख्यातव्यमिति । अ ९
निष्टफलसाधनत्वं दर्शयति । यं कामयेत यथा वानीजानो भूत्तथैवजानः स्यादिति यथैवास्य चंद्रयात्तथैवास्य वषट्कु

यांत्सदृशमेवैनं तत्करोतीति। अनीजानोऽहुतयज्ञः पुरुषः यथैव फलरहितोऽभूत्तथैवेजानः कृतयज्ञोऽपि फलरहितः स्यादि
तियं यजमानं होता कामयेत अस्य यजमानस्यैनस्वरेण याज्यां ब्रूयात्तेनैव स्वरेण वषट्कारमपि ब्रूयात्तथा सत्येनं कृतयज्ञं य
ज्ञरहितेन सदृशं फलरहितं करोति। अनिष्टफलांतरसाधनत्वं दर्शयति॥ ॥यं कामयेत यात्स्यादित्युच्चैस्तरामस्यर्चं
चमुक्त्वा शनैस्तरां वषट्कुर्यात्पापीयांसमेवैनं तत्करोतीति। पापीयान् दरिद्रो नकरयोग्यो वा यजमानः स्यादिति कामय
मानो होतार्चमतिशयेनोच्चैरुच्चार्य वषट्कारमतिशयेन नीचैर्ब्रूयात्तथा सत्येनं यजमानं पापीयांसमेव करोति। श्र
येष्टफलसाधनत्वं दर्शयति॥ ॥यं कामयेत श्रेयान्स्यादिति शनैस्तरामस्यर्चमुक्त्वोच्चैस्तरां वषट्कुर्याच्छ्रियामेवै
नं तच्छ्रियामादधातीति॥ श्रेयान् दारिद्र्यरहितः पापरहितश्च यजमानः स्यादिति कामयमानो होता ऋचं याज्यांशं शनैरुच्चा
र्य वषट्कारमतिशयेनोच्चैरुच्चारयेत् तच्छ्रियै संपदर्थमेव भवति। तेन प्रयोगेणैनं यजमानं श्रियामैहिकामुष्मिकसंपदि स्था
पयति। याज्यावषट्कारयोर्नैरंतर्यं विधत्ते॥ ॥संततमृचा वषट्कृत्यं संतत्या इति। ऋचा याज्यया साहसंततं निरंतरं यथा भव
ति तथा वषट्कृत्यं वषट्कार उच्चारणीयस्तच्च यजमानस्य श्रेयः संतत्यै संपद्यते। वेदनं प्रशंसति॥ संधीयते प्रजया पशुभिर्य एवं वे
दति॥ ॥संधीयते संयुज्यते॥ ॥इत्येकादशाध्याये सप्तमः खंडः॥ ॥अथ होतुर्वषट्कारकाले देवताध्यानं विधत्ते॥ यस्यै देव

ऐ०भा०२

त्तायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्साक्षादेव तद्देवतां प्रीणाति प्रत्यक्षाद्देवतां यजतीति ॥ अध्वर्युर्यां देवतामुद्दिश्य
हविर्गृह्णाति तां देवतामयं होता वषट्करिष्यन्वषट्कारायोद्यतः सन्ध्यायेत् मनसा शास्त्रीयां देवतामूर्तिं सम्यगनुसंधा

१०

यपश्चाद्वषट्कुर्यादित्यर्थः ॥ एवं सति साक्षादेव प्रत्यक्षेणैव देवतां तर्पयति । न केवलं तत्स्वथमेव देवतायाः साक्षात्कारः किं
तु प्रत्यक्षात् प्रत्यक्षेणैव देवतां यजति यागकाले प्रत्यक्षेणोपचरतीत्यर्थः । ननु देवता चक्षुषा न दृश्यते कथमस्याः प्रत्यक्षत्वमि
ति चेत् । नायं दोषः । भानसप्रत्यक्षस्य विवक्षितत्वात् । यथा पुरो वर्तिनी देवता चक्षुषा दृश्यते तथैव चिन्त्यमानापि मनसा दृ
श्यत एव । होतुर्वषट्कारादूर्ध्वमनुमंत्रणं विधत्ते ॥ ॥ वज्रो वै वषट्कारः स एष प्रहृतो शांतो दीदाय तस्य हैतस्य न सर्व इव शांतिं वे
द न प्रतिष्ठां तस्माद्धाप्येतर्हि भूयानिव मृत्युस्तस्य हैषैव शांतिरेषा प्रतिष्ठा वागिति वा तस्माद्वषट्कृत्यवषट्कृत्य वागित्यनुमंत्रयेत
स एनं शांतो न हिनस्तीति । वषट्कारस्य वज्रत्वमसकृदुक्तं स एष वषट्कारात्मको वज्रः परस्मा परस्मा परिप्रहृतः सन्नशांत

श्रां

उग्रः दीदाय दीप्यते तस्य वज्रस्य शांतिमुपशमप्रकारं सर्व इव सर्वोपि पुरुषो न वेद उपद्रवशांतेरूर्ध्वं वषट्कारस्यायत्नपरिहा
रेणावस्थानं प्रतिष्ठानामपि सर्वो न वेद तस्माच्छांतिप्रतिष्ठे । विषयज्ञानाभावादेतर्ह्यपि इदानीमपि लोके मृत्यु

१०

र्भूयानिव बहुर्भूत एव प्रवर्तते तस्मात् दृश्यवषट्कारवज्रस्यैषैव वक्ष्यमाणा शांतिः शमनोपायः तथैषा वक्ष्यमाणैव प्रतिष्ठा

परोपद्रवरहितावस्थितिः वागिसेवेसनेनसाभिधीयते । उपरिष्टाद्वक्ष्यमाणस्य मंत्रस्य स्मरणमिदं वाणोजइत्यादिको योमं
त्रः सएववशमनोयायोनस्तन्नः कश्चिद्विलिप्तस्माद्वषट्कारस्य यदा यदा वषट्करोति तदा तत्रैंदा वागिमंत्रेणानुमंत्रयोता सर्व उत्र
स्तावत्ताशांतएनं भहिनस्ति । अयमेकः पक्षः । पक्षांतरमभिप्रेसामेन मंत्रेणइत्यनुमंत्रेणं विधत्ते ॥ ॥ वषट्कारमामांप्र
मृक्षोमाहंत्वांप्रमृक्षं बृहता मन उपह्वये व्यानेन शरीरं प्रतिष्ठासि प्रतिष्ठां मागमयेति वषट्कारमनुमंत्रयेतेति । हे वष
ट्कार वज्ररूपमांयजमानं मांमे प्रमृक्षः प्रमर्द्य विनष्टं माकार्षीः अहमपि त्वां माप्रमृक्षं विनष्टं माकार्षं बृहता प्रौढेनय
तेन मनस्त्वद्री उपह्वये अनुजानामि यथा व्यानेन व्यानादि वायुना सह त्वदीयं शरीरमनुजानामि अतस्त्वं सर्वस्य प्राणसं
घस्य प्रतिष्ठासि स्थैर्येणावस्थितिं गच्छ ततो मामपि प्रतिष्ठां स्थैर्येण चावस्थितिं प्रापय इत्यनेनानुमंत्रेणानुमंत्रेणानुमंत्रयेत
। तमिमं द्वितीयपक्षं निंदितुं मंत्रेणैव ब्रह्मवादी कश्चिदाहस्म किमाहेति तदुच्यते । एतस्य वोक्तं मंत्रवाक्यं दीर्घं सदपि वज्रं शम
यितुमप्रभुनक्षमं । कोसौ क्षमो मंत्र इति सं उच्यते ओजः सह ओज इति पक्षत्रयात्मको मंत्रः । मंत्रार्थं तु श्रुतिरेव व्याख्यास्य
ति । तेन मंत्रेणानुमंत्रणं विधत्ते । इत्येव वषट्कारमनुमंत्रयेतेति । एवकारः पूर्वमंत्रव्यावृत्त्यर्थः । मंत्रपदयोरर्थं दर्शयति ॥ ॥
ओजश्च हवे सहश्च वषट्कारस्य प्रियतमे तन्वौ इति ॥ स्पष्टोर्थः । अनेन मंत्रे दृशंयति ॥ ॥ ओजश्च हवे सहश्च वषट्कार

ग्रा·भा·३

११

सप्रियतमेनन्वा[illegible]विति एणोअखशांतिंदर्शयति॥ प्रियेणैवैनंतद्धाम्नासमर्द्धयतीति॥ प्रियतमयोःशरीरयोर्मध्यह
णोसतिवषट्कारस्योयत्स्वरूपःकोयोगस्तुतिनत्तएनंवषट्कारःप्रियेणधाम्नासर्वभूतानामनुपद्र[illegible]चकारिणाप्रियेणस्व
रूपेणसमर्द्धकरोति। अत्रमंत्रेगतोद्वितीयश्चौजःशब्दआदरार्थइत्यभिप्रायः। वेदनंप्रशंसति॥ प्रियेणधाम्नासमर्ध्य
तयएवंवेदेति। अथप्रियशरीरद्वयवाचकाभ्यांपदाभ्यांसहितमादौविहितंमंत्रमेवसिद्धांतयति। वाक्चैवप्राणापानौ।
चवषट्कारस्तएतेवषट्कृतेवषट्कृतेत्युक्तामंतितानमुमंत्रयेतवागोजःसहओजोमयिप्राणापानाविसात्मनोवतः
होतावचचप्राणापानौचप्रतिष्ठापयतिसर्वायुत्वायेति। येयंवागस्तियौचप्राणापानौस्तस्तेत्रयोवषट्कारस्वरूपःय
दा२ होतवषट्करोतितदा२ वषट्काररूपाहोतुर्वाक्प्राणापानाःशरीराउत्क्रामंतिअतस्तन्मा[illegible]भूदितितास्त्वाना
न्वागित्यादिनाप्राणापानाविसंतेनमंत्रेणानुमंत्रयेतमंत्रस्यायमर्थः। ओजःसहइत्याभ्यांप्रियशरीराभ्यामुपेतहेवष
ट्कारत्वमसादात्म[illegible]य्योजोवलमस्तुतथावाक्प्राणापानाःसुखेनतिष्ठंत्विति। अनेनमंत्रेणहोतास्वात्मन्येव
वाचंचप्राणापानौचस्थापयतितावतास्वयंसर्वायुःशतसंवत्सरपरिमितेनायुषायुक्तोभवतिरतत्त्वयजमानस्यसर्वा
युत्वायसंपद्यते। पूर्वत्रवषट्कृत्सवागित्सनुमंत्रयेतेतिवषट्कारानुमंत्रणयोरेककर्तृकत्वमुक्तं अत्राप्यात्मन्येवतद्धो

११

नेतिब्राह्मणेहोतृकर्तृकत्वं प्रतीयते तेनतोनुमंत्रस्य यजमानकर्तृकत्वे ऽप्येतद्रूपं वाधितं होतृकर्तृकत्वमेव द्रष्टव्यं वेदनं प्रशंसति। स
र्वमायुरेतीत्य एव वेदेति॥ ॥इत्येकादशाध्याये ऽष्टमः खंडः॥ ॥अथप्रैषादीनां प्रशंसां विवक्षुरादौ प्रैषान्प्रशंसति। यज्ञो वै

वे

देवेभ्य उदक्रामत्तं प्रैषैः प्रैषमैच्छन्यत्प्रैषैः प्रैषमैच्छंस्तत्प्रैषाणां प्रैषत्वमिति॥ ज्योतिष्टोमाख्यो यज्ञोपदार्थेन चिन्नितिमित्तेन देवे
भ्य उदक्रामत्तदानीमृत्विजो यज्ञं प्रैषैर्यज्ञं प्रैषैर्होतायक्षदग्निं समिधः स्वमाद्यैः प्रैषमंत्रैस्तस्य यज्ञस्य प्रैषमाकाङ्क्षितेनैच्छन्। य
स्मादेवं तस्मात्प्रैषं साकाङ्क्षमन्वकुर्वन्तेभिरितिप्रैषामंत्राणां प्रैषनाम संपन्नं। अथपुरोरुचः प्रशंसति। तं पुरोरुग्भिः प्रारोचयन्य
त्पुरोरुग्भिः प्रारोचयंस्तत्पुरोरुचां पुरोरुक्त्वमिति॥ वायुरग्रेगा इत्याद्याः सप्त पुरोरुचः॥ प्रगतत्वान्नाशमानं प्ररोचनहेतु
त्वात्। तथाविधाभिः पुरोरुग्भिस्तं पूर्वमागतं यज्ञं देवाः प्रारोचयन्। तस्य यज्ञस्य रुचिमुत्पादितवन्तः। अतः पुरोरोचनहेतुत्वा
त्पुरोरुगिति नामसंपन्नं वेदः प्रशंसामाह। तं वेद्यामन्वविंदन्यद्वेद्यामन्वविंदंस्तद्वेदेर्वेदित्वमिति॥ तं प्ररोचितं यज्ञं
सोमिकायां वेद्यामन्वविंदन्ननुकूलत्वेनोपलब्धवंतः। अतो वेदनस्य लाभस्य स्थानत्वाद्वेदिरिति नामसंपन्नं। ग्रहप्रशंसामा
हातं वित्तं ग्रहैरगृह्णंस्तयद्वित्तं ग्रहैरगृह्णंस्तद्ग्रहाणां ग्रहत्वमिति। वित्तं लब्धं तं यज्ञं ग्रहरूपैः पात्रविशेषैरुपांश्वन्तर्यामादिभिर्विशेष
णस्वीकृतवंतः तस्माद्ग्रहणस्य स्वीकारस्य हेतुत्वाद्ग्रह नामसंपन्नं। निविदां प्रशंसामाह॥ तं विद्वांसो निविद्भिर्न्यवेद

यन्मद्वित्वानि विज्ञिर्न्येवेदयंस्तं निविदां निविल्लमिति । तेयज्ञं वित्वालब्ध्वातेदेवाः परेभ्योदेवेभ्यो निविद्भिः पूर्वोक्तद्वादशा
पदादिरूपाभिर्न्यवेदयनकथितवंतः तस्मान्निवेदनस्यपरबोधनार्थकथनस्यहेतुत्वान्निविन्नामसंपन्नो । अथप्रैष
कर्तुः प्रकृत्गुणविधानार्थं प्रस्तौति । महद्वावनष्टैष्यमभ्यल्पंवेच्छतियत्तयोवावत्तयोऽर्ज्यायइमाभीच्छतिसएवतयोः साधी
यऽत्त्वतीति । नष्टंवस्तुप्रसन्नेनतत्रतत्रत्वान्विच्छतीतिनष्टैषीतादृशः पुरुषोद्विविधः तत्रकश्चिन्महद्वावनष्टाद्वस्तुनोधि
कमेवाभीच्छति । नष्टादल्पंवाऽन्यः कश्चिदिच्छति । तयोर्मध्येयत्तरोवावयएवपुरुषोऽज्यायऽस्त्वमहदेवेच्छतिसएवपुरु
षस्तयोर्मध्येसाधीयात्संतंसाधुवस्तुइच्छतिअल्पंकामयमानस्तुनतथेत्यर्थः । अस्त्वेवंलौकिकन्यायः किंप्रकृतइत्या
शंक्याह । यउएवंप्रैषान्वर्षीयसोवर्षीयसोवेदसउएववृत्तान्साधीयोवेदनष्टैष्यंवेत्तघस्त्वैषाइति । यउएवयस्तुप्रैषान्व
त्काप्रैषामंत्रान्वर्षीयसोवर्षीयसः अतिप्रवृद्धान्वेदासर्वेषुप्रैषमंत्रेषुप्रवृद्धत्वार्थेवीप्साप्रयुक्ता । प्रैषमंत्राः कस्मात्प्रवृद्धा
इतिचेत् । पुरोनुवाक्यानांसंनिहितत्वात्ताभ्योऽधिकान्वर्षीयसऽस्तवगंतव्याः सउएवदीर्घत्वाभिज्ञएववृत्तान्प्रैषमंत्रान्सा
धीयोवेदअतिशयेनसम्यग्वेद । ननुलौकिकन्यायोदाहरणेनष्टवस्तुनोन्वेषणमुदाहृतंइहतुप्रैषमंत्राणामभिवृद्धि
रुक्तासतालौकिकेवासंगतमितिचेत् । संगतमेवेतत्तर्हियस्माद्धिप्रैषाः संतितनष्टैष्यंनष्टस्ययज्ञस्यान्वेषणहेतवः

।पुरोनुवाक्याभ्यो दीर्घत्वेन प्रैषा प्रशस्यन्त उच्चारणकाले प्रह्वत्वं विधत्ते। तस्मात्प्रह्वास्तिष्ठन्प्रेष्यन्ति इति। यस्मादतिविशे
षेण हृद्याः प्रैषास्तस्मात्तस्य काले मैत्रावरुणः प्रह्वो विनयेन किंचिदवनतशिरास्तिष्ठन्ननुपविष्टो मंत्रान्पठेत्। यथा
लोके पितृगुर्वादीन्हष्ट्वा प्रह्वास्तिष्ठन्ति तद्वत्। यथा वा नृष्टवस्त्रान्विष्ठान प्रह्वत्वादिना गुप्तमश्नरति।। ।।इत्येकादशा
ध्याये नवमः खंडः।। ।।अथ निविदां सवनभेदेन स्थानभेदं विवक्षुः प्रातःसवने स्थानविशेषं विधत्ते।। ।।गर्भा वा एत
त उक्थानां यन्निविदस्ताः पुरस्तादुक्थानां प्रातःसवने धीयंते तस्मात्पराचो गर्भा धीयंते पराञ्चः संभवंतीति।।अग्नि
र्देवेद्ध इत्यादयो निविदः संति एते निविदः प्रैषा उक्थानां शस्त्राणां गर्भा वै गर्भस्थानीया एवं तथा सति प्रातःसवनप्रयो
गे शस्त्राणां पुरस्तान्निविदो धीयंत स्थाप्यंते स्थापयेयुरित्यर्थः यस्माद्गर्भस्थानीयानां पुरस्थापनं तस्माल्लोके पि गर्भाः
पराञ्चः शरीरपरमुखत्वं पुरोभागं गच्छंतो धीयते। धार्यंते प्रसवकालेपि पराञ्चः पुरोभागं गच्छंत उत्पद्यंते। प्रयुक्ताः।। माध्यंदि
नसवने स्थानविशेषं विधत्ते। यन्मध्यतो मध्यंदिने धीयंते तस्मान्मध्ये गर्भा धृता इति।। यस्मादुक्थशस्त्राणां मध्ये निविदः त
स्माद्गर्भा उदरमध्ये धीयंते। तृतीयसवने स्थानविशेषं विधत्ते। यदंते तृतीयसवने धीयंते तस्मादमुतोर्वाचो गर्भाः प्र
जायंते प्रजाभ्यो [illegible] इति।। अंततः शस्त्रसमाप्तिप्रदेशे एकामृचं शिष्ट्वा निविदः पठितव्याः यस्मादेता अंतिमदेशभागि

ब्रा०भा०३
२३

[illegible]स्य: तस्माल्लोके पिंगर्भा अमुतो निवारस्थानात्मातुरुदरमध्यादर्वाच: अधोभागगता: प्रजायंते तद्वद्यजमानस्य प्रजननार्थं
भवति। वेदनं प्रशंसति॥ प्रजायते प्रजया पशुभिर्य एवं वेद इति॥ सवनत्रये विहितं निविदः स्थानत्रयं प्रशंसति पेशा वा एत उ
क्थानां यन्निविदस्ता घ सुरस्तादुक्थानां प्रातःसवने धीयंते यथैवं प्रवयणतः पेशः कुर्यात्तादृगेव तन्मध्यतो मध्यंदिने धी
यंते यथैव मध्यतः पेशः कुर्यात्तादृक्तद्यदंततस्तृतीयसवने धीयंते यथैवावप्रछेदनतः पेशः कुर्यात्तादृक्तदिति। पेशा अलं
काराः। वे[illegible]ञ् तंतुसंताने इति धातोर्वयनशब्दो सिद्धिः। कुविंदस्य यत्नारंभे वपनं तत्प्रवयणं। लोके यथैव वाससः प्रवयण
तः वयनप्रारंभप्रदेशे अलंकारं कुर्यात् वर्णांतरोपेतैस्तंतुभिरलंकारः। तथैव प्रातःसवने शस्त्राणां पुरस्तान्निवित्स्थानं भवति
तच्च वस्त्रस्थानीयानामुक्थानां प्रथमभागे अलंकाराय संपद्यते शस्त्रमध्ये तस्य स्थानं वस्त्रमध्ये वर्णांतरेणालंकारसमं। अव
प्रछेदनो वस्त्रस्यांतभागः तत्र यथा वर्णांतरेणालंकारः तादृगुक्थानामंते निवित्स्थानं। वेदनं प्रशंसति॥ सर्वतो यज्ञस्य पे
शसा शोभते य एवं वेद इति॥ ॥इत्येकादशाध्याये दशमः खंडः॥ ॥अथ निविद्विषयं वक्तव्यं विवक्षुरादौ सूर्यसादृश्ये
न निविदः प्रशंसति॥ सौर्या वा एता देवता यन्निविदस्ता घ सुरस्तादुक्थानां प्रातःसवने धीयंते मध्यंदिने मध्यतस्तृतीयसवन
आदित्यस्यैव तद्व्रतमनुपर्यावर्तंत इति। या निविदः संति ता एवाः सूर्यसंबंधिन्य एव देवताः। यथा सूर्यः पुरस्तादुदेत्यथ

२३

मध्येस्थित्वा पश्चादंते स्तमेति एवं निविदोपि पुरस्तान्मध्यंते च स्थाप्यंते तस्मादादिस्थैव सूक्तमाचरणमनु निविदः पर्यावर्तंते। तासां निविदां द्वादशपदरूपाणामेकैकस्मिन्पादे ऽवसानं विधत्ते ॥ षड्वा वै देवा यज्ञं समभरंस्तस्मात्षड्नोनिविदः शस्यंत इति। देवाः पुरा यज्ञं षड्भिः पदैः समभरन् एकैकं भागं क्रमेण संपादितवंत इत्यर्थः। तस्मादेता निविदोपि पादशः शंसनीयाः। निविदां शंसनकाले यहोत्रे ऽश्वदानं विधत्ते। षड्वै तद्देवा यज्ञं समभरंस्तस्मादश्वः समभवत्तस्मादाहुः अश्वं निविदां शंस्त्रे दद्यादिति तद्उ खलु वरमेव ददतीति। षड्भ्यस्मिन्नेव देशे तत्र तदा देवा यज्ञं संपादितवंतः। तस्मात्तद्देशादश्व उत्पन्नः। अतएवाभिज्ञा ऽस्माकुः किमाहुरिति तदुच्यते। निविदां शंसकायाश्वं दद्यादिति तदु खलु तेनैवाश्वदानेन वरमेव श्रेष्ठमेव वस्तु ददतीत्यभिप्रायः। इति ॥ द्वादशस्तु निविसदेषु कस्यपि पदस्यानि पदस्यातिक्रमं निषेधति। न निविदः पदमतीयादिति। एकमपि पदं परित्यज्य दित्यर्थः। विपक्षबाधकमेवमेव पक्षे निगमयति ॥ यन्निविदः पदमतीयाद्यज्ञस्य तच्छिद्रं कुर्याद्यज्ञस्य वोच्छिद्रं स्रवद्यजमानो नुपापीयान्भवति तस्मान्न निविदः पदमतीयादिति ॥ ॥ पदस्य परित्यागे यज्ञस्य छिद्रं भवति तच्च स्रवति ततो यजमानो निंद्यो भवति तस्मान्निविदः पदे विपरिहरेन्मोहयेद्यज्ञं मुग्धो यजमानः स्यात्तस्मान्न निविदः पदे विपरिहरेदिति ॥ विपरिहारो विपर्यासः निविदः संबंधियत्सदद्वयं तन्न विपरिहरेत् विपरीतं न यानपठेत् तथा

ग्रा॰ भा॰ ३ २४

सस्वयं होता यज्ञं मोहयेत् यज्ञभ्रान्तिं जनयेत् ततो यजमानोपि मुग्धो भ्रान्तः स्यात् तस्माद्विपर्यासो न कर्त्तव्यः निविसदसंश्ले-
षणे निषेधति ॥ न निविदः पदे समस्येद्यन्निविदः पदे समस्येद्यज्ञस्य तदायुः संहरेत् प्रमायुको यजमानः स्यात् तस्मान्नि-
विदः पदे समस्येदिति ॥ पदयोः संश्लेषणे यज्ञस्यायुः संहृतं भवेद्यज्ञो विनश्येदित्यर्थः ततो यजमानो म्रियेत तस्मात्तस्मा-
त्पदद्वयं न संश्लेषयेत् । अनेन विधिना सर्वेषां पदानां परस्परविश्लेषणे प्राप्ते मध्यमयोर्द्वयोः पदयोः संश्लेषं विधत्ते । पदं
ब्रह्म प्रेदं क्षत्रं मिसे तेएव समस्य ब्रह्म क्षत्रयोः संश्लिसेन तस्माद्ब्रह्म च क्षत्रं च संश्लिते इति ॥ निविसपादानां मध्ये प्रेदं
ब्रह्मेसेकं पदं प्रेदं क्षत्रमिस परं पदं उभे एव संश्लेषयेत् एवकार इतरसंश्लेषव्यावृत्त्यर्थः । तदेतन्मेलनं ब्राह्मणक्षत्रि-
यजातौ परस्पराश्रयणाय भवति तस्मादेव लोके जातिद्वयं परस्पराश्रितं तिष्ठति ब्राह्मणो धर्मं प्रवर्त्तयति । क्ष-
त्रियस्तत्परिरक्षां करोति । निविसदानां प्रक्षेपस्थानं यस्मिन् सूक्ते कं चिन्निय[illegible]मं विधत्ते ॥ नत्तु चेन चतुर्थं च मति निम्नेन नि-
विदा घेवस्तोत्र मति शास्त्रं भवतीति । तिस्र ऋचो यस्मिन् सूक्ते तत्त्र्यृचं चतस्र ऋचो यस्मिन् सूक्ते तच्चतुर्ऋचं तनादृत्य मुभ-
यविधं सूक्तमतिक्रम्य निविद्धानां निविसदानं प्रक्षेपं न मन्येत न चिन्तयेत् । एतदुक्तं भवति । त्रिचतुरमात्रं चेत्सूक्तादर्वा-
गेन सूक्ते निदं न दध्यात् किंतु भयस्मिन्नेव वदध्यादिति । निविदः सर्वं धियदकैकमेव पदं तदेव प्रत्येकं प्रतिसूक्ते भवति

यस्मादीदृशोंऽशमर्थं तस्मादित्युक्तार्थोपसंहारः । अधिकेसूक्ते निविसदेषु प्रक्षिप्तेषु निविदैव स्तोत्राप्तिप्रसंगः । नंकृत्स्नंभ
वृत्तिस्त्वं नापेक्षत इत्यर्थः ॥ तृतीयसवने विशेषं विधत्ते । एकां परिशिष्य तृतीयसवने निविदं दध्यादिति ॥ सूक्ते
ययमाणं सानामवस्थाप्य ततः पूर्वमेव तृतीयसवने निविदं प्रक्षिपेत् । विपक्षबाधपुरःसरं स्वपक्षमुपसंहरति । य
द्यपरिशिष्य दध्यात्प्रजननं तदुपहन्यात् ऊर्भैस्तत्प्रजाव्यर्द्धयेत्तस्मादेकामेव परिशिष्य तृतीयसवने निविदं दध्या
दिति ॥ यदि हेतूंश्चोपरिशिष्य ततः पुरा निविदं दध्यात्तदानीं प्रजोत्पादसाधनं विनाशयेत् । पुत्रादयः प्रजा गर्भं
व्यर्द्धयेत् । विपुक्ताः कुर्यात्प्रजननमुपहन्यादित्यनेन यजमानस्य प्रजोत्पादनं गर्हितं । प्रजा व्यर्द्धयेदित्यनेन पूर्व
मुत्पन्नानां पुत्रादीनामपसरां हिंसा । तस्मादित्युपसंहारः । अथ निविद्धानीयेन सूक्तेन निविदतिक्रमं निषेधति ॥ न
सूक्तेन निविदमतिपद्येतेति । यत्सूक्तं निविद्धानार्हं निविदमतिक्रम्य तेन सूक्तेन न पद्येत निविल्लक्षेपं परित्यज्य केवलं
तत्सूक्तं न पठेदित्यर्थः । प्रमादान्निविल्लक्षेपविस्मृतौ पुनस्तत्सूक्ते निविदं प्रक्षिप्य पाठोऽभ्यासाय सक्तं संनिषेधति ॥ य
न सूक्तेन निविदमतिपद्येत न तत्पुरुपानिवर्तेन वास्तुहमेव तदिति ॥ निविदमतिक्रम्य परित्यज्य निविल्लक्षेपयोग्ये
न येन सूक्तेन न पद्येत अनुष्ठाना प्राप्नुयात्तद्धि स्मृत्वा निविल्लं सूक्तं पुनर्नोपनिवर्तेत भूयो निविदं प्रक्षिप्य न पठेत् ।

14

ग्रा॰३
१५

तत्रहेतुरुच्यते। तद्धिस्पततिनिविंत्कं सूक्तं वा सूक्तमेव वा सूक्तशब्देन निविदः स्थानमुच्यते तस्य स्थानस्य घातकं तत्सूक्तं
ततः पुनः पाठस्यनयोग्यं कानर्हिं तदानीं निविद्धोगन्तिरित्याशंक्याह॥ अन्यत्रदैवतं तच्छंदसं सूक्तमाहृत्य तस्मिन्निविदं द
ध्यादिति। पूर्वस्यनिविद्धानीयस्य सूक्तस्य देवतायादृशी छंदश्च यादृशं तथाविधाभ्यां देवताछंदोभ्यां युक्तमन्यत्र कंचि
त्सूक्तमाहृत्य तस्मिन्सूक्ते निविदं प्रक्षिपेत्। तत्र कंचिद्विशेषं विधत्ते॥ माप्रगामपथो वयमितिपुरस्तात्सूक्तस्य शंसती
ति॥ यस्मिन्नाहृतेन तने सूक्ते निविन्न प्रक्षिप्यते तस्य पुरस्तात्तत्साठात्पूर्वं माप्रगामेति सूक्तं शंसेत्। वयं होतारः पथः
शंसनमार्गात्तु प्रभ्रष्टाः संतो माप्रगाम प्रभ्रष्टा मा प्रभूवामेति। तस्य पादस्यार्थः। मार्गभ्रंशदोषो ऽस्माकं माभूदित्यभि
प्रायः। द्वितीयपादस्य तात्पर्यं दर्शयति॥ पथो वा एष प्रैति यो यज्ञे मुह्यति मा यज्ञादिंद्र सोमिन इति यज्ञादेव तन्न प्रच्यव
त इति॥ मायज्ञादित्यादिर्द्वितीयः पादः तस्यायमर्थः हे इंद्र सोमिनः सोमयुक्ताद्यज्ञान्मा प्रगामेत्यनुवर्तते। प्रभ्रंशं मा
प्राप्नवामेति। यः पुमान्यज्ञे मुह्यति भ्रांतिं प्राप्नोति एष पुमान वश्यंपथः प्रैति स्वमार्गाद्भ्रश्यत्येव अतो माप्रगामपथइत्येतावता
नपर्याप्तं किंतु मार्गभ्रंशपरिहारदार्ढ्यार्थं मायज्ञादित्यपि पठनीयं तस्मात्पाठेनायं यज्ञान्न प्रच्यवते॥ अथ चो पथो
वा एष इत्यर्थवादः पूर्वपादशेषत्वेन व्याख्येयः। तृतीयमादनुपद्याचष्टे॥ मांतस्थुर्नो अरातय इत्यरातीयत एव तदपहं

१५

नीति ॥ नोस्माकं अंतर्मध्ये अरातयः शत्रवो मास्थुः मांतिष्टंतु । तस्मात्पाठेन अरातीयतः शत्रुत्वमिच्छंत एव पुरुषानपहंति ।
तस्मिन्सूक्ते द्वितीयामृचमनुवदति ॥ यो यज्ञस्य प्रसाधनस्तंतुर्देवेष्वाततः । तमाहुतं नशीमहीति ॥ यः पुरो यज्ञस्य प्रसा
धनः कुलपारंपर्येण य एव यज्ञस्य प्रकर्षेण साधकः अत एव तंतुर्देवेष्वाततः दीर्घतंतुरिव देवेषु विस्तारितः तं तथाविधं
पुत्रं आहुतं आह्वानेन संपादितं देवं तं नशीमहि अत्र निषेधार्थे कश्चिन्नकारोध्याहर्तव्यः नैव नाशयाम इत्यर्थः । अस्मा
भिः प्रमादेन तस्य तंतुत्वस्य तंतुत्वस्य देवेषु प्रचारात्स प्रमादः समाधीयत इत्यर्थः । अत्र तंतुशब्दस्य तात्पर्यं दर्शयति ॥ प्रजा
वै तंतुः प्रजामेवास्मा एतत्संतनोतीति । कुलाचारं दर्शविछेदहेतुत्वात्सुतत्वरूपा प्रजा तंतुशब्देनोच्यते तथा सति तत्पाठेन प्र
जामेव पुत्रादिरूपामस्मै यजमानाय संतनोत्यविच्छिन्नां करोति । तृतीयस्या ऋचः पूर्वार्धमनुवदति ॥ मनो न्वाहुवामहे ना
राशंसेन सोमेनेति ॥ आप्यायिताश्चमसा नराशंसास्तत्संबंधिना सोमेन नु क्षिप्रमेव मनोस्मदीयमाहुवामहे आह्वयामि
अस्या ऋचस्तात्पर्यं दर्शयति ॥ मनसा वै यज्ञस्तायते मनसा क्रियत इति ॥ सर्वो यज्ञो मनसैव तायते विस्तार्यते । मनःपूर्वक
त्वादितरेंद्रियप्रवृत्तेः तस्मिंश्च प्रसारिते यज्ञे योयः कर्तव्यविशेषोस्ति स सर्वोपि मनसा क्रियते तस्मादाह्वाने यागे ज्ञाने वायु
क्तं । अस्य सूक्तस्य प्रथमतः पाठप्रयोजनं दर्शयति ॥ सैव तत्र प्रायश्चित्तिः प्रायश्चित्तिरिति । मा प्रगेमेत्यादिसूक्तस्योक्तिरेव

ब्रा॰ ३
२६

निविदस्तिस्रः महरूपप्रसवायसप्तायपंक्तिस्ति॥ अभ्यासोध्यायसमाप्त्यर्थः॥ ॥इति माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे एकादशाध्याये एकादशः खंडः॥२१॥ ॥अध्यायश्च समाप्तः॥ ॥एकादशेऽथ प्रउगप्रशंसा ततो वषट्कार ममनुस्तुतिं च। ततः तुष्णीं नुमंत्रणं च ततो निवित्तु शेषविशेषमाह॥ अथाहावप्रतिगरादयो वक्तव्यास्तत्र प्रातः सवने होतुराहाववचनमध्वर्योः प्रतिगरं च विधत्ते॥ ॥देवविशः कल्पयितव्या इत्याहुस्तच्छंदसि प्रतिष्ठाप्यमिति शोंसावोमिसाह्वयते प्रातः सवने त्र्यक्षरेण शंसामोदैवोमित्यध्वर्युः प्रतिगृणाति पंचाक्षरेण तदष्टाक्षरं संपद्यते ष्टाक्षरा वै गायत्री मेवं तत्पुरस्तात् प्रातः सवने चीकॢप्तामिति। देवविशो देवानां संवर्धिन्यः प्रजाः सैन्यरूपाः कल्पयितव्याः संपादनीया इति ब्रह्मवादिन आहुः॥ तत्कथं संपादनमिति तदुच्यते एकं छंदोऽस्मिन्छंदसि प्रतिष्ठापनीयं तथा सति देवविशः संपद्यंत इति ब्रह्मवादिनामभिप्रायः। तस्मात्तत्संपादनार्थं होता प्रातः सवने शोंसावोमिति मंत्रेणाध्वर्युमाह्वयते तस्यायमर्थः हे अध्वर्यो शोंसाव शंसनं कुर्वतः वुं मिसनुज्ञार्थं त्वयानुज्ञा देयेत्युक्तं भवति। सोयं त्र्यक्षरो मंत्रः। ततोध्वर्युः शंसामोदैवोमिति पंचाक्षरेण प्रतिगृणाति। मत्युत्तरं ब्रूयात्। तस्यायमर्थः हे होतस्त्वं शंस त्वत्तो मोदवहर्ष एवास्माकं अतोनुज्ञा दत्तेति। तदेतन्मंत्रद्वयं मिलित्वाऽष्टाक्षरं संपद्यते गायत्री चाष्टाक्षरा तेन प्रातः सवने पुरस्तादादौ द्वावपि मिलित्वा गायत्री मेवाचीकॢप्तां

२६

कल्पितत्वात्। शस्त्रादुत्तरकालीनौ द्वाभ्यां पठनीयौ मंत्रौ विधत्ते। उक्थं वाचीत्याह शस्त्वा चतुरक्षरं सोमुक्थशा इत्य
ध्वर्युश्चतुरक्षरं तदष्टाक्षरं संपद्यतेऽष्टाक्षरा वै गायत्री गायत्रीमेवैतदुभयतः प्रातःसवने चीक्लृपतामिति॥ ॥ होताशं
शंसावोमिति पठित्वोक्थं वाचीति चतुरक्षरं मंत्रं ब्रूयाद्यावाचुक्थं शस्त्रं संपन्नमिति तस्यार्थः। ततोऽध्वर्युरोमुक्थशा इति।
चतुरक्षरं मंत्रं ब्रूयात्। ॐमित्यंगीकारः उक्थशास्त्वं शस्त्रशंसी भवसीत्यर्थः। तदेतन्मंत्रद्वयं मिलित्वाऽष्टाक्षरं संपद्य
तेउभयतः शासनात्पुरस्तात्पश्चाच्च शेषं पूर्ववत्। माध्यंदिनसवने तद्वत्मंत्रचतुष्टयं विधत्ते॥ अध्वर्यो शंसावोमित्याह्वय
ते मध्यंदिने पञ्चाक्षरेण शंसामोदैवोमित्यध्वर्युः प्रतिगृणाति पंचाक्षरेण तदेकादशाक्षरं संपद्यत एकादशाक्षरा वै त्रि
ष्टुभमेवैतत्पुरस्तान्मध्यंदिने चीक्लृपतामुक्थं वाचीन्द्रायेत्याह शस्त्वा सप्ताक्षरमोमुक्थशा इत्यध्वर्युश्चतुरक्षरं तदेका
दशाक्षरं संपद्यत एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभमेवैतदुभयतो मध्यंदिने चीक्लृपतामिति। पूर्ववद्व्याख्येयं। तृतीयस
वने मंत्रचतुष्टयं विधत्ते। अध्वर्यो शोंसो सावोमित्याह्वयते तृतीयसवने षडक्षरेण शंसामोदैवोमित्यध्वर्युः प्रतिगृ
णाति पंचाक्षरेण तत् द्वादशाक्षरं संपद्यते द्वादशाक्षरा वै जगती जगतीमेवैतत्पुरस्तात्तृतीयसवने चीक्लृपतामु
क्थं वाचीन्द्राय देवेभ्य इत्याह शस्त्वैकादशाक्षरमोमित्यध्वर्युरेकाक्षरं तत् द्वादशाक्षरं संपद्यते द्वादशाक्षरा वै जग

ब्रा॰३

तीमेवतदुभयतस्तृतीयसवनेचैतत्कृप्ता भिन्ति॥ षोडशी मिति द्विर्भावश्छंदसः॥माध्यंदिनस्यवचनेकेवलमिद्राथामेववा

च्यत्वं संपन्नमिसकं पन्नमिसः॥ अत्र त्विंद्रार्थमितरदेवा धंचेतिविशेषः॥अन्यत्सर्वं पूर्ववद्व्याख्येयं॥उक्तेमर्थे मंत्र

२१

संवादेनद्रढयन्ति॥तदेतदृष्टिः पश्यन्नभ्यनूवाचेति॥तदेह ब्राह्मणोक्तंसर्वमृषिर्मंत्रद्रष्टादिव्यज्ञानेनपश्यन्मंत्र॥

केनाभितोनुवचनंकृतवान्॥तमोतंमंत्रंदर्शयति॥यदुयत्रे अधिगायत्रमाहितंत्रैष्टुभनिरतक्षत॥ यद्वाजगद्ज

गत्याहितंतत्पदंयइद्विदुस्तेअमृतत्वमानशुरिति॥वशंसनात्पूर्वकालीनेमंत्रद्वयात्मकेगायत्रेछंदसितदुत्तर

रकालीनंमंत्ररूपात्मकंगायत्रंछंदः अध्याहितंसंपादितमितियदस्ति अथचपूर्वकालीनान्मंत्रद्वयात्मकात्त्रैष्टुभा॥

दुत्तरकालीनमंत्रद्वयात्मकंत्रैष्टुभंनिरतक्षतनिष्पन्नमितियदस्ति अथजगतजागतंछंदः पूर्वकालीनंजगत्यिउत्त

कालीनेजागतेछंदसिआहितंसंपादितं इत्येतत्त्रिविधपदंयदस्ति॰ तसदं यइत्तपंएवानुष्ठातारोविदुर्जानंतितेतु

ष्ठातारो ऽमृतत्वमानशुः देवत्वंप्राप्नुवंतः॥अस्यमंत्रस्यतात्पर्यंदर्शयति॥एतैर्हैतछंदोभिर्छंदसिप्रतिष्ठापयतीति॥तत्रा २७

श्रितमिसेवंप्रतिपादयति॥उक्तार्थवेदनंप्रशंसति॥कल्पयतिदेवविशोयएवंवेदेति॥वेदितादेवविशोदेवसं

बंधिनीः प्रजाः सैमरूपाः संपादयति॥ ॥इतिद्वादशाध्याये प्रथमःखंडः॥ ॥अथानुष्टुभोमुखतेनप्रशंसति

त्तुमाख्यायिकमाह। प्रजापतिर्वै यज्ञं छंदांसि देवेभ्यो भागधेयानि व्यभजत्स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवनेऽभजत्त्रि
ष्टुभमिंद्राय रुद्रेभ्यो मध्यंदिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवन इति ॥ पुरा प्रजापतिः सर्वं जगत्स्रष्टा सवन
त्रयात्मकं यज्ञं गायत्र्यादिछंदांसि च देवतार्थं भागधेयानि भागविशेषरूपाणि नूत्नान्यभजत विभक्तवान्। केन प्रका
रेणेति। स उच्यते यज्ञे यस्मात्प्रातःसवनमस्ति तस्मिन्गायत्रीमेवाग्नयेऽष्टवसुदेवार्थं च विभक्तवान् माध्यंदिनसवने त्रिष्टु
भमिंद्रार्थमेकादशरुद्रार्थं च विभक्तवान्। तृतीयसवने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यश्च विभक्तवान्। एवं सत्यनुष्ट
बेकापरिशिष्टा तस्या वृत्तांतमाह ॥ अथास्य यत्स्वं छंद आसीदनुष्टुप्तामुदंतमभ्युदौहदच्छावाकीयामभि सेनमब्रवीदनु
ष्टुप्त्वं न्वेव देवानां पापिष्ठासि यस्या मेऽह स्वं छंदोऽसि यां मोदंतमभ्युदौहीरच्छावाकीयामभीति तदजानात्स स्वं सोममाह
रत्स स्वे सोमेऽग्रं मुखमभिपर्याहरदनुष्टुभे तस्मादनुष्टुबग्र्या मुख्या युज्यते सर्वेषां सवनानामिति ॥ अथास्यादि।
नां व स्वादि। नां च छंदोविभागानंतरं अस्य प्रजापतेः स्वभूतमनुष्टुबाख्यं यत्छंद आसीत् तामनुष्टुभं उदंतमभियज्ञस्य
कंचित्प्रांतदेशमभिलक्ष्य उदौहत् व्यसारितवान्। कुत्र देश इति तदुच्यते अच्छावाकीयामभीति। अच्छावाकवदस्वेस
वमध्वर्युणा क्रोऽच्छावाकीयां ब्रूते सेयमगच्छावाकीयात्तामभिलक्ष्योहदवान्। अनुष्टुभमच्छावाकीयां कृतवाको यांह्

ब्रा० ३
२८

तथा निसर्थः ।। तेनकुपितासानुष्टुबेवैनंप्रजापतिमब्रवीत्त्वंहेप्रजापते देवानां मध्ये त्वमेव पापिष्ठोसि । यस्य पापिष्ठस्य प्र
जापतेस्त्वाहं छंदोस्मि । अग्निवस्वादयः पूर्वं छंदोरहिताः तदपेक्षयापि छंदोसि दत्तवानसि स्वहं तु पूर्वमेव त्वदीयानांदृ
ष्टीमां त्वतो ऽपसार्य छावाकीयामभिलक्ष्योहृतवानसि अतो मदपेक्षयाभवतः पापिष्ठत्वमित्यनुष्टुभोभिप्रायः ।। तत्सर्व
मनुष्टुभोप्रोक्तमुपालंभरूपंप्रजापतिर्ज्ञातवान् ज्ञात्वा च तदुपालंभपरिहारार्थं स्वकीयं सोमयागमाहरत् सतु तस्मि
न्सोमयागेग्रियं श्रेष्ठं प्रारंभरूपं यत्सुखमस्ति तदभिलक्ष्यानुष्टुभं पर्योहरत् तत्रनीतवानित्यर्थः ।। तस्मादुतस्मादेव का
रणादियमनुष्टुवग्नामग्रे प्रयुज्यते सतीसर्वेषांसवनानांमुख्यामुखभवा प्रारंभकालीना प्रयुज्यते । एतद्वेदनं प्रशंसति । अ
ग्निर्यो मुख्यो भवति श्रेष्ठतामश्नुते य एवं वेद इति । वेदिता स्वकीये यज्ञातीनां मध्ये अग्रे भवोग्रः श्रेष्ठः मुख्यो व्यवहार
निर्वाहकः सन्श्रेष्ठतां विद्याकृत्या द्विगुणैः श्रेष्ठत्वं प्राप्नोति । प्रजापतिन्यायेन यजमानस्यापि सवनीययागाद्दावनुष्टुप्प्र
योगं दर्शयति । स्वैवे सतत्स प्रजापतिः स्वकल्पक एव सोमयागेन तत्सवनेषु अनुष्टुभो मुख्यतामकल्पयत् तस्मादिहैनीमपि या
गयज्ञो यजमानवशो भवति स यज्ञोपि कल्पत एव अवैकल्येनानुष्टानामीस भिघसानुष्टुभः सतामादौ प्रयोगे सति
यज्ञस्य यजमानवशत्वं तत्र यज्ञो वैकल्परहितो भवतीत्यर्थः ।। उक्तवाक्यार्थमेव वाक्यांतरेण स्पष्टीकरोति ।। ।। तस्मै

रा
२८

जननायैकल्पते यत्रैवं विद्वान्यजमानो वशी यजनरति। यत्र यस्यां जनसभायामेवमनुष्टुभो महिमानं विद्वान्यजमानः व
शी स्ववशो भवत्यात्तस्मिन्ननुष्टुभः प्रयोगे सावधानो भूत्वा यज[illegible]नेन तस्ये जननायै तस्यां जनसभायां कल्पते यज्ञः प्रयोज
नसमर्थो भवति॥ ॥इति द्वादशाध्याये द्वितीयः खंडः॥ ॥पुनरपि प्रकारांतरेणानुष्टुभो महिमानं दर्शयितुमाख्यायिका
माह॥ अग्निर्वै देवानां होतासीत्तं मृत्युर्बहिष्पवमाने सीदत्सोनुष्टुभा प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्तमाज्ये सादृत्स
प्रउगेण प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामदिति॥ पुराकदाचिद्देवानां यागे अग्निरेव होतारं मृत्युरसीदत्तं हंतुं प्राप्तवा
न्। कस्मिन्काल इति तदुच्यते। बहिष्पवमानाख्ये स्तोत्रे प्रातःसवनसंबंधिनि उपास्मै गायता नर इत्याद्यृक्त्रयेण
न सामगैः स्तूयमाने सति सोयमग्निर्मृत्युप्राप्तिकालः तदानीमग्निर्मृत्युं परिहर्तुं अनुष्टुप्छंदस्कया प्रवोदेवायाय
य इत्येतयर्चाज्यशस्त्रं प्रारब्धवान्। तेनानुष्टुप्प्रयोगेण सोग्निस्तदानीमेव मृत्युं पर्यक्रामदतिक्रांतवान्। ततो
ऽग्निना होत्राज्यशस्त्रे शस्यमाने सति तमग्निं मृत्युरसीदत्प्राप्तवान् तदा सोग्निर्मृत्युं परिहर्तुं वायवायाहीत्यादिके
न सप्तर्चात्मकेन प्रउगशस्त्रेणानुष्टुभा प्रत्यपद्यत प्रारब्धवान् तेन प्रउगप्रयोगेण तदानीमेव मृत्युमतिक्रांतवा
न्। इत्थं प्रातःसवनेनुष्टुभं मृत्युपरिहारहेतुत्वेन प्रशस्य माध्यंदिनसवनेपि तथा प्रशंसति॥ ॥तं माध्यंदिने पवमाने सी

ब्रा०३

दृत्सोनुष्टुभामरुत्वतीयंप्रतिपद्यतमत्युमेवत्तत्सर्यक्रामतंमाध्यंदिनेबृहतीपुनाशक्नोत्सत्तुंप्राणावैबृहतः प्राणानेवतन्ना
शक्नोद्यवैतुंतस्मान्मध्यंदिनेहोताबृहतीषुस्तोत्रियेणैव प्रतिपद्यतेप्राणा वैबृहत्यः प्राणानेवतदभिप्रतिपद्यतइति।

१९

प्रातः सवनान्निराकृतोमत्युरुच्यते जानमेधसइत्यादिके माध्यंदिनपवमानस्तोत्रेगीयमाने सतितस्मिन्कालेत
मग्निंहोतारंअसीदत्प्राप्तवान्तदानीसोग्निर्होतामृत्युपरिहारायअनुष्टुप्छंदसया आत्मानंरथमित्येतय।
र्चामरुत्वतीयशस्त्रंप्रारब्धवान्। तेनानुष्टुप्प्रयोगेनैणतदानीमेवमृत्युमतिक्रांतवान्माध्यंदिनपवमाना
न्निराकृतोमृत्युर्माध्यंदिनसवनसंबंधिनमरुत्वतीयशस्त्रेशस्यमानेसतितस्मिन्तारग्निंहोतारंप्राप्स्यामीति
विचार्यतत्रबृहतीछंदस्कास्वृक्षुगीयमानासुतमग्निंसत्तुमाप्तुंभाशक्नोत्तत्रहेतुरुच्यते। बृहतीछंदस्का
ऋचः प्राणस्वरूपाएव। ततेनकारणेनप्राणानेवमृत्वैतंतुवियोजयितुंमृत्युर्नाशक्नोत्। प्राणाभिमानिनीभिः
बृहतीभिः प्राणानांरक्षितत्वात्तबृहस्य अमरुत्वतीयशास्त्रानंतरभाविनिनिष्केवल्यशस्त्रंवहचोविधत्तेता।
अस्सर्वस्मिन्नेवमाध्यंदिनेसवनेमृत्युप्रवेशंनिवारयंति। यस्माद्बृवद्बृहसोमृत्युप्रवेशंनिवारयितुसमर्थः।

१९

तस्मान्माध्यंदिनप्रयोगेहोताबृहतीछंदस्कास्वृक्षुस्तोत्रियेणैवत्रचेनशस्त्रंप्रारभेत। यस्मिंस्तृचेसामगैः स्तोत्रं

गी तंसोयंतत्त्वस्तो त्रियः तेनतत्त्वेनप्रारंभंसतितत्रसानांबृहती नांप्राणरूपत्वात् प्राणानेवाभिलक्ष्यशस्त्रप्रारंभंकृतवान्भवति
। अथतत्तीयसवनेमरुत्सुपरिहारेणानुष्टुभंप्रशंसति ॥ तंतत्तीयपवमानेसीदत्सोनुष्टुभावैश्वदेवंप्रसपद्यतमत्सुमेवतस्य
ये क्रामतंयज्ञायज्ञीयेसीदत्सवैश्वानरीयेणाग्निमारुतंप्रसपद्यतमसभवतसर्वेक्रामहद्त्रोवैश्वानरीयंप्रतिष्ठायज्ञायज्ञी
यंकैवज्रेणैवतत्प्रतिष्ठायामत्सुंनुदतेसर्वान्पाशान्सर्वास्थाणून्मसोरतिमुच्यस्वस्सेवोदमुच्यतस्वस्सेबहातान्मुच्यतेसर्वा
युः सर्वायुतायति ॥ त्रिषुपवमानेषुबहिष्पवमानः प्रथमः माध्यंदिनपवमानोद्वितीयः आर्भवपवमानस्तृतीयः माध्यंदिन
सवनेप्रवेष्टुमशक्तोमत्सुः स्वादिष्ठयसेसेतस्मिन्नार्भवाख्येतृतीयपवमानस्तोत्रेनन्तीयसवनगतेसामगेगीयमानेसतितमग्नि
होतारंमत्सुरसीदत्। सोयमग्निस्त्वंवारयितुमनुष्टुभंछंदस्कयातत्सवितुर्वृणीमहइत्येतत्पञ्चर्चावैश्वदेवाख्यंप्रारभततेनानुष्टुप्प्रयो
गेणतदानीमेवमत्सुमतिक्रांतवान्इसनुष्टुभंसवनत्रयेप्रशस्ता। अथयज्ञायज्ञीयाख्यंसामवैश्वानरीयसूक्तंचप्रशंसति। तमि
सादि। यज्ञायज्ञावोअग्नयइत्यस्यामृच्युत्पन्नंसामयज्ञायज्ञीयंतत्सीमं ध्यतत्रामके स्तोत्रेसामगेगीयमानेसतीयपवमानाग्नि
शरूत्तोमत्सुस्तमग्निंहोतारंप्राप्तवान्। ततोग्निर्होतामत्सुपरिहारायवैश्वानरायपृथुपाजसेविपइत्यादिनावैश्वानरीयेण
सूक्तेनमरुत्वतीयशस्त्रप्रारंभंकृतवान्। तेनसूक्तप्रयोगेणतदानीमेवमत्सुमतिक्रांतवान्। तत्रवैश्वानरीयंसूक्तंवज्रस्वरू

सा

४९

श्री·३
२०

पंचज्ञायज्ञीयस्तोत्रंतुप्रतिष्ठासमाप्तेर्हेतुः।तस्मात्सूक्तरूपेणावज्ञेणैवप्रतिष्ठायाययज्ञसमाप्तेर्मत्सुमग्निर्निराकुरुतेसत्तादृशो
ग्निःसर्वान्माशान्मत्सुसंबंधिबंधनरज्जुरूपान्तत्तथामत्सोःसंबंधिनःसर्वान्स्थाणून्काष्ठोपलक्षितगदाद्यायुधानिमत्सोः
सकाशादतिमुच्यनिवार्यत्वास्पेवक्षेमेणैवस्वयंमत्सुसकाशादुन्मुक्तोभूत्।अग्निवन्मानुषोपिहोतानेनैवप्रकारेणानुति
ष्ठन्सर्वेणायुषायुक्तःक्षेमेणैवमत्सोरुन्मुच्यते।अत्रसर्वत्रयोयापूर्वोर्थस्तत्वाद्वादेवविधिरुन्नेयः।सोयंहोत्रप्रयोगोयजमा
नस्यसर्वायुत्वायसंपद्यतेवेदनंप्रशंसति॥सर्वमायुरेतियएवंवेदेति॥ ॥इतिद्वादशाध्यायेतृतीयःखंडः॥ ॥अथमरुत्व
तीयशस्त्रमारभ्यते।तत्रायंसंग्रहश्लोकः॥प्रतिपदनुचराववनुप्रगाथोहरिनिहवोधवहस्तिर्ध्रुवश्च।ध्रुवविधिविहितास्त
थायथाप्याविततनंमत्रमरुत्वतीयसूक्ते॥तत्रात्वारथमितिमरुत्वतीयस्यप्रतिपदनुष्टुप्तांप्रशंसितुमाह॥इंद्रोवैवृत्रंह
त्वानास्तृषीतिमन्यमानःपराःपरावतोगच्छत्सपरमामेवपरावतमगच्छदनुष्टुब्वैपरमापरावद्वाग्वाअनुष्टुप्सवाचंप्रविश्य
रायतसर्वाणिभूतानिविभज्यान्वैच्छंस्तंपूर्वेद्युःपितरोविदन्नुत्तरमहर्देवास्तस्मात्पूर्वेद्युःपितृभ्यःक्रियतउत्तरमहर्देवास्
जंतइति।इंद्रःपुरावृत्रनामकंदैत्यंहत्वानास्तृषिअहंनहिंसितवानस्मीतिमन्यमानस्तद्दोषभीतोवनमाश्रयत्तस्माद्भीतःपरा
वतःअभ्यधिकाहरभूमीरगच्छत्सो[illegible]यंतावतायसंतुष्टःपरमामेवाभ्यधिकामेवपरावतंदूरभूमिंपुनरप्यगच्छत्।अपिचा

२०

भ्योहरत्यग्निभ्योप्यसंतमधिकारं हरत्यग्निः केतिचेत्स उच्यते । अनुष्टुब्वै परमा परावत्स्वप्यधिकाहरत्यग्निः तस्मादनुष्टुभि प्रविष्टस्य
य इत्युपादातुमशक्यत्वात् । अनुष्टुब्वाक्स्वरूपा ततः स इंद्रो वाचं प्रविश्य तत्र त्राणं कृतवान् । तमिंद्रं सर्वाणि भूतानि सर्वेषु देवेषु विभ
ज्यान्वैच्छन्न लभंते षु मेक एकस्मिन्देशेगतः अन्यो देशांतरमित्येतादृशो विभाग इत्यर्थः । तमन्विष्यमाणमिंद्रं पितरो यागंतिभागस्त्वे
द्युरविंदन्न लभंत देवास्तु उत्तरमहः उत्तरस्मिन्नहन्यविंदन् । यस्मादेवं तस्माल्लोकेपि पूर्वेद्युरमावास्यायां पितृभ्यः क्रियते उ
त्तरमहरुत्तरस्मिन्नहनि प्रतिपद्दिने दर्शपू[र्ण]मासयागदिने देवान्यजंते इंद्रस्य रक्षकत्वात्प्रशस्तानुष्टुबिति तात्पर्यार्थः । अथ
मरुत्वतीयशस्त्रस्य प्रतिपत्तृचं दर्शयति ॥ तेब्रुवन्नभिषुणवामैव तथा वावन इति । आ शिष्टमागमिष्यतीति तथेति तेभ्यषुण्वंस्त ।
आत्वा रथं यथोतय इत्येवैनमावर्त्तयन्निदं वसो सुतमंध इत्येवैभ्यः सुतकीर्त्यामाविरभवदिंद्रो नेदीय एदिहीत्येवैनं मध्यं प्रापाद
यंतेति ॥ इदं लब्ध्वा वस्थितास्ते देवाः परस्परमिदमब्रुवन् अभिषुणवामैव वयं सर्वथा सोमस्याभिषवं करवाम तथा वावर्त्तनेन वय
कारणाच्छिष्टं आप्तुमर्हति शीघ्रं यथा नोस्मानिंद्र आगमिष्यतीति तद्वचनमंगीकृत्य ते सर्वेप्यभ्यषुण्वन् अभिषवं कृतवंतस्तादृशा
स्ते देवा आत्वा रथं यथोतय इत्येतेनैव मंत्रेणेतमिंद्रमनुष्टुभः सकाशादभिषवदेशं प्रत्यावर्त्तयन् । अत्र किंचिदावृत्तिवाचकमा
वर्त्तयामसीति तद्रूपं श्रूयते तस्मात्सामर्थ्यादिंद्रस्यावृत्तिरभूत् । इदं वसो सुतमंध इत्यस्मिन्मंत्रपादे सुतकीर्त्या अभिषववाचिनासु

ब्रा०३
२१

तशब्देनैवमोदेवेभ्यइन्द्र आविरभवात्। प्रकृतो मन्त्रइंद्र नेदीयएदिहीति मंत्रगतेन समीपागमनवाचिना देनेदीयइहीति
यदक्षरेणेनेन मिंद्रया गदेशमध्यापितवंतः॥ अनेनार्थवादेन तत्तन्मंत्रविधिरुन्नेयः। एतदेवाभिप्रेत्याश्वलायन आह। मरु
त्वतीयशस्त्रं शंसेद्दध्यर्योशोंसावोमिति माध्यंदिने शस्त्रादिष्वाहाव आह्वारथ्यं यथोतयइदंवसोसुतमंधइति मरुत्वती
यस्य प्रतिपदनुचरा विंद्र नेदीयएदिहीतीद्र निहवः प्रगाथइति। येन तृचेन शस्त्रं प्रारभते सोयं तृचः प्रतिपदुच्यते तदनं
तरभावी तृचोनुचरः। अत्र आह्वारथमिदंवसो इसेतौ तृचौ प्रतिपदनुचरौ द्रष्टव्यौ तत ऊर्ध्वमिंद्र नेदीयइति प्रगाथस्तृच
यात्मको द्रष्टव्य इत्यर्थः। वेदनं प्रशंसति॥ आगतेंद्रेणयज्ञेनयजते सेंद्रेणयज्ञेनराध्नोतियएवंवेदेति। आगतइंद्रोयस्मिन्
ज्ञेसोयमागतेंद्रः वेदितानां ईदृशेनयज्ञेनयजनेतत्थेंद्रसहितेनयज्ञेनसमृद्धोभवति॥ ॥इतिद्वादशाध्याये चतुर्थः खंडः
॥ ॥ पूर्वोक्तमिंद्र नेदीयइत्यादिकं प्रगाथं शंसितुमाख्यायिकामाह॥ इंद्रो वै वृत्रं जघ्निवांसं नास्तृतेति मन्यमानाः सर्वा देव
ता अजहुस्तं मरुत एव स्वापयो नाजहुः प्राणा वै मरुतः स्वापयः प्राणा हैवैनं तन्नाजहुस्तस्मादेषोच्युतः स्वापिमान् प्रगाथः
शस्यत आ स्वापि स्वापिभिरिति॥ इति॥ इंद्रोयदा वृत्रं हतवान् तदानीमिंद्रं सर्वा देवता अजहुः परित्यक्तवत्यः। कीदृश्यो देवताः।
नास्तृतेति निरसिं सितवानिंद्र इतिमन्यमानाः। वृत्रस्यातिप्रौढशरीरत्वात्प्रहारमात्रेण सोनमृत इति देवानां भ्रांतिः।

२

इतरदेवताभिः परिसक्तंतमिंद्रं मरुतएवनाजहुः नपरिसक्तवंतः तद्विशेषणं स्वापयइति। सुषुप्तिकालेपिवर्त्तमाना इत्यर्थः
स्वापिशब्दार्थः स्कसैवप्रदर्श्यते। प्राणावैदेहमध्येवर्त्तमानाः प्राणाएवस्वापयोमरुतः स्वापकालानुवर्तिनोवयवः। प्रा
णानांतत्कालानुवृत्तिमाथर्वणिकाः प्रश्नोत्तराभ्यामामनंति। भगवन्नेतस्मिन्पुरुषेकानिस्वपंतिकान्यस्मिन्जाग्रतीतिप्र
श्नः। प्राणाग्नयएवैतस्मिन्पुरेजाग्रतीत्युत्तरं। एवंविधायस्मात्प्राणरूपामरुतएवेनमिंद्रंतदानीनपरिसक्तवंतस्त
स्मात्कारणादयमिंद्रोनेदीयइत्यादिकः स्वापिमान्प्रगाथोमुनामरुत्वतीयशस्त्रेसर्वेस्योप्यपरिसक्तःशस्यते। स्वा
पिशब्दोयस्मिन्प्रगाथेस्तिसोयंस्वापिमान्। आस्वापेस्वापिभिरितियंपादस्तस्मिन्प्रगाथआम्नायतेतस्मादयंस्वापिमा
न्। इत्थमिंद्रनिहवाख्यंप्रगाथंप्रशस्यपुनरपिप्रकारांतरेणतमेवप्रशंसति॥ अपिहवैद्रमेवातत्ऊर्ध्वंछंदःशस्यतेन
हसर्वेमरुत्वतीयंभवत्येषचेदमुनःस्वापिमान्प्रशंसति॥ आगाथःशस्यतेअस्वायेस्वापिभिरितिअपिहत्र्यपिचअतःएत
त्प्रगाथशंसनादूर्ध्वंअस्मिन्मरुत्वतीयशस्त्रेयद्यद्वैद्रमेवछंदःशब्दोपलक्षितोमंत्रराशिस्तेनतद्सर्वंतदपिमंत्रजातंमरुत्वती
शस्त्रंभवति। एषचेदित्यादिनातत्रयुक्तिरुच्यते। आस्वापेस्वापिभिरितिपादोयतस्तेनस्वापिमानेषप्रगाथोमुतश्चदपरि
सक्तश्चेन्तदामरुत्वतीयंभवतिस्वापिशब्दवाच्यानांमरुतांप्रतिपादकत्वादित्यर्थः। सोयंप्रगाथःशास्त्रांतरेदृष्टव्यः॥

ब्रा०३

२२

॥ ॥ इति द्वादशाध्याये पंचमः खंडः ॥ ॥ अथास्मिन्मरुत्वतीयशस्त्रीमनूनां ब्रह्मणस्पतिरित्यादिकं प्रगाथं विधत्ते
॥ ब्राह्मणस्पत्यं प्रगाथं शंसतीति ॥ द्वयोर्ऋचोः समूहः प्रगाथः तथाचाश्वलायन आह । तृचाः प्रतिपदनुचरा द्व्यृचाः प्रगा-
था इति । ऋग्द्वयमेवानुष्ठानकाले तृचरूपेण प्रग्रथ्यते तस्मादयं प्रगाथ इत्युच्यते । विहितं ब्राह्मणस्पत्यं प्रशंसति । बृह-
स्पतिपुरोहिता वै देवा अजयन् स्वर्गं लोकं व्यस्मिंल्लोके जयंत तथैवैतद्यजमानो बृहस्पतिपुरोहित एव जयति स्वर्गं
लोकं व्यस्मिंल्लोके जयत इति । योयं प्रगाथो ब्राह्मणस्पतिराम्नातः सोयं बृहस्पतिः तस्य ब्राह्मणजातिस्वामित्वात् ।
सच बृहस्पतिः पुरोहितो येषां देवानां ते बृहस्पतिपुरोहिताः । तथाच ष्कसंतरे समाम्नातं । बृहस्पतिर्देवानां पुरोहित आ-
सीदिति पौरोहित्यसिद्ध्यर्थमेव चतुर्विंशतिरात्रनामकं सत्रमन्वतिष्ठत् । तदपि ष्कसंतर एवाम्नातं । बृहस्पतिरकामय-
त मा देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्विंशतिरात्रमपश्यदिति । तादृशाद्बृहस्पतिपुरोहिता देवा अनेन प्रगा-
थेन स्वर्गं लोकं जित्वाऽस्मिंल्लोकेऽपि विजयं प्राप्ताः तथैवतत्सम्ठेनेत्संनीतेनापि यजमानोपि यजमानो बृहस्पतिपुरस्कृत ए-
व बृहस्पतिनुग्रहयुक्त एव सन् लोकेपि विजयं प्राप्ताः तथैवतत्साठनेराजीतनापि यजमानोपि यजमानो बृहस्पतिपुरोहित
एव बृहस्पत्यनुग्रहयुक्त एव सन् लोकद्वयं जयति । यत्र किंचिद्ब्राह्मणमुज्जावयति । नैवाएनौ प्रणथावस्तुनौ संतौ पुनरादाय

२२

प्रस्तेता इतीति। समाम्नाते द्वे एव ऋचौ प्रग्रथने न तृचरूपतया संपाद्येते। प्रग्रथनप्रकार उच्यते। प्रनत्तमिसेषा बृहती छंद

स्का द्वादशाक्षरेण तृतीयपादेनाष्टाक्षरैश्चान्यैः पुनरुक्तया षट्त्रिंशदक्षरं संपद्यते। सेयमक्षरवृद्धिः संपादनीया। पुनरपि तत्र समष्टा

क्षरं चतुर्थपादं द्विराम्नाय षोडशाक्षरोर्द्धर्चः संपादनीयः। इतरस्यामृचि प्रथमपादो द्वादशाक्षरः द्वितीयपादोऽष्टाक्षरः एत

त्सर्वं मिलित्वा द्वितीया बृहती संपद्यते। तत्र समं तिममष्टाक्षरपादं द्विरभ्यस्य समाम्नातउत्तरार्द्धं द्वादशाक्षरं प्रथमपादं।

अष्टाक्षरमुत्तरपादं च पठित्वा तृतीया बृहती संपादनीया। अयमेव प्रग्रथनप्रकार इंद्रनेदीय एद्दिही सत्रापि प्रगाथे योज

नीयः। तावतो प्रगाथो पुनरादायं पुनः पुनः पवित्रमेव पादमादायादाय शस्येत। सामगे माध्यंदिनपवमाने प्रगाथा येगा

तावस्तावतोस्तैरस्तुतयोर्हौत्राशंसनमयुक्तं। नवत्र क्वचिदपि सामगैरस्तुतं मंत्रजातं पुनः पुनरादाय शस्यमानं दृष्टं। एवं सति

कस्मात्कारणादस्तुतयोरन्त्रशंसनमिति चोद्यवादिनस्त्राकुः एतच्चोद्यमनास्थाप्य परिहारमनुक्त्वैव चोद्यं तरसुज्ञापयति

॥ पवमाने स्वं छंदो वाए तद्वन्मरुत्वतीयं बहुस्तुवास्त्र गायत्रीषु स्तुवंते षट्सु बृहतीषु तिसृषु त्रिष्टुप्सु स सवा एष त्रिच्छंदाः पंचद

शो माध्यंदिनः पावमानस्तदा[illegible]कुः कथं तत एष त्रिच्छंदाः पंचदशो माध्यंदिनः पवमानोऽनुशस्तो भवतीतीति। मरुत्वतीयश

स्त्रं यदस्मिन्दिने सवमानो स्तं माध्यंदिनपवमानसंबंधिशस्त्रं अत्र माध्यंदिन एव पवमानस्तोत्रे तद्वाते जातमिसादिषु षट्सु

ब्रा०३

२३

गायत्रीषु प्रथमं संस्तुवते । ततः पुमानः सोमेसादिषु षट्सु बृहतीषु स्तुवते । यद्यपि द्व्यात्मकः प्रगाथस्तथापि पूर्वोक्तन्यायेन प्रथमं तिस्रो बृहत्यः संपादनीयाः । तासु चैरोरवसाम प्रागुक्तलयं तत उपरि यौधाजयसाम गातव्यं एवं सति तिस्रो बृहत्यः साम द्वयार्थे द्विरावर्त्यमानाः षट् संपद्यंते । तथा प्रतुस्वेत्यादिषु तिसृषु त्रिष्टुप्सु स्तुवते एवं सति स एष माध्यंदिनपवमानस्त्रिछंदा भवति । गायत्री बृहती त्रिष्टुप् चेत्येतत्त्रयाणां छंदसां सद्भावात् । तथा स पवमानः संचदशस्तोमोपेतः । तस्य च स्तोमस्य प्रकारः छंदोगब्राह्मण एवमाम्नायते । पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया । पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिरिति । अस्यायमर्थः । तृचात्मकमेकं सूक्तं त्रिरावर्तनीयं । तत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासो विधेयः । द्वितीयावृत्तौ मध्यमायाः । तृतीयावृत्तावुत्तमायाः । एवं प्रतिसाम सामावृत्तिभिः पंचदशभिः ऋग्भिरनुष्ठितो यः संचदशस्तोमः स माध्यंदिनः पवमानः । एवं माध्यंदिनआर्भवः ऊहे द्रष्टव्यः । हे इंद्र तस्ते एषयथोक्तलक्षणः पवमानः कथं मरुत्वतीयशस्त्रो भवति । अनुशंसनं चन्याय्यं । यथावावस्तोत्रमेवं शस्त्रमिति न्यायात् । अतो तत्र स्तोत्रशस्त्रयोर्वैलक्षण्यमयुक्तमिति चोद्यतरं । तत्र द्वितीयस्य चोद्यस्य तावदुत्तरं दर्शयति ॥ ये एव गायत्र्याउत्तरे प्रतिपदो या गायत्र्यो नुचरस्ताभिरेवास्य गायत्र्यानुष्टुप् शस्त्रा भवंत्येताभ्यामेवास्य प्रगाथाभ्यां बृहत्सानुशस्ता भवतीति । आत्वा रथं यथोतय इत्यस्मिन्मरुत्वतीय

एकपा

२३

एतस्य सप्तत्रिपदरूपेणर्चे प्रथमा ऋगानुष्टुभ्येव एवोत्तरे प्रतिपदः प्रतिपद्रूपे द्वे ऋचौ गायत्र्यौ विहितेयमस्मान्स इदं वसो सुतमंध
इति अनुचराख्यस्तृचो गायत्रायत्रः एताभिरेवपंचभिर्गायत्रीभिरस्यहोतुः पवमानस्तोत्रगता गायत्र्यो अनुशस्ता भ
वंति। इंद्रनेदीय इति यायमिंद्र निहवः प्रगाथः पश्चभन्नं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रगाथः एताभ्यां पवमान
स्तोत्रगतो बृहत्सोनुशस्ता भवति। प्रग्रथनेन बृहतीसंपादनस्योभयत्र समानत्वात्। यत्तु त्रिष्टुभामनुशंसनं तदुपरिष्टाद
भिधास्यते। अथ प्रसंगात्प्रथमर्चो द्वयस्यापि परिहारं दर्शयन् पुनः पुनरादानस्यानुशंसनं दर्शयति। नासु वा एतासु ब
हतीषु सामगारौरवयौधजयाभ्यां पुनरादायं स्तुवंति तस्मादत्रोत्रप्रगाथा वस्तुतौ संतौ पुनरादायं शस्येनेन छस्त्रेण स्तोत्र
मन्वैतीति। पुनानः सोमं तस्मिन्प्रगाथे या बृहत्सः प्रग्रथनेन संपादिता सा स्वेवैतासु बृहतीषु रौरवा रव्येन यौधाज
यारव्येन च साम्ना पुनः पुनः पठितमेव पादमादाय स्तुवंति तस्मादत्रादेतावषिंद्र निहव ब्राह्मणस्पत्यप्रगाथौ सामगैरस्तुतौ
वपि संतौ होत्रा पुनः पुनः पठितमेव पादमादाय शस्येते नतथा च सत्ययं होता स्वकायेन शस्त्रेण स्तोत्रमनुगच्छति। इदानीं
त्रिष्टुभामनुशंसनं दर्शयति। ये एव त्रिष्टुभौ धाय्ये यत्रैष्टुभं निविद्धानं ताभिरेवास्य त्रिष्टुभो अनुशस्ता भवंतीति। यथा सा
मिधेनीषु प्रक्षिप्यमाणानामृचां धाय्येति संज्ञा एवमत्रापि। तथा सत्यग्निर्नेता भगस्त्वं क्षितीनामिसेका धाय्या तत्र साम

23

ब्रा०३
२४

ऋतुभिरित्यपरायेएव त्रिष्टुप्छंदस्कं जनिष्ठाउग्रइत्यादिकं निविद्धानं सूक्तं निविदांपदानिधायंतप्रक्षिप्यंतेयस्मिन्सू
क्ते तन्निविद्धानं ताभिरेवसूक्तगताभिर्द्धाय्यासहिताभिस्त्रिष्टुब्भिरस्यहोतुस्तोत्रगतास्त्रिष्टुभोनुशस्ताभवंति। उक्ता
स थेवेदनंप्रशंसति। एवमुहास्यैषत्रिष्टुच्छंदाः पंचदशोमाध्यंदिनः पवमानोनुशस्तोभवतियएवंवेद॥ ॥इतिद्वादशाध्या
येषष्ठः खंडः॥ ॥मरुत्वतीयशस्त्रेप्रक्षेपणीयास्तिस्रोविधत्ते। धाय्याः शंसतीति॥ अग्निर्नेतेत्येका। त्वंसोमक्रतुभिरिति
द्वितीयापिन्वंत्यपइतितृतीयाताः शंसेत्। तासांप्रशंसामाह॥ धाय्याभिर्वैप्रजापतिरिमाँल्लोकानधयद्यंयंकाममकामय
तेति। पुराप्रजापतिर्यंयंलोकंकामितवान्तानिमाँल्लोकानुक्ताभिर्धाय्याभिरेवाधयत्तृप्तवान्। तत्तल्लोकप्राप्त्यनंतरंपाद
यां वेदनोसौतिधमत्। यजमानस्यतत्प्राप्तमभवत्। वेदनंप्रशंसति। तथैवैतद्यजमानोधाय्याभिरेवेमाँल्लोकान्धयतियंयंका
मंकामयतेयएवंवेदयद्वेवधाय्याः ३ इति। याएवोक्ताधाय्याः संतिताभिर्वेदितायजमानः कामितंलोकंधयति। अत्रधयत्या
भिरितिधाय्याशब्दनिर्वचनमर्थात्प्रतीतम् २ प्रकारांतरेणप्रशंसामाह॥ यत्रयत्रैवदेवायज्ञस्यछिद्रंनिरजानंस्तद्धाय्याभिर
पिदधुस्तद्धाय्यानांधाय्यात्वमिति। देवायदायज्ञस्यछिद्रंमंगवैगुण्यंज्ञातवंतस्तदा २ धाय्याभिरपिदधुराच्छादितवंतः। २४
तस्माद्धासाभिरितिव्युत्पत्त्याधाय्यात्वंसंपन्नं। वेदनंप्रशंसति। अच्छिद्रेणहास्ययज्ञेनेष्टंभवतियएवंवेदयद्वेवधाय्याः ३

इति ॥ यद्वेसत्त्रयोपसमुत्कारः सोयं पूर्वेण फलेन समुच्चयार्थः । नकेवलं पूर्वं फलं किं त्विदमपीत्यर्थः । अत्र पूर्ववत्स्तुतिः प्रशं
साद्योतनार्था । पुनरपि प्रकारान्तरेण प्रशंसति स्रुमहेन यज्ञस्य छिद्रं संदधतीति य एवं वेद यत्वधाय्याः ३ इति । पुनरपि प्रका
रान्तरं सीसिध्यम्रोऽसंसति । तान्युवाप तान्युपसदामेवोक्तौ । नियरुपात्प्याऽग्निर्नेतं सा श्रेयी प्रथमोपसत्तस्याएनत् उक्थं तं सामत्र
तुभिरिति सोम्या द्वितीयोपसत्तस्याएनत् उक्थं पिन्वंस्प इति वैष्णवी तृतीयोपसत्तस्याएनत् उक्थमिति । उपसदामर्थवादः ।
ग्निरनीकं सोमः शल्यो विष्णुस्तेजनमिति प्रस्तुसा ग्मा दिवना कास्तिस्त्र उपसदः समाम्नाताः । अत्राप्यग्निर्नेतं सादयस्तत्र द्व
वताका एव धाय्याः श्रुताः एकेका धाय्याः एकैकस्या उपसदः शस्त्रं उक्तार्थवेदनं तत्सर्वं कं प्रशंसनं च प्रशंसति । यावन्तं ह वै सोम्य
मेनाध्वरेणेष्ट्वा लोकं जयति तमत एकैकयोपसदा जयति य एवं वेद यश्चैवं विद्वान्धाय्याः शंसतीति । वदितां शंसितां चैकधा ।
प्यारूपयोपसदा कृत्स्नं सोमयागफलं प्राप्नोति । उपसत्संबंधशस्त्रत्वेनाभिहितत्वादुपसत्वोपचारः । अत्र केचित्सूर्वपक्ष
मुपन्यस्यन्ति । नद्वकआऊस्ता न्वो महइति शंसेद्वावयं भरतेषु शस्यमानामभिव्यज्ञानीम इति वदन्त इति । तद्धतत्र वृत्ततीयाधा
य्यां विषयेकेचिदेव माऊः नान्वो महो मरुत इत्येतां वैष्णवीं तृतीयां धाय्यां शंसेत् । न तु पिन्वंस्प इत्येतां । तत्रोपपत्तिं चैवमाऊः ।
बिभर्तिफलमिति भरा यज्ञस्तं भरंतन्वंतीति भरता ऋत्विजस्तेषु पूर्वकालीनेषु तान्वो महइत्येतामेव शस्यमानामवयमभि

प्रा·३
२५

ज्ञानी भरति स्वानुभवमितरेषामग्नेवर्द्धनस्तं दृष्ट्वा पक्षमाकुःलं निराचष्टे । लतन्त्वाद्दृसमिति । तद्विषयतन्मत्तन्त्वाद्दृणीयं विपक्षे
बाधकं दर्शयति ॥ यदेतां शंसदीश्वरः पर्जन्यो वृष्टेरिति ॥ यद्धिहोतारा त्वामहइ इत्येतामस्वंशेसेत्तदानी पर्जन्यो मेघः स्वस्वका
लेषु अवर्षी ईश्वरः वृष्टिरहितं सकर्तुं समर्थो भवति वृष्टिर्भवेत् । वृष्ट्यानुरूपाणां पदानां तस्यामभावादित्यर्थः ॥ सिद्धा
न्तं दर्शयति ॥ पिन्वंत्यप इत्येव शंसेदिति । इयमेव धाय्या तन्नुना त्वामहइत्यादिकापि । विहितायामपि च वृष्ट्यनुकूलसद्भावं दर्शे
यति । वृष्टिवलिपदं मरुत इति मारुतमस्त्वामिह विनयंतीति विनीतवद्यद्विनीतं च यद्विक्रान्तवधद्विक्रान्तवत्तद्वैष्णवं वाजि
नमिति द्वावेवाजीतस्यावायत स्याचत्वा[illegible]रिपदानि वृष्टिवनिमानुतं वैष्णवं मिति । अत्र पिन्वंत्यप इति पदं श्रूयते तत्से
चनार्थं । पिवि सेचन इत्यस्माद्धातोरुत्पन्नत्वात् । अत इदं पदं वृष्टिवनि । वृष्टिसंभजनकारीत्यर्थः । पिन्वंत्यपो मरुत इत्यत्र म
रुत इति पदं मारुतं मरुतां वाचकं पदं तदपि वृष्ट्यनुकूलं पुरोवातस्य वृष्ट्यंगत्वात् । अत्यं न मिहे विनयंतीति वाजिनमिति तृतीयपा
दे विनीतवत्पदमस्ति । विनयंतीत्यस्य नयतिधातुजन्यत्वात् । तेन च विनवृष्टिपातनं लक्ष्यते किं च यद्विनीतवत्पदं तद्विक्रां
तवदिति सुमर्थमाचष्टे धातूनामनेकार्थत्वात् । तथा सति यद्विक्रान्तवत्पदं तद्वैष्णवं विष्णुसंबंधि । इदं विष्णुर्विचक्रम
इति श्रुतत्वात् । तथा सति वैष्णव्यास्तृतीयस्या उपसदः संबद्धमपि भवतीत्यर्थः । तस्मिन्नेव तृतीयपादे वाजिनमिति प

२५

दंविद्येतत्तत्रैंद्रो वाजिशब्दार्थः। वृष्टिद्वारान्नप्रदत्वेनवाजोन्नमस्यास्तीतिव्युत्पन्नत्वात्। उक्तेनप्रकारेणतस्यामेवैतस्यामेवे
तस्यांपिन्वंत्यपइतिचिचत्वारिपदानिवृष्टेरनुकूलानिवृष्टिर्वानिमारुतं वैसर्वमैंद्रं चेतितस्मादत्रपूर्वोक्तोदोषोनास्तीत्य
र्थः। पुनरप्येतामृचंप्रकारांतरेणप्रशंसति॥ सावाएषातृतीयसवनभाजनासतीमध्यंदिनेशस्यतेतस्मादुदंभरतानांप
शवःसायंगोष्ठाःसंतोमध्यंदिनेसंगविनीमायंतिसोजगतीजागताहियशवआत्मायजमानस्यमध्यंदिनस्तद्यजमा
नेपशून्दधातीति। येयंपिन्वंत्यपइत्यृगस्तिसैषावृतृतीयसवनभाजनागतीछंदस्कत्वाजागतस्तृतीयसवनस्य।
योप्यातादृशीसतीहोत्रामध्यंदिनेशस्यतेतस्मादेवकारणादिदंलोकेदृश्यतेसायंकालेगोष्ठेव्रजेयेपशवस्तिष्ठंति
तेसायंगोष्ठाःभरतानामृत्विजांयसवस्तादृशाःसंतोमध्यंदिनेसंगविनींसंगवकालयोग्यांशालामायंतिप्राप्नुवंति।
येपशवःक्षीरंदुहंतितेसायंगृहंसमागच्छंति। येतुनदुहंतितेसायंव्रजएवनिवसंति। उभयविधाअपितेमध्यान्हका
लेधर्मकालीनसंतापनिवारणायनिर्मितांसंगवकालयोग्यांशालामागच्छंतितदेतन्मध्यान्हपाठनिमित्तमिति। किंच
सोपूर्वोक्ताप्यृग्जगतीछंदस्काःपशवश्चजगतीछंदसासहप्रजायंतेमध्यंदिनउत्पन्नत्वात्। जागतोमध्यंदिनका
लश्चयजमानस्यात्मातथासतितस्मिन्कालेजगतीपठिनयजमानेपशून्संपादयति॥ ॥इतिद्वादशाध्यायेसप्तमः

ब्रा०उ

२६

खंडः॥ ॥अथप्रगाथांतरं विधत्ते। मरुत्वंतीयंप्रगाथंशंसतिपशवोवैमरुतः पशवः प्रगाथः पशूनामवरुध्याइति। यस्मिन्प्रगाथेमरुत्वः शब्दोयंतेसोयंमरुत्वतीयः प्रगाथः प्रवइंद्रायबृहतेमरुतोब्रह्मार्चतेत्यस्मिन्प्रगाथेमरुतःशब्दोयंतेतमिमंशंसेत्। पशूनांप्रवरणंरोहिसम्परणप्रसंचारकालेवायवोनुगच्छन्तात्वाधंतेतत्संबंधात्मरुतांपशुत्वं प्रगाथस्यचपशुप्राप्तिहेतुत्वात्पशुत्वं अतः सप्रगाथः पशुप्राप्त्यैभवति। अथनिविधानीयंसूक्तं विधत्ते। जनिष्ठाउग्रः सहसेतुरायेतिसूक्तं शंसतितद्वा एतद्यजमानजननमेवसूक्तं यजमानंह्वाएतेनयज्ञाद्देवयोन्यैप्रजनयतीति। होताजनिष्ठाइत्यादिसूक्तंशंसेत् तदेतत्सूक्तं यजमानजननमेव। कथमितितदुच्यते। एतेनसूक्तेनहोतायज्ञाद्नुष्ठीयमानाद्देवयोनेर्देवलोकस्थानार्थंयजमानं प्रजनयति। तस्माद्यजमानजननत्वात्तेनरूपेणप्रशस्यपुनः प्रकारांतरेणप्रशंसति। तत्संजयंभवतिसंचजयतिविचजयतइति॥ तस्मादेतेनसूक्तेनसंयुज्यापि शत्रून्यजमानोजयति वियुज्यापिजयतेतस्मात्सूक्तंसंजयंतत्समीचीनोजयोयेनसूक्तेनेतिसमासः। पुनरपिप्रकारांतरेणप्रशंसति। एतद्गौरिवीतिर्हवैशाक्त्योनेदिष्ठंस्वर्गस्यलोकस्यागच्छत्सएतत्सूक्तमपश्यत्तेनस्वर्गलोकमजयत्तथैवैतद्यजमानःसूक्तेनस्वर्गंलोकंजयतीतिइति। शाक्तिनामकस्यमहर्षेः कुलेजातः शाक्त्योगौरिवीतिर्नाममहर्षिः सन्नुस्वर्गस्यसमीपंगत्वाप्रवेष्टुमशक्तः सन्नतस्मा

२६

धनत्वेनैतत्सूक्तं दृष्ट्वा तेन स्वर्गं प्राविशत् । तस्मादेतत्सूक्तं महर्षिनाम्ना गौरिवीतमित्युच्यते यथा महर्षिस्तथा यजमानो
ऽप्येतेन सूक्तेन स्वर्गं प्राप्नोति । तस्मिन्सूक्ते निविन्निक्षेपस्य स्थानं विधत्ते ॥ तस्यार्धाः शस्त्वार्धाः परिशिष्य मध्ये निवि
दं दधातीति । तस्य सूक्तस्य संबंधिनीषु ऋक्षु भागद्वयं कृत्वा द्वयोर्भागयोर्मध्ये द्वादश मरुत्वानिसतां निविदं तं शंसेत् ॥ नन्व
स्मिन्नेकादशर्चे सूक्ते समभागो न संभवतीति चेत् । तर्हि प्रथमभागे कांचिदधिकां शस्त्वा तत ऊर्ध्वं प्रक्षिपेत् । एकां
भूयसीं पुरस्ताच्छंसेत्युक्तत्वात् । निविदं प्रशंसति ॥ स्वर्गस्य हैष लोकस्य रोहः यन्निविदिति रोहः आरोहणहेतुरित्यर्थः । तत्र
स्वरविशेषं विधत्ते । स्वर्गस्य हैतल्लोकस्याक्रमणं यन्निविन्मात्र भमाण इव शंसेन्निविदि निरोहः प्रारोह उपैव यजमानं
निगृह्णीतयो ऽस्य प्रियस्यादिति तु सर्गं तु स्वर्गकामस्यति ॥ यं निविदस्ति नदन्त स्वर्गस्याक्रमणं सोपानस्थानीयं तस्मा
द्यथा लोके सोपानारोहणे क्रमेण पुनः पुनः श्वासं करोति तदनुकारिण स्वरकृता तथैव पठेत् । एवं पाठे सत्यस्य यजमान
स्य यत्सुमान्प्रियः स्यात्स उमानेतं यजमानं उपैव समीवसमीप एव निगृह्णीतस्तोकुर्यात् इति तु एष एव तत्र योगः स्वर्गका
मस्यावगंतव्यः । वक्ष्यमाणप्रयोगेण सोकयपरिहारा य स्वर्गकामस्य सूक्तिः । अभिचारप्रयोगं विधत्ते । अथाभिचरतोयः
कामयेत क्षत्रेण विशं हन्यायितित्रिस्तर्हि निविदा सूक्तं विशं सेत्क्षत्रं वै निविद्विट्सूक्तं क्षत्रेणैव तद्विशं हंतीति । क्ष

26

ऐ०३

२७

त्रियज्ञासावैश्यज्ञातौ नैवंविधं कामयमानो यजमानो निविदा सूक्तं त्रिर्विशंसेत् । एतदुक्तं भवति सूक्तस्यादौ मध्ये चांते च
निविदं दध्यात् । तदुक्तं सूक्तं विछेदकं शंसनमिति । निविदः क्षत्रियजातित्वं सूक्तस्य वैश्यजातित्वं पूर्वमेवाम्नातं अत
उक्तशंसनेन क्षत्रियज्ञासावैश्यज्ञातिं हंति । सोयमेको भिचारप्रकारः । अथैतद्विपर्ययेणाभिचारं विधत्ते । यः कामयेत
विशा क्षत्रं हन्यामिति त्रिस्तर्हि सूक्ते न निविदं विदं विशंसेत् क्षत्रं वै निविद्विट्सूक्तं विशैव तत्क्षत्रं हंतीति ॥ निविदस्तदानामा
दौ मध्ये चांते च सूक्तं पठेत् तदेतं निविद्विछेदरूपं शंसनं प्रकारांतरेणाभिचारं विधत्ते यदुकामयेतोभयत एनं विशः पर्य
वछिनदानीति उभयतस्तर्हि निविदं व्याकुर्यात् उभयत एवैनं तद्विशः पर्यवछिनत्तीति । यस्तु होता एनं यजमानं उभयतः पूर्वा
परभागयोः संबंधिनीर्विशः प्रजाः पर्यवछिनदानि परितो विछिन्नाः करवाणीति कामयेत स्वस्मात्पूर्वभाविन्यः पितृ
पितृव्यमातुलाद्यायाः प्रजाः स्वस्योत्तरभाविन्यः पुत्रज्ञामात्राद्ययाः प्रजास्तासां सर्वासामवछेदं करवाणीत्यर्थः ।
यद्वा । उभयतो मातृपक्षे पितृपक्षे च विद्यमानानां प्रजानामछेदं विरोधं करवाणीत्येवं यो होता यजमानं द्विष्टि स होता नि
विदमुभयतः निविदमादावंते च व्याकुर्यात् विविधमाहावं कुर्यात् आदावपि शोसावोमित्येवमाहावमंत्रं पठेत् अंतेपि
तथा पठेदित्यर्थः । तथा सत्येनं यजमानं पूर्वापरभागयोर्मातृपक्षपितृपक्षयोश्च प्रजाभिः सहावछिनत्तीत्युक्तविधीनामसौ

२८
न

कर्णायस्मवस्त्रुयानिगमयति। इति न्वभिचरन्नस्तरथालेवस्वर्गकामस्येति॥ इति नु यः कामयेत सत्रेणसाधुक्लृए वग्नका
राभिचरतोद्रष्टव्यः स्तरथालेवप्रकारांतरंतु पूर्वोक्तसूक्त मध्ये निविन्नप्रक्षेपरूपं सोपानारोहणसदृश स्वरोपेतस्वर्गकामस्य द्र
ष्टव्यं। अंतिमपासूक्तगत। यच्चौ समाप्तिविधत्ते। वयः सुपर्णा उपसेदुरिंद्रमित्युत्तमया परिदधातीति। वेतेर्धातोर्गत्यर्थस्य
वय इति रूपं गमनकुशला इत्यर्थः। अत एव सुपर्णाः पक्षिसदृशाः केचिदिंद्रं स्वर्गवासिनं उपसेदुः आसन्नवंतः इतितस्य पा
दस्यार्थः द्वितीयपादस्तु बोधत्वाभिप्रायेण पठति। प्रियमेधा ऋषयो नाधमाना इति। अंथतद्यांवधारणशक्तिर्मेधा सा प्रि
या येषामृषीणां ते प्रियमेधाः ऋषयोतीद्रियार्थद्रष्टारः नाधमानाः किं चित्स्वकार्यं याचमानाः इंद्रमुपसेदुरिति पूर्वेणान्व
यः॥ तृतीयपादस्य पूर्वभागमनूद्य व्याचष्टे। अप ध्वांतमूर्णुहि। तियेनतमसाआवृत्तामन्मनस्तत्तन्मनसागच्छदपहवास्मानह्लुप
तइति। हे इंद्र ध्वांतं तमः अपोर्णुहि। अपसारय एतस्मिन्भागे पठिते सति तमोलुप्यतेहानायेनतमसाप्यावृत्तः छादितोहमि
तिमन्येतत्तत्तमोमनसागच्छत्तमोहि विरुद्धविधं दृष्टिनिरोधकमेकं मोहरूपं द्वितीयं पापरूपं तत्तीयं तेषामध्ययनं सबाधात
नम एतद्भागपाठकाले विनष्टमिति ध्यायेत्। तयासति तमोऽस्मासुरूपाछिन्नमपसव। नसपादस्योत्तरभागे किं। हनुष्टानंवि ने
धत्ते। पूर्धि चक्षुरिति चक्षुषी मरीमृज्येतेति। हे इंद्र चक्षुः पूर्धि दृष्टिं पूरय एतद्भागपठनस्वेन चक्षुषी मरीमृज्येत पुनःपुनः शोधयेत्।

ब्रा॰ ३
२८

वेदनं प्रशंसति। आजरसं ह चक्षुष्मान्भवति य एवं वेदेति। आजरसं जरासमाप्तिपर्यंतं। चतुर्थपादमनूद्य व्याचष्टे। मुमुग्ध स्मा
त्रिधयेव बद्धानिति पाशा वै निधा मुमुग्धास्मा मा पाशाद्विबद्धानित्सवनदाहेति। हे इंद्र निधयेव यथा शनैर्वत्तप्रसावबद्धानस्मान्
मुमुग्धि मोचय। अस्मिन्मादेनिधाशब्देन पाशा बंधनहेतवो रज्जवो विवक्षिताः। अतो निधयेव बद्धानित्युक्ते पाशाद्विबद्धा
नित्युक्तं भवति॥ ॥इति द्वादशाध्याये ऽष्टमः खंडः॥ ॥अथ मरुत्वतीयशस्त्रं तदंतपठनीयां याज्यां च प्रशंसितुमुपाख्यानमा
ह॥ इंद्रो वै वृत्रं हनिष्यन्त्सर्वा देवता अब्रवीदनु मोपतिष्ठध्वमुप मा ह्वयध्वमिति तथेति तं हनिष्यंत आद्रवन्सोऽवेन्मां वै हनिष्यंत
आद्रवंति हंत मा भीषयामा इति तानभिप्राश्वसीत्तस्य श्वसथादीषमाणा विश्वे देवा अद्रवन्मरुतो हैनं नाजहुः प्रहर भगवो
जहि वीरयस्वेत्येवैनमेतां वाचं वदंत उपातिष्ठंत तदेतदृषिः पश्यन्नभ्यनूवाच वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहु
र्ये सखायः। मरुद्भिरिंद्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासीति सोऽवेदिमे वै किल मे सचिवा इमे मा कामयंत यंत
मानस्मिन्नुक्थ आभजा इति तानेतस्मिन्नुक्थ आभजदथ हैते तर्ह्युभय एवा निष्केवल्य उक्थ आसतुरिति। पुरा कदाचिदिंद्रो
वृत्रं हंतुमुद्यतः सर्वा अपि देवताः प्रत्येवमब्रवीत् यूयमनु मोपतिष्ठध्वं आनुकूल्येन मां सेवध्वं उपमाह्वयध्वं वृत्रवधाय प्रवृ
त्तं मामुपह्वयध्वं अनुजानीध्वमिति। ततोंगीकृत्य सर्वे देवास्तं वृत्रं हंतुमुद्युक्ता आगच्छन्। तदा स वृत्रो मां हंतुमुद्युक्ता आ

२८

द्रवंतीति श्रुत्वैतत्स्वमनसा ज्ञातवान् ततः इदं विचारयामास अहं तस्य ज्ञातं देवनिवारणोपायस्य प्रतिभातत्वात् । इमान्देवा
न्भीषयेऽहं भीतान्नुरवाणीति विचार्यैतान्देवानभिलक्ष्य प्राश्वसीत् प्रश्वासमकरोत् । तस्य वृत्रस्य श्वसथात् श्वासादीष
माणा बिभ्यतः सर्वे देवाः पलायनमकुर्वन् । वृत्रो हि स्वजन्मानंतरं सर्वासु दिक्षु शरव्यानमात्रदेशं प्राप्य वृद्धिं गतवान् । तथा
चाम्नायते इति : स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमांल्लोकानवृणोद्यदिमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वमिति । ता
दृशशरीरस्य प्रश्वासः प्रलयकालीनवायुसमानः अतस्तदीयप्रश्वासेन देवाः परमाणवद्दूरतरमुपसारिताः तदानीं मरुत
एवैनमिंद्रं नाजहुः नैव परित्यक्तवंतः । हे इंद्र भगवन् वृत्रं वज्रेण प्रहर हनन जहि मारय तत्तो वीरय स्वस्वकीयं वीरत्वं प्रकटय
इत्यनेनैव प्रकारेणेनमिंद्रं प्रसन्नां वाचं वदंतो मरुतस्तमिंद्रमसेवंत । उक्तमर्थं मंत्रसंवादेन द्रढयति । तदेतदृषिः पश्यन्नभ्य
नूवाच वृत्रस्य सी॰ ति । कश्चिदृषिरिदं ज्ञानेन तदेतद्देवपलायनं पश्यन् वृत्रस्येत्यादिमंत्रेण प्रकटीचकार । हे इंद्र तव स
खायो विश्वे देवा ये संति ते सर्वे वृत्रस्य श्वसथात् श्वासात् पलायमानास्त्वां परित्यक्तवंतः । तस्मादिदानीं तव मरुद्भिः सह स
ख्यमस्तु अथानंतरमिमाः सर्वा वृत्रसंबंधिनीः सेना जयसीति । अथ मरुतामिंद्रकृतमुपकारं दर्शयति । सोऽदिमे ।
आसत्तुरिति । स इंद्रः स्वमनस्येवं विचारितवान् । कथमिति । उच्यते । इमे वै किल पुरतः स्थिता मरुत एवमेस चिवाः

(28)

ब्रा०३
२९

सखायः यस्मादिमे मरुतो मामकां भयं तस्मा अपेक्षितवन्तो न तु परित्यज्य गताः तस्मादस्मत्सखित्वं हरीति तत्सम्यगेभिः कृतमि
त्यहं दृष्टवानस्मि तस्मान्मरुतोस्मिन्नुक्थे माध्यंदिनगत शस्त्रे आभजे भागिनः करवाणीति मनस्येवं विचार्य्य तथैवा
करोत् अथानन्तरं तर्हि तदा प्रभृति एते हि मरुत एव शस्त्रभागिनो भवन्तीति शेषः। ततः पूर्वं तु माध्यंदिन सवने निष्केव
ल्यनामके शस्त्रे केवलेन्द्रदेवताकाः उभे आसतुः। नतु तत्र मरुतां प्रवेश आसीत्। तस्मादिदानीं प्रवेश इन्द्रकृत उपकारः
। इन्द्रदत्तान्मरुतां भागान्प्रदर्शयति। मरुत्वतीयं ग्रहं गृहीत्वा ति मरुत्वतीयं प्रगाथं शंसति मरुत्वती। यं सूक्तं शंसति म
रुत्वतीयां निविदं दधाति मरुतां सा भक्तिरिति। मरुत्वानस्य संतीति तैः सहितो मरुत्वान् तदीयग्रहम ध्वर्युर्गृहीत्वा ततो हो
ता प्र व इन्द्राय बृहत इत्येतं मरुत्वतीयं प्रगाथं शंसति जनिष्ठा उग्रः इत्यादिकं मरुत्वतीयं शंसति इन्द्रो मरुत्वानित्यादिकां म
रुत्वतीयां निविदं सूक्ते प्रक्षिपति। ग्रहग्रहणादिसूक्तं शंसनांतं मरुत्संबंधात् मरुतां भक्तिभागः। अथ शस्त्रयाज्यामभि
धत्ते। मरुत्वतीयां निविदं सूक्ते प्रक्षिपति। ग्रहग्रहणादि सूक्तं शंसनांतं मरुत्संबंधात् मरुतां भक्तिभागः। अथ शस्त्रया
ज्यामभिधत्ते। मरुत्वतीयमुक्थं शस्त्वा मरुत्वतीं यजति यथाभागं देवताः प्रीणातीति। उक्थं शस्त्रं तच्छंसनादूर्ध्वं
मरुत्वद्देवताकां शस्त्रयाज्यां पठेत्। तेन स्वस्वभागमनतिक्रम्य देवतास्तर्पयति तां मरुत्वतीं याज्यां दर्शयति। ये त्वाहि

२९

सेमघवन्त्वर्द्धमेशांवरहरिवोयेगविष्टौ ॥ ये त्वान् नमनुमदंतिविदंतिविप्राः पिवेंद्र सोमंसगणोमरुद्भिरिति । हे इंद्र अहि
हत्येवृत्रवधेयेमरुतस्त्वामवर्द्धन्वर्द्धितवंतः । अहिसत्वोवृत्रवाची । अहिमाचक्षतेवृत्रमितिनिरुक्तिवचनात् । शांवरः
कश्चिदसुरस्तत्संबंधावधः शांवरः । तस्मिन्नेमरुतस्त्वा अवर्द्धन्वर्द्धितवंतइत्यन्वयः । गवामिष्टिरन्वेषणंगविष्टिः ।
वलोनामकश्चिदसुरोगुहायामासीत् । इंद्रश्चतस्यविलमपोर्णोदितिश्रुतं तराक्षतेनवलेनगावापहृतास्तासां
गवामन्वेषणमिंद्रसहितमरुतः कृतवंतः । दिवावैवलेगाः पर्यवष्टभ्नितिश्रुतंतरात् । तासांगवामन्वेषणेयेमरुत
स्त्वामवर्द्धयन् । तथायेमरुतोनूनंअयापिविप्रास्त्वं लिरयाभूत्वात्वामनुमदंतिस्तोत्रैरनुदिनंहर्षयंतिहेइंद्रतैमरुद्भिः
सहितस्त्वंसगणोभूत्वासोमंपिवेतियाज्यामंत्रार्थः । एतांयाज्यांप्रशंसति । यत्रयत्रैवैभिर्व्यजयत यत्रयत्रयत्रवीर्यमकरोत्त
देवैतत्समनुवध्येंद्रेणतान्ससोमपीथान्करोतीति । यत्रयत्रैवयुस्मिन्नस्मिन्वृत्रवधादिकेसइंद्रएभिर्मरुद्भिर्वि
जयंप्राप्तः प्राप्यचयत्रयस्मिन्नपियुद्धादौवीर्यंशौर्यमकरोत्तदेवैतदखिलमिंद्रायसमनुवध्यसम्यगनुक्रमेणवि
ज्ञाप्येंद्रेणसहैतान्मरुतः सोमपानसहितान्करोति ॥ ॥ इतिद्वादशाध्यायेनवमः खंडः ॥ ॥ अथनिष्केवल्यशस्त्र
प्र स्त्वंविधातव्यं । तस्यचापसंहृश्लोकः । स्तोत्रियोयोनुरूपश्चधाय्याप्रागाथिकंतथा । निविद्धानीयसूक्तंचेति

ग्र

२९

ब्रा०३ कैवल्येनकीर्तितमिति। तदर्थमादावुपाख्यानमाह। इंद्रोवैवृत्रंहत्वासर्वोविजितीर्विजित्याब्रवीत्प्रजापतिमहमेतदसानि
यत्त्वमहंमहानसानीतिसप्रजापतिरब्रवीदथकोहमितियदेवैतदवोचइत्यब्रवीत्ततोवैकोनामप्रजापतिरभवत्कोवैनामप्रजा
३० पतिर्यन्महानिंद्रोभवत्तन्महेंद्रस्यमहेंद्रत्वमिति। इंद्रः पुरावृत्रंहत्वासर्वोविजितीर्जेतव्याभूमीर्विजित्यप्रजापतिमिद
मब्रवीत्हेप्रजापतेत्वमिदानींयदसिएतदहमपित्वत्परमसानिभवानिकिंतदितिचेत्स्वार्थविशेषाकारेणत्वत्तः। अहं
महानसानिसर्वेभ्योभूतेभ्योधिकःश्रेष्ठोभवानीति। ततःसप्रजापतिरिदमब्रवीत्। मदीयमहत्त्वंत्वयास्वीकृतेस
सनंतरमहंकोनामभविष्यामीति। ततइंद्रइदमब्रवीत्हेप्रजापतेस्वात्मानमुद्दिश्यनिवेदनेनकइतियदेवैतदवोचस्त
देवत्वंभवेतिततःआरभ्यकइत्येतन्नामवान्प्रजापतिरभूत्। एतत्कशब्दवाच्यत्वंसर्वत्रप्रसिद्धं। अतएवश्रुत्यंतरेषुप्र
तिग्रहमंत्रब्राह्मणएवमाम्नायते। कइदंकस्माअदादितिसाहप्रजापतिर्वैकःप्रजापतयएवतद्ददातीति। कशब्दस्यसुख
वाचित्वात्तेनप्रजापतेर्व्यवहारेसतिसुखीप्रजापतिरित्युक्तंभवति। प्रजापतिगतंमहत्त्वंस्वीकृत्येंद्रोयस्मान्महानभवत्त
स्मान्महेंद्रनामसंपन्नः। श्रुत्यंतरेप्येतदाम्नातं। इंद्रोवृत्रमहन्त्वेदेवाब्रुवन्महान्वाअयमभूद्योवृत्रमवधीदितितन्महेंद्र
स्यमहेंद्रत्वमिति। अथेंद्रस्यमहत्त्वप्रसक्तंसत्कारविशेषंदर्शयति। समहान्भूत्वादेवताअब्रवीदुद्धारंमउद्धरतेतियथाप्येत ३०

हीन्द्रुतियोवैभवतियस्त्रेष्टतामश्नुते समहान्भवतितंदेवाअब्रुवन्स्वयमेवब्रूथयत्तेभविष्यतीतिसएतंमहिंद्रंयहमवृणीतेमाध्यंदि
नंसवनानांनिष्केवल्यमुक्थानांत्रिष्टुभंछंदसांपृष्ठंसाम्नांतमस्माउद्धारमुदहरन्निति। सइंद्रउक्तप्रकारेणमहत्वप्राप्यदेवताः प्र
त्येतदब्रवीत्हेदेवाउद्धारंउत्कर्षनिमित्तंहिलोकेयः पुंसांश्रेष्ठो जातिविशेषोऽन्विष्यतेसंपाद्यतेसोयंसत्कारउद्धारस्तंसला। स्माकंमम
दर्पणउद्धरतपृथक्कुरुतेति। यथेसादिनालौकिकदृष्टांतउच्यतेयोवैभवतियः पुमान्भवतिऐश्वर्यंप्राप्नोतियश्चश्रेष्ठतांविद्या
चाराद्धिप्रयुक्तवैशिष्ट्यमश्नुतेसप्राप्तोऽश्वर्योविशिष्टश्चसर्वेषांमध्येमहान्भवतिसत्ताहृशः पुरुषएतर्ह्यपिइदानीमपिपथावि
शिष्टपूजारूपंभागमिच्छतितथायमिंद्रोपीत्यध्याहारः। तमुद्धारेच्छावंतमिंद्रंदेवाऊदमब्रुवन्हेइंद्रयत्तेप्रियंभविष्यतीतितत्स्वय
मेवब्रूयेतिततः सइंद्रः ग्रहाणांमध्येएतंमाहेंद्रंग्रहमवृणुततथासवनानांमध्येमाध्यंदिनंसवनंशस्त्राणांमध्येनिष्केव
ल्यंशस्त्रंछंदसांमध्येत्रिष्टुभंसाम्नांमध्येपृष्ठस्तोत्रनिष्पादकंबृहद्रथंतरवैरूपादिकं। ततोदेवाअस्माइंद्रायतमुद्धारंमा
हेंद्रग्रहादिकंयज्ञाउदहरन्। तंदेतच्छाखांतरेप्याम्नातं। सएतंमहेंद्रमुद्धारमुदहरतवृत्रंहत्वान्यासुदेवतास्वधीतियस्माहे
द्रोग्रहतउद्धारमेवतत्यजमानउद्धरतेनप्रजास्वधाति। वेदनंप्रशंसति। उदस्माउद्धारंहरंतियएवंवेदइति। उद्धारभागंतदेत
वत्तादेवानांतस्मिन्नुद्धारस्वापेक्षितभागप्रार्थनांदर्शयति। तंदेवाअब्रुवत्सर्वेवाअवोचथाअपिनोत्रास्त्वितिसनेत्यब्र

ब्रा०७
३१

वीळकथंवोपिस्यादितितमब्रुवन्नप्येवनोस्तुमघवन्निति तानो स्यैवेति । उग्रर युक्तंतमिंद्रं स्तरे देवा इदं अब्रुवन् हे मघवन्निं
द्र सर्वमेवयज्ञ स्वसंबंधित्वेनोक्तवानसि अस्माकमप्यत्र सानो भागो स्त्विति । ततः स इंद्र एवमब्रवीत् । अयं सारः सर्वोपिम
मैवापेक्षितः युष्माकमप्यत्र सानो भा   कथं स्यान्नास्त्येव युष्माकं भाग इति निराकृतवंतंतमिंद्रं देवाः प्रार्थयमाना इद
मब्रुवन् हे मघवन्नो स्माकमप्यस्त्येव सर्वस्याभागोपेक्षित एवेति तस्य इंद्रस्तान्देवानीक्षितव अनुग्रहदृष्ट्यवलोकितवान्
व ॥ ॥इति द्वादशाध्याये दशमः खंडः॥ ॥अथ निष्केवल्यस्य स्तुयाज्यां विधत्तुं पूर्वोपारव्यानशेषं प्रस्तौति । ते देवा अ
ब्रुवन्नियं वा इंद्रस्य प्रिया जाया वावाता प्रासहा नामास्यामेवेच्छामहा इति तथेति तस्यामैवैच्छंत सैनानब्रवीत्प्रातर्वः प्रतिवक्ता
स्मीति तस्मात्स्त्रियः पत्साविछं तेतस्मादु स्त्र्यनुनात्रं पत्सा विछते तां प्रातरुपायन्सैतदेव प्रत्यपद्यतेति । तदेवा इंद्रस्याभिप्राय
मज्ञानंतः परस्परमिदमब्रुवन् इयं वै पुरतो दृश्यमानैवेंद्रस्य प्रियाजाया वावाता मध्यमजातीया । राज्ञां हि त्रिविधः स्त्रियस्त
त्रोत्तमजातेर्महिषी तिनाम । मध्यमजातेर्वावातेति । अधमजातेः परिवृक्तिरिति । अतएवाश्वमेधोः श्वप्रभिराजस्त्रीणां कर्तव्य
विशेष एतेनोमभिराम्नातः । महिषीभुवइति वावातासुवरिति परिवृक्तिरिति । तस्याश्ववातायाप्रासहेतिनाम । राज
प्रियत्वात् । प्रसहबलात्कारेण सर्वकार्यं कर्तुं शक्तेस्यर्थः । तस्मात्तस्यामेवनिमित्तभूतायां सत्सां राजाभिप्रायं ज्ञातुमिच्छाम

३१

हा इति विचार्य सर्वेंगीकृतवन्तः सां बाबालायां स्वाभीष्टमैच्छन् । सापि बाबाला एतान्देवानिदमब्रवीत् रात्रौ राज्ञाभिप्रायं विचारयितुं
शक्यतास्मि रेह्यः प्रातःकाले वो युष्माकं प्रत्युत्तरं सर्वं वक्तास्मि वक्ष्यामीति यस्माद्देवं तस्मात् अस्मिंल्लोके पि प्रियास्त्रियः सर्वमवगंतव्यं
वृत्तांतं यस्मा च वगंतुमिच्छंते । यस्माद्धि विक्रमावसरे सर्वमवगंतुं शक्यं तस्माद् एवकारणात् प्रियास्त्री अनुरात्रं रात्रि समये वि
विक्रवेलायां पसौ सर्वमवगंतुमिच्छते । देवास्तु प्रातःकाले वा बालामुपागच्छन् सा बाबाला एतान्देव दृष्यमाणमंत्ररूपं वाक्यं प्रस्तु
तरत्लेन प्रामवदी । तस्मिन्मंत्रे पादत्रयं पठति । यद्यवान्पुरुतमं पुराण लोहृत्तं हंद्रो नामा स प्रभाः । अ चेति प्रासहस्पतिस्तुवि
भ्रानितीति । पुरातनानां पुरुषाणां मध्ये सहिष्णुः पुरुपंडुः स च पुरुतमं अतिशयेन प्रभूतं यद्वा रितरूपं वस्तु वा वान । आदौ
दीर्घस्थादस्तः वचानसंपन्ने जेलधू वानिसर्थः । स च वृत्रहंद्रस्तस्मिन्स्तुवरे नामानि आप्राः महेंद्र यहामाध्यदिन मिसादि ।
निस्वाभीष्टनामानि आसमंतात्स्मृरितवान् । प्रकृष्टं सहा बलं येषां ते प्रासहा तेषां पतिः प्रासहस्पतिरिंद्र उच्यते इति अजानात् ।
मं देवानां भीष्टं ज्ञातवान् । कृपाक्षेणानुगृहीतवानित्यर्थः । स च इंद्रस्तु विभ्रानवसुधनवान् । अस्मिस्तीयपादे पदयोरसि ।
द्धलादर्थं व्याचष्टे । इंद्रो वै प्रासहस्पतिस्तु विभ्रानिति । चतुर्थपादमन पव्याचष्टे । यदीमुष्ण सिक्लीवं कृत्रतदितियदेवतं
दवो चा मा कारतंदिसवैनांसदब्रवीदिति । पदत्रयोक्तं बालाया वचनं श्रुत्वा चतुर्थपादेन देवाः परस्परं ब्रुवंते यदि इद्रं यदिदं

ब्रा०३
३२

अस्माकमप्यत्रभागोस्त्वितेनादृशंकार्यंकर्त्तुमेकंतुउरमति । वयंसर्वेकामयामहे । तत्सर्वेअकुर्वन् । इंद्रः संपूर्णमकरोत् । अथ
वाचस्तुर्थपादोपिवावातायाएववचनं । हेदेवाः वयसर्वेयदिदंकार्यंकर्त्तुंकामयामहेतत्रयुष्मद्भागप्रदानरूपंकार्यंइंद्रोकरो
दिति । इदमेवद्वितीयंव्याख्यानंयदेवतदितिसादिब्राह्मणेनस्पष्टीकृतंहेदेवामयासहयुष्माभिरालोचितंकार्यंइंद्रः कृतवानि ।
सेनेनैवप्रकारेणतस्मिन्मंत्रेसावावाताअब्रवीत् । उपाख्यानशेषंदर्शयति । तेदेवाअब्रुवन्नस्माइहास्तुयानोस्मिन्नवेक
मविदादितितथेतितेनसाअप्यत्राकुर्वन्निति । तदेवावातायाउत्तरंश्लोकापरस्परमिदमब्रुवन् । वावातानोस्माकमुपकारि
णी अस्मिन्निष्केवल्येशस्त्रेकमपिसंबंधनवेअविदन्नेवलभ्यवन्ती । अस्मास्वपिवावातायाइहनिष्केवल्यशस्त्रेसंबं
धोस्त्विसेनदंगीकृतंतस्याअप्यत्रसंबंधमकुर्वन् । इदानींधाय्यांविधत्ते । तस्मादेषात्रा॥ शंसेतेयद्वावानपुरुतमंपुराषा
लिङीयस्मात्वावातायाः संबंधः कृतः तस्मात्कारणात्यद्वावानेत्येषाप्येकंनिष्केवल्यशस्त्रेधाय्यात्वेनशंसनीया॥ असा
स्वेवात्र्क्रीयंद्रस्यजायोत्कालस्पृशंसावुक्थिर्युक्थंके विलयाणंविधत्ते । सेनावाइंद्रस्यप्रियाजायावावातानाम्रासहानमकोना
मप्रजापतिःश्वशुरस्तयासकामसे । नजयतस्याअर्द्धितिष्ठत्स्यणमुभयतः परिगृह्यधत्तनांसेनामभ्यसेत्रासहेकस्त्वापश्य ३२
नीतिनद्यथैवादस्नुषाश्वशुराल्लज्जमानानिलीयमानैसेवमेवसासेनाभग्नोऽप्यननिलीयमानैतियत्रेवंविद्वांस्तृणमुभ

यतः परिछिद्यतरां सेनामभ्यस्यतिप्र। सहेक स्त्वापश्यतीतीति। पूर्वत्रास्येंद्रस्य प्रियाजायावावाताप्रर्सहानामेतियेव भुक्ता।
सेयं लोकव्यवहारे सेनावेयुद्धार्थोद्यतसेनारूपेण वर्त्तते। इंद्रजायायाः सेनाभिमानित्वात् तच्छशाखांतरे ऐंद्रमाम्नातं। इंद्रा
णीवै सेनायादेवतेति। कोनामक इत्यनेन नाम्नायुक्तः प्रजापतिः प्रजापतिः तस्या इंद्रजायायाः श्वशुरः प्रजापतिरिंद्रो
सादिकत्वात्। तथा चाम्नातअश्नुयते प्रजापतिरिंद्रमसृजतानुजावरं देवानामिति। तत्र यासति अस्य लौकिकस्य पुरुष
स्य युद्धार्थं नीयाः स्वकीयारुणाजयत्ते लिकामो भवति एतस्मिन्काले सति सएभ्यान्तस्याः स्वकीयायाः सेनाया अर्द्ध
निष्टत्वं अर्द्धभागेतीक्ष्णमावृवस्थित तः किं चित्तेणमध्यआदायम् — तोयतउभयतः परिछिद्यतरां परकीयां सेनामभि
लक्ष्यप्रस्यत। बाणवत् क्षिपत्। तत्रायमंत्रः। आसहेकस्त्वापश्यतीति। हे आसहा स्वेइंद्रजायेकः प्रजापतिः स्वदीपः श्व
शुरस्त्वां चक्षुषापश्यति। अनेन मंत्रेणैतत् एणक्षिप्ते सति परसेनाया भगदृष्टांत उच्यते। तस्मिन्विवक्षितार्थे यथेवादो दर्शनं
भवति तथा कथयामः। स्नुर्खानामामी शानां वा गृहे स्नुषा युवतिः स्नुषा श्वशुरं दृष्ट्वा तस्मात् श्वशुरमाना लज्जमाना अनुवीती नि
लीयमाना वस्त्रावगुंठनहस्ताद्यंगसंकोचेन तिरोहितं वृसति गृहाभ्यंतरमागच्छति एवमेव सा पुरकीया सेना अभिमंत्रितत्वेण
रूपास्त्रप्रक्षेपणेभज्यमाना सती तत्र तत्रारण्यपर्वतादिषु निलीयमाना तिरोहिता सती स्वकीयदर्शमति। कुत्रायमितरसेना

मंगस्याशंसायत्रेयमित्यादिना पूर्वोक्त एवार्थः स्पष्टीकृतः प्रासंगिकं परिसमाप्य प्रकृतमनुसरति। तानिंद्र उवाचापि वोऽत्रा-
स्त्विति ते देवा आहुर्विराडाज्यास्तु तिष्ठवत्सस्य यास्त्रयस्त्रिंशदक्षरेति। वाचा तावद्वचनेनेंद्र समीपं प्राप्ते देवभागे त-
पुनः देवानिंद्र एवमुवाच युष्माकं मध्ये अत्र निषद्वत्सेपि शिक्षितो भागोऽस्त्विति। ततो देवास्त्रयस्त्रिंशदक्षरां विराट्छंदस्कापि।
याज्यामिमसेतां याज्यां प्रार्थितवंतः। तां याज्यां प्रशंसति। त्रयस्त्रिंशद्देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजा-
पतिश्च वषट्कारश्च देवता अक्षरभाजः करोत्यक्षरमक्षरमेव तद्देवता अनुप्रपिबति देवपात्रेणैव तद्देवतास्तर्पयतीति
॥ एतद्वाक्यं पूर्वत्रैव व्याख्यातं। यद्यप्यस्यां याज्यायां त्रयस्त्रिंशदक्षराणि साक्षान्न दृश्यंते तथापि संयोगाक्षरे द्विविभागे-
न संख्या पूरणीया॥ ततो देवसाम्यं अक्षराणामेकैकदेवतानां तृप्तिः सिध्यति। अथाभिचारप्रयोगं विधत्ते। यं कामयेताना-
यतनवान्स्यादिति विराजास्य यजेत् गायत्र्या वा त्रिष्टुभा वान्येन वा छंदसा वषट्कुर्यादनायतनवंतमेवैनं तत्करोतीति।
आयतनमाश्रयो गृहादिरस्यास्तीत्यायतनवान् तद्विपरीतो यजमानोऽस्त्विति कामयमानो होता विराडतिरिक्तगायत्र्या-
दिछंदोयुक्तां याज्यां पठित्वा तदंते वषट्कुर्यात् तथा सत्यायतनहीनो यजमानो भवति। उक्तार्थव्यतिरेकं विधत्ते। यं का-
मयेतायतनवान्स्यादिति विराजास्य यजेत् पिबा सोममिंद्र मंदतु त्वेत्येतयायतनवंतमेवैनं तत्करोति॥ ॥इति द्वादशाध्या-

येएकादशः [illegible]खंडः ॥ ॥स्तुतमनुशंसतीति विधित्सेन निष्केवल्यशस्त्रस्य स्तोत्रपूर्वकत्वात्तदुपेतस्य साम्नःप्रशयनेन तत्त्वं वि
धातुमाख्यायिकामाह ॥ ऋक्च वा इदमग्रे साम चास्तां सैव नाम ऋगासीदमो नाम साम सा वा ऋक् सामोपावदन्मिथुनं सं
भवाव प्रजात्या इति नेत्यब्रवीत्साम ज्यायान्वा अतो मम महिमेति ते द्वे भूत्वोपावदतां ते न प्रतिचन समवदन्त तास्तिस्रो भूत्वोपावदं ता
स्तत्तिसृभिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम संमितं तस्मादेकस्य ब
श्वानरोऽग्निस्तद्रेतो द्रवीभावादच्युतमकरोत् । तस्य पिंडीभूतस्य रेतसो यत्प्रथमं पिंडरूपमुदद्दीप्यत तदुद्दीप्तमभवत्तद्रूप
मसौ दिवि दृश्यमान आदित्योऽभवत् । द्वितीयं यत्पिंडरूपमासीत्तद्भृगुरभवत्तं भृगुं वरुणो न्यगृह्णीत । निजपुत्रत्वे
न स्वीकृतवान् । तस्मात्स भृगुर्वारुणिरित्युच्यते वरुणस्यापत्यं वारुणिः एतदेवाभिप्रेत्यैतरेया आमनंति । भृगुर्वै वारुणि
वरुणं पितरमुपससादेति । अथानंतरं तृतीयपिंडरूपमदीदेदिव । अतिशयेन दीप्तमेवासीत्तत आदित्या अदितेः पुत्राद्देव

६४

ब्रा०३

५०

विशेषाअभवन्। पूर्वमादित्यशब्देनमंडलवर्तीसूर्यउक्तः। अत्रअदितेः पुत्राइमेंत्नरदेवाउच्यंते। येरत्तःपिंडादग्धाःसंतोगा
राअभवन्तेसर्वेष्यगिरोनामकाऋषयोभवन् पुनरपितत्रयदंगाराःयेकेचिदंगारात्रवर्णनाःशांतिरोहिताःसंतउददीप्यंत
उत्कर्षेणदीप्तास्ततसर्वेबृहस्पतिरभवत्। अथपशुसृष्टिंदर्शयति। यानिपरिक्षाणानासंक्लेच्छुला: पशवोभवन्मालोहिनीम
त्तिकानेरोहिता अथयज्ञस्मासीतसरुष्यंव्यसर्पत्कोरागवयऋश्यउष्ट्रागर्द्भइतियचैतेरुणाःपशवस्तेचेति॥ अगरेषु
शांतेषुयानिकृष्णवर्णान्यासन्काष्ठानितेकृष्णवर्णाःपशवोऽभवन्अग्निदाहेनभस्मीयात्लोहिनीरक्तवर्णामृत्तिकानिष्ठ
तितेरोहितारक्तवर्णाःपशवोभवन्अत्रापिस्थानेयज्ञस्मासीतसरुष्यंपरुषशरीरंजातंभूत्वाव्यसर्पत्विविधमरण्यप
दावगच्छत्। किंतसरुष्यमितितद्वोच्यते। गौरोगवयऋश्यइत्येतेरण्यमृगाःउष्ट्रगर्दभौप्रसिद्धौ। एवंसैमादिकंपरुषशरी
रं। येप्येतेरुणाःपशवस्तेचव्यसर्पन्एवमुपाख्यानेनाग्निमारुतशस्त्रस्योपोद्घातमभिधायतस्मिन्शस्त्रेशंसनीयामृक्
मवविधत्ते। तन्वाएषदेवोभ्यवदन्ममवाइदंममवैवास्तुहमितितमेतयर्चानिरवादयंतयषारौद्रीशष्यतइति। नान्वे।

५०

तानवपशत्सर्वानसिलक्ष्येषरुद्रइदंसर्वंममैवेसर्वमीततत्रोपपत्तिं चोक्तवान्वास्तुहवास्रोयज्ञस्मोहीनंयद्वृम
स्तितत्सर्वंममेति स्मृसंतरपिप्रसिद्धं। तथाचतैत्तिरीयारुद्रवाकमामनंति। यद्ययैज्ञवास्तोहि। यत्तममचैतदिति। तरु

द्रूसर्वोन्मभूतनभिगच्छंतंमेतयावक्ष्यमाणपर्श्चोनिरवादयंतनिरपेक्षमकुर्वतात्तयात्तुष्टोरुद्रः पश्चमेयेक्षांपरित्यज्यति
स्माकासाऽगिति सोच्यतेयेषारोद्रीरुद्रदेवताकाशस्तेसावगंतव्या। तस्याऽच्च पादत्रयंपठति। आतेपितर्मरु
तांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः। त्वंमोवीरोअर्वतिक्षमेथाद्गूतीति। मरुतांदेवानांपितःहेरुद्रतेतेनव
सुम्नसुखएतुआगच्छतुनोऽस्मान्सूर्यस्यसंदृशःसूर्यावलोकनान्मायुयोथाःमावियोजयदृष्टियुक्तान्कुर्वित्यर्थः
।किंचहेरुद्रवीरस्त्वंनोऽस्माकमर्वतिपश्वादिवस्तुनिक्षमेथाःसहिष्णुर्भव।अस्मदीयान्पश्वादिवस्तूनिमाविनाश
येत्यर्थः। तृतीयपादस्यत्वंनोवीरइत्ययंसपाठः। अभिनोवीरइतिशाखांतरपाठः। तयोर्मध्येस्वपाठंविधायशाखांतर
पाठंनिषेधति। इतिब्रूयान्नाभिनइत्यनभिमानुकोहैषदेवःप्रजाभवतीति। इत्यनेनपूर्वोक्तेनप्रकारेणत्वंनोवीरइति
पाठमेवशंसनकालेब्रूयान्नाभिनइतिपाठंब्रूयात्। त्वंनोवीरइतिपाठेसत्येषदेवःप्रजाअभिलक्ष्यनाऽभिप्यामी
तिरुद्रोमनुते। त्वंनइतिपाठेतुतथेत्यर्थः। चतुर्थेपादेपिस्वाभिमतंपाठंविधायपूर्वोक्तंपाठांतरंनिषेधति।।प्रजायेमहिरुद्रि
यप्रजा। भिरितिब्रूयान्नरुद्रइत्यसौसर्वनाम्नःपरिहारार्थइति। हिरुद्रियरुद्रसंबंधिन्यस्त्वंदे [illegible] नुज्ञ
यावयंप्रजाभिःप्रजायेमहिपुत्रपौत्रादिरूपेणोत्पद्येमहि। अस्मिन्पादेरुद्रियेत्येतमेवपाठंब्रूयात्। नेत्तुरुद्रइतिपा

ढं एतत्सैव रुद्रनाम्न उग्रस्य परिहाराय रुद्रियेति पाठादरः। आनेपितरित्तास्पस्त्व ः स्थानेकांचिदसाम्प्रतं विधत्ते। त
दुखलु शांतः करतो सेवशांसेत्छमितिप्रतिपद्यते सर्वस्माएव शांसेन श्रेणेना रिभ्योगवइति पुमांसोवैनरः स्त्रियेणा
र्यः सर्वस्माएव शांसाऽस्ति। नदुखलुतत्रैव पूर्वाम्नायं परित्सज्यतस्माएव स्थानेयोनः करसर्वतस्सेताम्स्वं शांसेत। तथास
त्रिको लाभइत्तितदुच्यते तस्मात्स्वत्रादोयच्छमितिसूत्रेन परिदं नप्रतिपद्यतेप्रारंभः किंयतेनस्यपदस्यशांति चावक
ला सर्वस्मै सर्वस्यापि स्वकीयस्य वस्तुनः शांतिर्भवति। सर्वस्माऽसस्य व्याने तस्माइसादित्तस्यापि व्याख्यानं तत्प
रसादित्तस्यापि व्याख्यानं पुमांसइसादि। सर्वस्माएव शांसाऽस्तुपसंहारः। प्रकारांतरेणतनाम्नश्चं प्रशंसति। सा
निरुक्तारौद्री शांतासर्वायुः सर्वायुनामेति। सोसाव्यगनिरुक्तारुद्रवाचकपदाभावादस्पष्टदेवताकात्त एव। रौद्री
रुद्रदेवताकामस्यापि येशार्थवाचकरुद्रपदाभावादियं शांतातांशांसेनहोतासर्वायुर्भवतितस्य यजमानस्यसर्वा
युसाय संपद्यते। वृदनं प्रशंसति। सर्वमायुरेतियएवं वेदेति॥ पुनरपि प्रकारांतरेण प्रशंसति। सागायत्री ब्रह्मवैगायत्री ब्र
ह्मणैवैनंतंनमस्यतीति। सासावस्कैगायत्री छंदस्का गायत्री च ब्रह्मा ब्राह्मणजातिरेव। उभयोः प्रजापतिमुखजाता
तजातो ब्रह्मणैव ब्राह्मणेनैवैनं रुद्रं नमस्करोति॥ ॥इतित्रयोदशाध्यायस्यप्रथमः खंडः॥ ॥अथवैश्वानरायपृष्टपुणाजसे

विपर्यासेन तस्मात्तेनाग्निमारुतशस्त्रस्य प्रारंभं विश्वेतवैश्वानरीयेणाग्निमारुतं प्रतिपद्यते वैश्वानरेण वा एतद्रेतः सिक्तं प्रच्या
वयतस्माद्वैश्वानरीयेणाग्निमारुतं प्रतिपद्यत इति रितः सः अव्यावर्तं कांश्चिमा पादनां तस्मिन्वैश्वानरीये सूक्ते किंचिद्विशे
षं विधत्ते ॥ अनवानं प्रथमामृचं शंसितव्याग्नीनामेषोर्ध्वोभ्यशांतामृशीदन्नेति पश्चाग्निमारुतं शंसति प्राणेनैव तद्दग्नी सरतो
ति । अवानशब्दे नोच्छ्वासनिश्वासावुच्येते तौ यथा न भवतस्तथा प्रथमामृक् शंसितव्या । तथा सति सर्वानग्नीन्वैश्वानरा रूपा
नग्नीनेव षड्होतारा शंता नरूत्वा प्रसीदन्प्रसादं कुर्वन्नेति गच्छति यः पुमानग्निमारुतशस्त्रं शंसति । तस्य प्रसादहेतुत्वं कथ
मिति तदुच्यते । उच्छ्वासनिश्वासनिरोधादनवानं संस प्राणवायुनैव तानग्नीन्स्तरस्तुस्त्वं घयति अग्निकृतमुपद्रवं शमय
तीत्यर्थः । शंसनकाले प्रमादिकस्य वर्णादिलोपरूपस्यापराधस्य प्रतीकारं दर्शयति । अधीय लुप्तस्यादनं विवक्षारमि
च्छेतमेव तत्सेतुं कृत्वा तरतीति । अधीयन्नधीयानः शंसनं कुर्वन्होता यद्युपहन्यात उपघातवर्णलोपं कुर्यात्तदानीमं
त्यक्तं चित्पुरुषं विवक्षारं विविक्तारं विविच्य वक्तुं समर्थं इच्छेत् । समीपेऽवस्थापयेत् । तदानीं तमेव पुरुषमपराधतरणोपायं
सेतुं कृत्वा तमपराधमुल्लंघयति । अयं पक्षोऽनुकल्पः मुख्यपक्षं दर्शयति ॥ तस्मादग्निमारुतेन वुच्चमेष्ट्व्यावविक्त इति । य
स्मात्प्रमादं कृत्वा विवक्तपुरुषसंपादनमुख्यं तस्मादग्निमारुते शस्त्रेनष्पुच्छुनपश्चा द्विवक्तव्यं किंतु प्रथममेव विवक्ता विवि

ब्रा० ३
५२

न्यवृक्तं समर्थो होत्रा एष्टव्यः प्रयत्नेन संपादनीयः। अथ प्रत्वक्षसः प्रतवस इत्येतन्मरुद्देवताकं सूक्तं विधत्ते। मारुतं शंसति
मरुतो ह वा एन दूतः सिक्तं धून्वंतः पाध्यावयंस्तस्मान्मारुतं शंसतीति। मनुतो भनवाइ विशोदाशेति मध्ये योनिं चानुरूपं च
शंसति तत्र घन्मध्ये योनिं चानुरूपं च शंसति तस्मान्मध्ये योनिं धत्त इति। यज्ञायज्ञीयस्येक प्रगाथः द्विवाकर्त्यति द्वितीयः। तत्र
प्रथमे प्रगाथे तृचः संपद्यते सोयं स्तोत्रियः तस्मिंस्तृचे सामगैः स्तूयमानत्वात्। अत एवासौ द्वयोर्मध्ये प्रथमभावित्वाद्योनिरि
त्युच्यते। द्वितीयप्रगाथे समुत्पन्नस्तृचोनुरूपः यादृशः स्तोत्रियस्तादृशत्वमनुरूपत्वं। तदेतदुभयं शस्त्रमध्ये शंसनीयं। ननु।
शास्त्रांतरेष्विव स्तोत्रियानुरूपयोरादौ शंसनीयं। तथा सति यस्मादत्र सूक्तमध्ये योनेरनुरूपस्य च शंसनं तस्मा ल्लोकेपि नारि
णां शरीरमध्ये योनिं धृत्वा शस्त्रमध्यतयाः स्थानविसेषं दर्शयति। यदुक्तं शस्त्वा शंसति प्रतिष्ठयोरेवतदुपरिष्टात्। जननं
दधाति प्रजात्या इति। यदु यस्मादेवकारणं ह्नियनीयमारुतं वैति ह्लसूक्तं शस्त्वा पश्चात्तौ स्तोत्रियानुरूपौ शंसति तस्मात्का
रणाद्विलसं स्थापितयोः प्रतिष्ठयोः स्थितिहेत्वोः पादयोरेवोपरिष्टाद्दूर्ध्वदेशे प्रजननं प्रजोत्पादकमिंद्रियं दधाति॥ तच्च प्रजा
संप्रयोत्पादनाय संपद्यते। वेदनं प्रशंसति॥ प्रजायते प्रजया पशुभिर्य एवं वेदेति॥ ॥इति त्रयोदशाध्याये एकादशः खंडः॥ ५२
॥ ॥अथ प्रतव्यसी मिसत जातवेदो देवताकं सूक्तं विधत्ते। जातवेदस्यं शंसतीति॥ ॥इति त्रयोदशाध्याये एकादशः खं

तु:॥ ॥अथ यत्तवासी मिसेत जातवेदो देवताकं सूक्तं विधत्ते॥ जातवेदस्यं संसतीति॥ ॥तदेतत्प्रशंसति॥ प्रजापतिः प्र
जा असृजत ताः सृष्टाः पराच्य एवायन्न आवर्तन्त ता अग्निना येयगच्छत्ता अग्निमुपावर्तन्त तमेवाद्याप्युपावृत्ताः सोऽब्रवी
ज्जि। ता वै प्रजा अनेनाविदमिति पदब्रवीद्धी ता वै प्रजा अनेना विदमिति तज्जातवेदस्यमभवत्तज्जातवेदस्त्वमिति।
पश्चात्प्रजापतिना सृष्टाः प्रजाः प्रजापतिं पृष्ठतः कृत्वा पराङ्मुखत्वेनैवागच्छन्न पुनः परावृत्ताः तदानीं प्रजा अग्निनाप
येगच्छत्परितोऽग्निप्राकारं कृतवान्। अतस्ताः प्रजाः हरं गंतुमशक्ता अग्निमुपेत्य पुनरावर्तनाय स्मादवंतस्मादद्या
पित्राजातीः प्रजास्तमेवाग्निमुपावृत्ताः परितो गच्छ सोपि अग्निं दृष्ट्वा समीपं कृत्वा सेवितुमावर्तन्ते। ततः संतुष्टो प्रजा
पतिरेनमब्रवीत्। जाता उ सन्नायाः प्रजास्ताः सर्वा अहमनेनाग्निना अविदं लब्धवानस्मि ज्ञातवानस्मीति वा। यस्मा
ज्ञातो अविदमनेनेस्तुतवान्। तस्मादग्निसंबंधि जातवेदस्यं सूक्तमभवत् जातवेदसोऽग्निरपि जातानां वेसनेनेति व्युत्पत्ता
तनामसंपन्नः। अपो हि ष्ठा मयोभुव इत्यादिकं तृचं विधत्ते। ता अग्निना परिगता निरुद्धाः शोचत्सादीध्यसो तिष्ठंस्ता अद्भिरभ्य। नी
षिंचत्तस्मादुपरिष्टाज्जातवेदस्यस्यापो हिष्ठीयं शंसति॥ अग्निना परिगताः परितो विशेषेण स्थिताः निरुद्धाः गंतुमसक्ताः सो
चंसशोकं प्राप्नुवंतो दीध्यतो दीप्यमानाः प्रजास्तत्रैवातिष्ठन्। प्रजापतिस्ताः प्रजाः संतापपरिहाराय अद्भिरभ्यषिंचत्।

57

ब्रा०३ ५३

यस्मादेवं तस्माज्जातवेदसा रक्षसां परिहार्थ आपो हि ष्ठेत्यादिकं तृचं समंत्रं । तत्रचं चिद्विशेषं विदधाति । तस्मात्तद्वचमयनेन शं स्त्यं तत्राङ्गिरिभिषिच्यति जात्तस्यैवाभ्यमन्त्रयति । यस्मादापोहिष्ठीयं तत्त्रयं शमनकारणं तस्मात्तत्समंतं तं होता शंसति । यं यथा वह्निं शमयन्पुरुषः शनैः शनैः क्रमेण जलं सिंचति । एवमनेनापि शनैः शंसनं कर्तव्यं । ततः स प्रजापतिर्ताः प्रजा अङ्गिरिभिषिच्यति जाएवस्वकीयाएवताः प्रजाः स्वमन्यताः स्यासब्दस्तच्छ्वदपर्यायः एकवचनेनापि बहुवचनेनापि त्वपरिणमपितयः तथासलिताः प्रजाः स्वस्तुकं भुवतिं तस्माच्छनैः शंशनेन प्रस्तस्यस्वकीयत्वं संपद्यतस्तर्थः । यद्यतात्र अङ्गिरिसाधर्थवाद उत्तरशेषत्वेन योजनीयः उत्तनो हि बुध्नस्य स्यास्त्वः संसनंत्त द्वितास्तुतिद्वारेणान्तपत्ति । तास्त्वा अहिनाबुध्नेन परोक्षेतेजोदधादेषहवा अहिर्बुध्न्यो यदग्निर्गार्हपत्यो ग्निनैवास्तेजः गार्हपत्येन परोक्षात्तेजो दधाति तस्मादाहुर्जुह्वदेवानुहुतो वसीयानिति । तास्तु अभिषेकाहर्ध्वे स्वकीयत्वेन स्वहस्ततास्तु प्रजास्तु प्रजापतिरहिनाबुध्ने अश्लिष्टेहि शब्दबुध्नस्य ध्वनामकाग्निविशेषणं परोक्षस्वरोक्षरूपेण तेजोदधात् प्रजानां संतापभीरुत्वात् तापथानपश्यंतितयातास्वग्निविशेषसंबंधितेजः स्थापितवान् । योगार्हपत्याग्निरास्त्विरस्ति राषरावाहि ५३ शब्देन बुध्नशब्देनाभिहितः । अत्रस्तद्द्वीयासं संनेसति गार्हपत्येनैवाग्निना प्रजास्तु परोक्षत्वेन तेजः स्थापयति

रा

यस्मादाग्नेयं तत्रोपेक्षितं तस्मादनुकृतो होमरहितात्पुरुषादनुक्रोऽप्यवहो मं कुर्वन्नेव पुरुषो वसीयान् असंभ्रेष्ठः
सेवं जनानामाकूः ॥ इति त्रयोदशाध्याये द्वादशः खंडः ॥ ॥ अथ देवानां पत्नीरुशतीरवंतु न इत्यृग्द्वयं देवपत्नीवताकं
विधत्ते । देवानां पत्नीः शंसेत्सन्नचीरग्निं गृहपतिं तस्मादनूची पत्नी गार्हपत्यमास्ते इति । देवानां पत्नीरित्यनेन दे
वतावाचके न सद्धेन तत्प्रतिपादकमृग्द्वयं विवक्षितं तस्य देवानां पत्नीः गृहपतिमग्निमनूचीः शंसेत् । गृहपति
रग्निरित्येताभ्यां शब्दाभ्यां तल्लक्षणादिकानेनोहि ध्न इति तु ऋग्विवक्षिता तदपेक्षया देवपत्नीनामकस्य मंत्रजा
तस्य पश्चाद्विलम्बनं अतः पूर्वोक्ताया ऋचः पश्चाच्छंसेदित्यर्थः । यस्मादेवं तस्माद्यज्ञशालायां पत्नी गार्हपत्य
मन्त्रपश्चादवतिष्ठत इत्यर्थः । अत्र केचित्पूर्वपक्षमुत्थापयंति । तदाहू राकां पूर्वां शंसेज्जाम्यै वै पूर्वपेयमिति ॥ सं
पूर्णचंद्रमंडलयुक्ता पौर्णमासी का रातदभिमानिदेवतायाः प्रतिपादिका ऋग्गिपि राकेत्युच्यते । तां राकां पूर्वां देव
पत्नीभ्यः पूर्वभाविनीं संशंसेत् । या राका देवानां जामीनाम भगिनी तस्मात्तस्या एव पूर्वपेयं प्रथमतः सोमपानं युक्तमिति
पूर्वपक्षः । तं निराकुर्वन्देवपत्नीनामेव पूर्वत्वं दर्शयति ॥ तत्तन्नादृत्यं देवानामेव पत्नीः पूर्वाः शंसेदेष ह वा एतत्पत्नीषु
रेतो दधाति यदग्निर्गार्हपत्योग्निनैवास्तु गार्हपत्येन पत्नीनपत्नीषु प्रसक्षारेतो दधाति प्रजात्या इति । राका याः पू

ब्रा॰३
५४

वेत्वमनादरणीयंदेवपत्नीनामेवपूर्वत्वंयुक्तंगार्हपत्यसोग्निपत्नीष्वेवरेतःस्थापयति॥ननुभगिन्यांनस्यात्पत्नीनांपूर्वत्वशं
सनेनप्रसक्तमेवपत्नीषुगार्हपत्यमुखेनरेतःस्थापयतितच्चप्रजासंसंपद्यते।वेदनंप्रशंसतिप्रजापतेप्रजयापशुभि
र्यएवंवेदेति।लौकिकोदाहरणेनपत्नीनांपूर्वभावित्वंभगिन्याःपश्चाद्भावित्वंचोपपादयति।तस्मात्समानोदर्यास्व
सान्योदर्यायैजायायाअनुजीविनीजीवतीति।पुरुषाणामेकोदरजापिभगिनीपरस्मैदीयतेभिन्नोदरजापिजाया
स्वार्थंस्वीक्रियतेनत्वासंनिपरस्मैदत्ताभगिनीयदाकदाचिज्ज्ञातेजायामनुसृत्यसंनदत्ताऽन्नयालाभ्यांजीवतीसतीजी
वतिकंचित्कालममवतिष्ठति।राकामहमितिस्वरूपंविधत्तेराकांशंसति।राकाहवाएतांपुरुषस्यसेवनींसीव्य
तियेषाशिश्नोधीति।देवतावाचिराकाशब्देनतदभिधापिस्रगभिधीयते॥तांशंसेत्पुरुषस्यशिश्नोधीति॥दे
वतावाचिराकाशब्देनतदभिधायिस्रगभिधीयते।तांशंसेत्पुरुषस्यशिश्नेधिशिश्नस्योपरिस्थितागुदवलयपर्य
न्तव्याप्तायेषासेवनीएतच्छब्दाउपस्थपदाभिधेयाशिरास्तितांशिरांराकाख्यादेवतासीव्यतिदृढबद्धांकरोतितस्मा
न्तदीयामृचंशंसेत्।वेदनंप्रशंसति।पुमांसोस्यपुत्राजायन्तेयएवंवेदेति॥पावीरवीकन्यासंतामृचंविधत्ते।पावीरवीं
शंसतितांवैसरस्वतीयावीरवीवाग्भवतवाचंदधीति।ति॥येयंवागभिमानिनीसरस्वतीदेवतासेवपाठस्यशोध

५४

सहेतुत्वात्सावीरवीतसाठेनवाच्येवदेवतायांमंत्ररूपायांवाचंस्थापयति।अत्रविचारमवतारयति॥तदाकुर्यामोर्वां
शंसेत्तपित्र्यां ३ इतीति।इयंयम्रमप्रस्तरेत्येषायमदेवताकत्वाद्यास्यम्याउदीतोरमठरइत्येषापितृदेवताकत्वात्सित्र्या।
उभयोःपौर्वापर्यकारणस्यानिश्चयाद्विचारःतदर्थोक्तिः।तत्रनिर्णयंदर्शयति॥यामिमेवप्रर्वांशंसेदिमंयमप्रस्त
रमाहिसीदेतिराज्ञोवैप्रर्वेपयंतस्माद्यामीमेवपूर्वांशंसेदिति।यमोहिराजायमःपितृणांराजेतिश्रुतत्वात्तराज्ञश्चप्रथम
पानंयुक्तं॥पूर्वोक्तयाम्याअनंतयामीविधत्ते।मातलीकव्यैर्यमोअंगिरोभिरितिकाव्यानामनूचीशंससवरेणैववेद
वान्काव्याःपरेणैवपितृत्स्यस्मात्काव्यानामनूचीशंसतीति।काव्यैरितिम्नुसंततरादियंकाव्याबाम्रकुसाचपूर्वोक्ताम्नव
मनुपक्ष्याकछतीसनुचीतांतथैवशंसेत्ककाव्यादेवानास्तोतारःकेचिद्धमजातिविशेषाः।पितरोप्युत्तमजातीयाः।
तदेवदेवानवरेणपितृन्परेणोसुच्यते।अतएवताकाइत्योविधत्ते॥उदीरतामवरउत्परासइतिपित्र्याःशंसतीति।उद
हृतंपादंद्वितीयपादेनसहव्याख्यातुंद्वितीयपादंपठति।उन्मध्यमाःपितरःसोम्यासइतीति।पादद्वयंव्याचष्टे।ये
चैवावमायेचपरमायेचमध्यमास्तात्सर्वाननंतरायश्रीणातीति।अवरेनिकृष्टाःपितरःउदीरतांउत्कर्षेणागच्छंतु।
परासउत्कृष्टाःपितरउदीरतांतथामध्यमाःनिकृष्टोत्कृष्टमध्येवर्तिनःपितरःउदीरतांतेत्रिविधानपितृननंतरा।

श्रा०३

यं कस्या पंतरायो यथा न भवति तथा तर्पयति ॥ विहितास्तु तिसृष्वृक्षु प्रथमायाउदाहृतत्वादनंतरभाविनी द्वितीया
मृचं दर्शयति । आहं पितॄन्त्सुविदत्रां अवित्सीति द्वितीयां शंसतीति ॥ तस्यास्त्वयस्तृतीयया यादमनूघवाचष्टे बर्हि

५५

षदो ये स्वधया सुतस्य भजंत ह्रावात एषां प्रियं धाम यद्बर्हिषद इति प्रियेणैवैनान्स्वधाम्ना समर्द्धयतीति । बर्हिषि दर्भेऽसी
दंतः पविशंतीति बर्हिषदः पितरः अत्र बर्हिषद इति यदुच्यते एतद्धैवैतदेव बर्हिरेषां प्रियं स्थानं तस्मादेतत्पाठेनैता
न्पितॄन्प्रियेणैव धाम्ना स्थानेन समृद्धान्करोति । वेदनं प्रशंसति ॥ प्रियेण धाम्ना समृध्यते य एवं वेद इति ॥ तृतीयामृ
चं दर्शयति । इदं पितृभ्यो नमो अस्त्वद्येति नमस्कारवती मंत्रतः प्रशंसति तस्माद्यतः पितृभ्यो नमस्क्रियत इति । अ
स्यामृचि नमो अस्त्विति श्रूयमाणत्वादियं नमस्कारवती तामेतांति स्ॠणां पित्र्याणां मंत्रे शंसेत् । यस्मादेवं तस्मादृ
क्ष्व्यांतं नमो वः पितर इत्यादिना पितृभ्यो नमस्कारः क्रियते । शंसेत् । अव्याहावो २ इति । आहावमेव शंसेदसंस्थि
तं । वै पितृयज्ञस्य साध्वसंस्थितं वा एष पितृयज्ञं संस्थापयति यो आहावं शंसति तस्मादाहावमेव शंस्तव्यमिति ॥
शोंसा वोमिति मंत्र आहावः । अनेन मंत्रेण प्रस्तुत चंद्राहावं विशेषेणाहूयाहूय किं तिसृः पित्र्याः शंसेत् । आहो स्विद्व्या ५५
हावं तस्थ कस्य गाहाव मंत्रं विनाशंसेदिति विचारं । ब्रह्मवादिनस्त्वाहुः । अत्र पित्र्याः शंसतीसकैनैव विधिनाविहित

त्वात्पृथक्पृथगाहावो नास्तीति पक्षः प्रतिभाति । पुनरपि द्वितीयांशं सति नमस्कारखंनी शंसतीति पृथक्त्वविधिद
र्शनात्प्रत्येकमाहावः कर्तव्य इत्यपि प्रतिभाति विचारार्थं स्तुतिद्वयं । तत्र पृथक्पृथगाहावो वृएे सिद्धांतः । तत्रैवमुप
पत्तिः पितृयज्ञस्य संबंधि पदं गमस्य स्थितमेव वर्तते असमाप्तं तिष्ठति । तदंगं साधु समाप्तं कर्तव्यं । यो होताऽपृथगाहा
वं कृत्वा शंसति । एष होता पूर्वमसंस्थितं तमसमाप्तं पितृयज्ञं संस्थापयति । तस्मात्पृथक्पृथगाहावमंत्रपठितेवशं
स्तव्यं ॥ ॥ इति त्रयोदशोऽध्याये त्रयोदशः खंडः ॥ ॥ अथ वक्तव्यस्तृचो विधत्ते ॥ स्वादुष्किलायं मधुमां उतायमिति
द्रस्येद्रीरनुपानीया शंसेत्ताभिर्वा इंद्रस्तृतीयसवनमन्वपिबत्तदनुपानीयानामनुपानीयात्वमिति । स्वादुष्किला
यमित्यादिकास्तृचः । ऐंद्र्यः इंद्रदेवताकत्वात्तमपिबत्सम इंद्रमिति इंद्रस्तृतीयपादे श्रूयते । त । श्च इंद्रस्यानुपानीयः भो
जनाहूर्ध्वं यस्मात्तत्पश्चाज्जाविता दनुपानत्वेस्तानीय एतास्तृचः । ताः संसेत । कथमिवासामनुपानीयात्वमिति त
दुच्यते अयमिंद्रस्तृतीयसवनमनुपश्चादेताभिरस्त्रिः शस्यमानः सन्सोममपिबत्तस्मादनुपानीयेति नामसंपन्नं ।
एतच्छंसनकालेऽध्वर्योः प्रतिगरमंत्रे विशेषं विधत्ते । माद्यंतीव चेत्तर्हि देवतायदेतहोता संसति तस्मादेतास्तु मदत्वतीति गी
र्येमिति । तस्मिन्ननुपानीयानामृचां शंसनकाले हेतुः शंसनं श्रुत्वा देवताः सर्वा माद्यंतीव वै ॥ सर्वथाह्यध्वं सवत ।

स्मात्कारणादेता स्तु विष्णुशस्यमाना स्वध्वर्युणामद्य ल्पतिगीर्यं मदिधातुयुक्तं प्रतिगरणं पठनीयं मदामोदैवेत्स्यमदिधातुयु
क्तः प्रतिगरणमंत्रः स एतेनरं विधत्ते ॥ ययोरोजसा स्कभिता रजांसीति वैष्णुवारुणीमृचं शंसति विष्णुर्वै यज्ञस्य दुरि
ष्टं पाति वरुणः स्विष्टं तयोरुभयोरेव शांत्या इति ॥ विष्णुवारुणश्चमिति त्वा देवतायस्या ऋचः सा वैष्णुवारुणी तां जपे
च्छंसेदित्यर्थः । तस्यां अश्वलायने पादे विष्णुरेतन्वरुणेति श्रवणात् । वैष्णुवारुणीत्वं । सा चाश्वलायनेन पठिता दुरिष्टं
गविकलं यदनुष्ठितं तद्विष्णुः पाति विकलं निवारयतीत्यर्थः । स्विष्टं साकल्येन यदंगमनुष्ठितं तद्वरुणः पाति तस्य फ
लप्रतिबंधं निवारयतीत्यर्थः । तस्मादियमृक्तयोरुभयोर्विष्णुवरुणयोरेव शांत्यै संपद्यते । विष्णोर्नु कं वीर्या
णि प्रवोचमिति वैष्णवीं शंसति यथा वै मत्यमेवं यज्ञस्य विष्णुस्तद्यथा दुष्कृष्टं दुर्मतो कृत्सुकृष्टं सुमतो कृतं कुर्वन्नियादे
वमेवैतद्यज्ञस्य दुष्टं दुःशस्तं सुष्टं सुशस्तं कुर्वन्नेति यदेतां होता शंसति । विष्णोरिति श्रूयमाणत्वादियं वैष्णवी मंत्रो
दुष्टोसम्यक्कृते न प्रतिभातकार्यं मत्यं । अयं दृष्टांतः विष्णुर्दार्ष्टांतिकः । यथा मत्यं कार्यं लोके फलपर्यवसायि भवति तथा
विष्णुरपि फलपर्यवसायीत्यर्थः । उक्तयोर्दृष्टांतदार्ष्टांतिकयोः वासयंतद्यथेत्यादिना प्रथमं पंचमेन तथा लोके दुष्कृष्टंकृषंकृः स
सस्य स्थाने दोपक्तस्य प्राभवति तथा कर्षणं कृतं । यत्किंचिद्राजकार्यं ममासे दुर्मुती कृतं दुष्टं मतं अन्यथा चिंतितं पूर्वं तत्का

यं अनुमेतं सत् पश्चाद्बुद्धिप्रमादात् दुर्मतं संपादितं तत्र कश्चित्। बुद्धिमान्कर्षकः कृष्टस्थाने उष्टस्तृणादेरपनयनेन सुकृ
ष्टं कुर्वन्नियात्। कर्मकस्पष्टेत्नागच्छन् राजकार्यमपि दुर्बुद्धिना मात्येन दुर्मतीकृतं कश्चित्तु बुद्धिरमासः समीकुर्वन्
गच्छेत्। यथैतत् उभयं लोके एवमेवास्मिन् कर्मणि यजमानस्य संबंधि यत्स्तोत्रमकुशलैरुद्गातृभिर्दोषसहितं यदपि होतृभिः श
स्त्रं दोषसहितं पठितं तदुभयमपि विष्णुः क्रमेण सुष्टुतं सुशस्तं कुर्वन्नेति गच्छति। तेन सर्वदोषपरिहरतीत्यर्थः। यद्यदा
वेलवी मतो होतृणां संतति तदा तदुभयसमाधानमिति दृष्ट्वा अंतरं विधत्ते। तंतुं तन्वन्नत्र जसो भानुमन्विहीति प्राजा
पत्यां शंसति प्रजा वै तंतुः प्रजामेवास्मा एतत्संतनोति। अस्यामृचि कश्चिदपि देवतासाक्षाद्वाचकशब्दो नास्ति
तस्मादियमनिरुक्ता प्राजापत्या अनिर्दिष्टदेवताप्रजापतित्वेनाकल्प्यमेवं निरूपितं नामेतां प्राजापत्यां शंसेत्। हे प्रजापते
तंतुं तन्वन् पुत्रपौत्रादिसंततिं विस्तारयन् रजसो रज आत्मकस्य जगतो भानुं भासकमादित्यमन्विहि अनुरुध्य गच्छ।
आदित्यो हि पुनः पुनः संचरन्नहोरात्रनिष्पत्तिं करोति तत्कालानुसारेणैव सर्वमपि संतानवृद्धिं कुर्वित्यर्थः। अस्मिन्मा
देतं तु शब्देन पुत्रपौत्रादिप्रजा विवक्षिता तत्तु वक्तव्य विस्तार्यमाणत्वात्तस्मादेतत्पाठेनास्मै यजमानाय प्रजामेव संतनो
ति अविच्छिन्नां करोति। द्वितीयपादमनूद्य व्याचष्टे। ज्योतिष्मतः पथो रक्ष धिया कृतानिति देवयानानावेज्या।

८८

प्रा०उ

५७

तिष्ठंतः पंथानस्तानेवास्मान्नैऽन्तर्हितनोत्सनुल्बणंवयतन्त्नोगुवामपोसनुर्भवजनयादैव्यंजनमिसेवैनंतन्तुनोप्र
ज्ञासाइतितीति। हेप्रजापतेधियाकृतान्यागाद्यनुष्ठानवुध्यासंपादितान्ज्योतिष्मतः प्रकाशयुक्तान्पथ्यस्वर्गमार्गा
न्रक्षविघ्नपरिहारेणपालयाअत्रज्योतिष्मत्पथिशब्दाभ्यांदेवगमनमार्गाविवक्षिताः देवायेषुमार्गेषुयांतितेदेव
यानाः सर्वेषांदेवानांतेजस्वित्वात्तन्मार्गेषुनकदाप्यंधकारोस्तितस्मादेतत्पादेनास्मेयजमानायतानेवमार्गान्नेतावि
स्तारयति। उत्तरार्द्धमनूद्यव्याष्टे। अनुल्बणं। इत्सीति। पुनः पुनः कर्मसुगच्छंतिप्रवर्त्तंतेइतिअनुष्ठानशीलाजोगुवा
शब्देनोच्यंतेतादृशानांजोगुवामस्मत्संनत्तावुसन्तानांपुत्रादीनांअपोनुष्ठीयमानमेतत्कर्म अनुल्बणंअनतिरिक्तंवय
नेहप्रजापतेवय। निर्वह। वकुवचनंप्रजार्थं। मनुर्भवत्वमपिमनुष्योसादनार्थंमनुरूपोभवततोदैव्यंदेवताराधनयोग्यंज
नंपुत्रादिरूपंमनुष्यंजनयोसादय। तत्तमार्द्धपाठेनेनयजमानमनोः संबंधिन्याप्रजयामनुष्यरूपयासंततोतिसंयोजयतित्कत्व
प्रज्ञासेयजमानस्यप्रयोसादनायसंपद्यते। केदनप्रशंसति। प्रजापतेप्रजयापशुभिर्यएवंवेदेति। इत्युत्तरेणशस्त्रसमाप्तिंवि
धत्ते। एवानांइन्द्रामघवाविरप्शीत्सुत्तमायापरिदधातीयंवाइन्द्रोमघवाविरप्शीति॥ योयमिंद्रोस्तिसोयंमनएवास्मदर्थमेवकूर
तंकरोतीतितद्वितीयपादेवक्ष्यमाणेनसंबंधः। कीदृशइन्द्रः मघवाधनवान्तथाविरप्शीरभराभस्वाइसस्मात्वानोरुसन्त्रोपश्रा

५७

द्वः विशेषेणराभसवान्सर्ववेदोद्युक्त इत्यर्थः। अनयर्चोत्तमर्यशस्त्रापेक्षयांतिमयापरिधानंकुर्यात्। उद। हृत्ते प्रथमपादे इंद्रादि
शब्दैः सर्वैरपीयं वेश्ममिवोरपलक्ष्यते। अनया भूमिस्पर्शस्य विधास्यमानत्वात्। द्वितीयपादमनूद्य व्याचष्टे। कृनत्ससाच
र्षणी धृदन्वैत्तीयं वैससाचर्षणीधृदन्वेत्ति। चर्षणीशब्दो मनुष्यवाची तान्धारयति पोषयतीति चर्षणीधृदिंद्रः। सोयमन
वीत्यं परिस्म्यागभूमावुपविष्टत्वात्त्रथ्यंवरहितः तादृशः सन्नु सत्साफलप्रदानस्यावश्यकत्वेन सत्सानि कर्माणि कृतत्व
रान्नु विघ्नपरिहारेण संपादयतु अस्मिन्नपि पादे ससादिपदैः पूर्ववदियं भूमिरेवोपलक्षणीया। तृतीयपादमनूद्य व्याचष्टे। त्वे
राजाजन्त्वां धेयस्मेइत्तीयं चैराजाजनुषामिति। जानुषा जाता नो अस्मे अस्माकं त्वं जाहरू खाजाभृत्वाधेहि वक्ष्यमाणम
भीष्टं संपादय। अस्मिन्नपि पादे राजाजनुषा मित्रि पदद्वयेन पूर्ववदियं भूमिरेवोपलक्षणीया। चतुर्थपादमनूद्य व्याचष्टे। अधि
श्रवोमाहिनं यज्जनित्र इत्तीयं वे माहिनं यज्ज श्रवो यजमानो जरितायजमानाय वैतामाशिषमाशास्त इति। जरित्रे स्तोत्रे यजमाना
ययस्मासि त्वं माहिनं महत् श्रवः कीर्तिं च अधि धेहि इति पूर्वेणान्वयः। हइद्रं आधिक्येन संपादयेत्यर्थः। अस्मिन्नपि पादे मा
हिनमित्यनेनेयं भूमिरेवोपलक्षणीया। पञ्छ्वेन पुंसकलिंगः। पदति पुल्लिंगत्वेन विपरिणमपि तन्वयः तेनयोयज्ञ इति प्रसि
द्धं यज्ञमाचष्टे। सोपी यभूमिरेव। के तिवाचिनाम्नत्वः शब्दो नापि भूमिरेवोपलक्षणीया। यमानो जनित्र शब्देनाभिधेयः ए

प्रा॰३
५८

तस्मादृच्चतुष्टयपाठेन होतायजमानार्थमेवाशासनीयं सर्वं प्रार्थयते। परिधानकाले होतुर्भूमिस्पर्शो विधत्ते। तदुपस्पृशन्भू-
मिं परिदध्यात्तद्यस्यामेव यज्ञं संभरन्ति तस्यामेवैनं तदन्ततस्तत्समाप्तिपर्यन्तं प्रतिष्ठापयति। अपशब्दयाज्यां विधत्ते। अग्ने
मरुद्भिः शुभयद्भिर्ऋक्वभिरित्यग्निमारुतमुक्थं शस्त्वाग्निमारुत्याय यजति यथाभागं तद्देवताः प्रीणातीति। अग्निमरुत्त्वयस्मा
कमस्य शस्त्रस्य देवता तदाग्निमारुतमुक्थं पूर्वोक्तप्रकारेण शस्त्वा तत ऊर्ध्वमग्ने मरुद्भिरित्येतया मारुत्या यजेत्। अग्निमारु-
तयाज्यां पठेदित्यर्थः। तथा सति तस्मिञ्छस्त्रे प्रतिपादिता यावत्यो देवताः सन्ति। ताः सर्वास्तत्र गमनेन तृप्तिक्रमेण तर्पयति। अथा
सोध्यायसमाप्त्यर्थः॥ ॥इति माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणेष्टादशाध्याये चतुर्दशः खंडः॥ समाप्तश्चाध्यायः॥ ॥
त्रयोदशे सोमकथा प्रकीर्तिता भाजक्रपार्थसव। नाग्नेयापि च। साद्विस्वदेवं च मरुत्वती यं ततो द्विपणाउदितः क्रमेण। अथ च-
तुर्दशाध्याये प्रोक्तोऽग्निष्टोमः सर्वयज्ञक्रतूनां प्रकृतित्वेन स्तूयते॥ तदर्थमुपाख्यानमाह॥ देवा वा असुरैर्युद्धमुपप्रायन्वि-
जयाय तानग्निर्नान्वकामयतैतुं तं देवा अब्रुवन्नपि त्वमेह्यस्माकं वै त्वमेकोऽसीति स नास्तुतोन्वेष्यामीत्यब्रवीत्स्तुत नु मेति त-
थेति तं ते समुत्क्रम्योपनिवृत्यास्तुवंस्तान्स्तुतोऽनुप्रैदिति॥ यदा देवा विजयार्थमसुरैः सह युद्धं उपक्रान्तवन्तः। तदानीम-
ग्निस्तान्देवाननुपश्चादेतुं आगन्तुं नाकामयत। अग्निमित्थं रहितं देवा एवमब्रुवन् हे अग्ने त्वमप्यस्मान्प्रत्यागच्छ अस्माक-

५८

मेवमध्येत्वमेकोऽसि न त्वं नोमऽइति । ततः सोऽग्निरेवमब्रवीत् युष्माभिरस्तुतः सन्नहं नालं ऽस्यामि युष्माकं पृष्ठतो न गमिष्यामि तस्मा
न्तु क्षिप्रमेवमा स्तुत स्तोत्रं कुरुतेति देवास्तथेसंगीकृत्य समुत्क्रम्यौ छायोपनिवृत्याग्नेरभिमुखत्वेन निवृत्तिं कृत्वा तमग्निमस्तु
वन् । सोऽप्यग्निः स्तुतः सन्तान्देवाननुसृत्य सैतयुद्धार्थं प्रकर्षेण गच्छन् । अग्नेर्युद्धप्रकारं दर्शयति । स त्रिश्रेणिर्भूत्वा त्र्य
नीकोऽसुरान्युद्धमुपप्रायद्विजयाय त्रिश्रेणिरिति छंदांस्येव श्रेणीरकुरुत त्र्यनीक इति सवनान्येवानीकानि कानि तानुसंव
पराभावयत्तत्रो वेदवा अभवन्पराऽइति ॥ सोऽग्निर्विजयाय त्रिः श्रेणिः सोमपानपंक्तित्रययुक्तः त्र्यनीकस्त्रिभिस्तोकैः सेनाप
तिरूपैसेनामुखैर्युक्तः ऽसुरान्प्रतियुद्धमुपप्रायत् तत्समीपं प्रकर्षेण गतवान् त्रिश्रेणिरिति यदुक्तं तत्र गायत्रीत्रिष्टुब्जगती
रूपाणि छंदांस्येव तिस्रः श्रेणीरकुरुत त्र्यनीक इति यदुक्तं तत्र प्रातःसवनमाध्यंदिनतृतीयसवनान्येव त्रीण्यनीकानि सेनानु
खान्यकुरुत ततः स तानसुरान्पुनः शत्रुशोषोपयानसंभावनेनत्थापराभावयत् पराभूतानकरोत् ततो युद्धे देवा विजयिनो
भवन्नसुराः पराभूताः । वेदनं प्रशंसति ॥ भवत्यात्मनापरास्य द्विषन्भ्रातृव्यो भवति य एवं वेदेति ॥ एवमग्निः छंदस्त्रयस
व[illegible]युक्तोऽग्निष्टोमरूपोऽभवदिसेकेन प्रकारेणाग्निष्टोमं स्तुत्वा पुनरपि प्रकारान्तरेण स्तौति । सा वा एषा गायत्र्येव । ॐ ।
ययदग्निष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणीति । योऽयं पूर्वोक्तोऽग्निष्टोमोऽस्ति सा वा

57

एषा गायत्र्येव। अग्निष्टोमगायत्र्योः संख्यासाम्यात् गायत्रीगतेष्वक्षरेषु यासंख्या सैवाग्निष्टोमगतेषु स्तोत्रशस्त्रेषु। तथाहि।
बहिष्पवमानः माध्यंदिनपवमानः आर्भवः पवमान इति त्रीणि पवमानस्तोत्राणि। चत्वार्याज्यस्तोत्राणि चत्वारि पृ
ष्ठस्तोत्राणि चत्वार्युक्थस्तोत्राणि एकं यज्ञायज्ञीयं स्तोत्रं एवमेतानि द्वादश संपन्नानि। शस्त्राण्यपि तावन्त्येव। आज्यप्रउ
गनिष्केवल्यमरुत्वतीयवैश्वदेवाग्निमारुतानीति होतुः शस्त्राणि षट् तथा होत्रकाणामपि षट् एवं स्तोत्रशस्त्रसंख्ययाः
ग्निष्टोमस्य गायत्रीरूपत्वं। प्रकारान्तरेण गायत्रीसाम्यं संपाद्य प्रशंसति।। तद्ध्यदिदमाहुः सुधायां ह वै वाजी सुहितो द
धातीति गायत्री वै तत् न ह वै गायत्री क्षमा रमत ऊर्ध्वा ह वा एषा यजमानमादाय स्वरेतीत्यग्निष्टोमो वै तन्न ह वा अग्निष्टो
मः क्षमा रमत ऊर्ध्वो ह वा एष यजमानमादाय स्वरेतीति तद्धैतद्वैकयज्ञस्य भाषा वेदवादिनो यदिदं वचनमाहुः ।।१।।
किं वचनमिति तदुच्यते। सुष्ठु धीयते सुकृतिनां संदिनसाध्यैः सुधमस्याम। वाजी वाजोऽन्नं सोऽस्मिन् रूपं यस्मिन्नस्ती।
सोऽग्निष्टोम उच्यते स च सुहितः साधु एषनानुष्ठितो दधाति सुधायां द्वाभ्यां यां दिवि यजमानं स्थापयती इतिय हद्वादि
नां वचनं तत् गायत्री वै गायत्री साम अभिप्रेत्य चाल्पमिसर्थः। नैवात्र सादिनामदेवस्पष्टीक्रियते। क्षमेति सप्तम्यर्थो विव
क्षितः क्षमायां भूमौ गायत्र्याख्या देवतानाह वै नमते नैव क्रीडति किं तर्हि एषा गायत्री ऊर्ध्वा ह वै ऊर्ध्वगामिनेच भूत्वानु

५९

ष्ठितवते ऽयजमानादाय स्वरेति स्वर्गं प्राप्नोति एवं प्रकारेणायं गायत्री वर्णिता नन्वायत्री रूपोग्निष्टोम एव तत्तयोः समत्वात्।
अग्निष्टोमेपि क्षमायां नरमते किं खलु ष्टितउ र्ध्वगामी सन्नेष यजमानमादाय स्वर्गं प्राप्नोति ॥ इत्थं गायत्री साम्येन स्तुत्वा सं
वत्सर एव यदग्निष्टोमश्चतुर्विंशत्यर्धमासो वै संवत्सरश्चतुर्विंशतिरग्निष्टोमस्य स्तुशस्त्राणीति। योयमग्निष्टोमः स ए
ष संवत्सर एव। अर्द्धमाससंख्यायाः स्तोत्रशस्त्रसंख्यायाश्च समानत्वात्। समुद्रसाम्येन प्रशंसति। तं यथा समुद्रं स्रोत्या
एवं सर्वे यज्ञक्रतवोपि यंतीति। स्रोतसाः प्रवाहरूपाः प्रकृतिरूपं तमग्निष्टोममपियंति प्राप्नुवंति अग्निष्टोमात्प्राचीनाः द
ष्टिपशुबंधादयोपि तमग्निष्टोमं प्राप्नुवंति। तथा सति सर्वशब्दो मुख्यार्थः संपद्यते न तु संकोचः॥ ॥ इति चतुर्दशाध्या
ये प्रथमः खंडः॥ ॥ अग्निष्टोमादपि प्राचीनानां यज्ञानामग्निष्टोमप्राप्तिं दर्शयति। दी। क्षणीयेष्टिस्तायत्तनामेवानुया
काश्चेष्टयस्ताः सर्वा अग्निष्टोममपियंतीति॥ अग्निष्टोमस्य प्रारंभे यं पंदीक्षणीयेष्टिस्तायत्ते विस्तायेतेत्तामनुतत्साद
श्येन वेदोक्ताः सर्वा अपि इष्टयो ऽग्निष्टोमं प्राप्नुवंति अत्र विकृतिरूपा एवेष्टयो विवक्षिताः प्रकृतिरूपयोर्दर्शपूर्णमासयोर्वि
क्ष्यमाणत्वात्। दीक्षणीयेष्टिगत चोदकप्राप्तजेया क्रान्तसादृश्येन पाकयज्ञानामग्निष्टोमप्राप्तिं दर्शयति॥ इलामुपह्वयत्त इला
विधा वै पाकयज्ञा इलामेवानुयंके च पाकयज्ञास्ते सर्वे ग्निष्टोममपियंतीति॥ पाकयज्ञाश्च सप्तसंख्याकाः हुतः प्रहुतः आहु

(४४)

ब्रा०
६०

तः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति। सोयं सूत्रांतरकारस्य पक्षः आश्वलायनस्तु हुतादीन् त्रीन् पाकयज्ञा
नाह। तेन पाकयज्ञा इलाविधाः। इलासदृशाः इला वा लवणा याकयज्ञ इति स्मृत्यंतरगततत्वोदीक्षणीयेष्टा विडापाकाने
न तत्सदृशाः पाकयज्ञाः सर्वेप्यग्निष्टोमं प्राप्नुवंति। अग्निहोत्रस्य तत्प्राप्तिं दर्शयति॥ सायंप्रातरग्निहोत्रं जुह्वति सायंप्रा
तर्व्रतं प्रयच्छंति स्वाहाकारेणाग्निहोत्रं जुह्वति स्वाहाकारेण व्रतं प्रयच्छंति स्वाहाकारमेवान्वग्निहोत्रमग्निष्टोममप्येतीति
। प्रत्यहं प्रतिदिनं कालद्वयेग्निहोमस्तथा दीक्षितस्य कालद्वये क्षीरपानरूपं व्रतदानं अग्नये ज्योतिर्ज्योतिः सूर्यो ज्योतिरग्निः स्वा
हेति यथा स्वाहाकारेणाग्निहोत्रहोमः तथा तेन पांतु ते नो वत्सुते भ्यो नमस्ते भ्यः स्वाहेति स्वाहाकारेण दीक्षिता व्रत
प्रदानमाचरंति अतो व्रतगतं स्वाहाकारमेवानुसृत्याग्निहोत्रस्याग्निष्ट। मप्राप्तिः। अग्निष्टोमगतप्रायणीयेष्टिसादृ य
श्येन दर्शपूर्णमासयोरग्निष्टोमप्राप्तिं दर्शयति॥ पंचदश प्रायणीये सामिधेनीरन्वाह पंचदश दर्शपूर्णमासयोः प्रायणी
यमेवानु दर्शपूर्णमासावग्निष्टोममपीत इति। प्रायणीयकर्मणि धाय्यारहितत्वात् सामिधेन्यृक्षु आदकप्राप्ताः पंचदशत्वं त
था प्रकृतिभूतयोर्दर्शपूर्णमासयोरपि। अग्निष्टोमगतसोमद्वारा लौकिकानामपि सर्वेषामोषधीनामग्निष्टोमप्राप्तिं द ६०
र्शयति। सोमं राजानं क्रीणंत्योषधयो वै सोमो राजौषधीभिरभिषज्यंति सोममेव राजानं क्रीं। यमाणमनुयन्तिक्री

निंच भेषजानि तानि सर्वाण्यग्निष्टोममपियंतीति ॥ लोके यं व्याधियस्तं चिकित्सका भिषज्यंति चिकित्संते तं पुरुषं ओषधि
भिरन्नैर्वल्यादिभिश्चिकित्संते सोमस्याप्योषधत्वात्तममनु सर्वाण्योषधान्यग्निष्टोमं प्राप्नुवंति ॥ अग्निष्टोमग
तातिथ्यक्रमद्वाराच्चातुर्मास्ययागानां तत्प्राप्तिं दर्शयति ॥ अग्निमातिथ्येमंथंत्यग्निं चातुर्मास्येष्वातिथ्यमेवानु चातुर्मा
स्यान्यग्निष्टोममपियंतीति ॥ प्रवर्ग्यसाम्येन दाक्षायणयज्ञस्याग्निष्टोमप्राप्तिं दर्शयति ॥ पयसा प्रवर्ग्ये चरंति पयसा
दाक्षायणयज्ञे प्रवर्ग्यमेवानु दाक्षायणयज्ञोग्निष्टोममप्येतीति ॥ दर्शपूर्णमासयोरेव गुणविकृतिरूपः कश्चिद्दाक्षा
यणाख्यो यज्ञः तथा च सा श्वान्तरे दर्शपूर्णमासरात्रिधौम्ब्रूयते । दाक्षायणयज्ञेन स्वर्गकामो यजेतेति । तस्य च प्रवर्ग्यस्य
च क्षीरद्रव्येण साम्यं । पशुबंधानामग्निष्टोमप्राप्तिं दर्शयति ॥ पशुरुपवसथे भवति तमेवानु येके च पशुबंधास्ते सर्वे
ग्निष्टोममपियंतीति । सुत्यादिवसात्पूर्वो दिवस उपवसथः तस्मिन्नग्नीषोमप्राप्तिं दर्शयति । इलादधे । नामज्ञ
क्रतुसंदध्याच्चरंति दध्याद्दधिधर्ममेवानु इलादधोग्निष्टोममप्येतीति । दर्शपूर्णमासविकृतिरूप एव क
श्चिदिलादधनामको यज्ञोस्ति । अत एवापस्तंबो दर्शपूर्णमासप्रकृतिकावेव माह । एते नैलादयः सांवत्सरिक यज्ञा व्यसि
ष्ठयज्ञः शौनकयज्ञश्च व्याख्याता इति । दधिधर्मनामकस्त्वग्निष्टोमगतः तयोरुभयोर्दधिद्रव्येण साम्यं ॥ ॥ इति चतुर्द

प्रा०३

प्राध्याये द्वितीयः खंडः ॥२॥ "क्रतूनां तराणामग्निष्टोमप्राप्तिं दर्शयति ॥ इतिनु पुरस्तादथोपरिष्टात्पंचदशो अस्य स्तोत्रा
णि पंचदश शस्त्राणि समासो मासमथा संवत्सरो विहितः संवत्सराग्निर्वैश्वानरोऽग्निरग्निष्टोमः छंदः संवत्सरमेव त
द्धोऽग्निष्टोममप्येतु छंदमपि संतमनु वाजपेय योप्यसत्सु छंदो हि स भवतीति। इतिनु पूर्वखंडोक्तप्रकारेणैव पुरस्ताद
ग्निष्टोमात्प्राचीनस्य क्रमेजातस्याग्निष्टोमप्रवेशः उक्त इति शेषः। अथानंतरमुपरिष्टादित्येषां क्रतूनां नानात्ववश्य उ
च्यते तत्र यायमुक्तः। ऋतुस्तस्य पंचदशसंख्याकानि स्तोत्राणि अग्निष्टोमविकृतित्वात्। यानि द्वादश स्तोत्रा
णि पर इति दिश्यंते। ततऊर्ध्वं त्रीण्युक्थसंज्ञाकानि स्तोत्राणि। एवं पंचदश संपद्यंते। शस्त्रेष्वप्येवमेव योज्यःतानि
शस्त्राणि स्तोत्राणि च मिलितान्यासगतां रात्रिसंख्यां प्राप्नुवंति अतः सोयं स्तोत्रशस्त्रसमूहो मासो ः संपद्यते म
सधा मासप्रकारेण मासावृत्त्या संवत्सरो विहितः संपादितो भवति स च संवत्सरो वैश्वानराग्निरूपः गर्भं प्रविष्टस्य पु
रुषस्य संवत्सरमात्रेण वैश्वानराख्यस्याद्यग्नेः पाटवसंभवादग्निश्चाग्निष्टोमस्वरूपः सर्वोत्कर्षात्साम्येन त्रयरू
पेणाग्नौ क्रतुत्रयरूपेण वैश्वानरे वाग्निष्टोमरूपेणाविभक्तत्वात् एवं सति छंदःसारख्यः क्रतुः स्तोत्रशस्त्रादिपरंपरसं
रया संवत्सरमेवानुप्रविश्य तद्द्वाराग्निष्टोमं प्रविशति। सैव तं विशंतं छंदसमनुवाजपेयाख्योऽपि क्रतुरग्निष्टोममप्येति।

प्राप्नोति स हि वाजपेयः अस्तु सोमभवन्निति नु रवं क्रतुमतिक्रमवर्त्तमानत्वात् ऊर्ध्वं यानि पंचदशस्तोत्राणि तत ऊर्ध्वं वा
जपेये स्तोत्रद्वयं सोयमुक्थ्यातिक्रमः तस्मादुक्थ्याद्वारा वाजपेयस्य संस्थापि ।। अथातिरात्राप्तोर्यामयोः क्रत्वोरग्निष्टोमप्र
वेशं दर्शयति ।। द्वादशरात्रेः पर्यायाः सर्वे पंचदश स्तोत्रे द्वौ द्वौ संपद्यत्रिंशदेकविंशं षोडशिसाम त्रिवृत्संधिः स त्रिंशत्स
मो सस्त्रिंशन्मासस्य रात्रयो समो धा संवत्सरो विहितः संवत्सरोग्निर्वैश्वानरोग्निरग्निष्टोमः संवत्सरमेवाप्नोत्यतिरात्रो।
ग्निष्टोममप्येत्यतिरात्रमपि पर्यंतमनप्तोर्यामोप्येति सतिरात्रो हि स भवतीति ।। अतिरात्रयागे द्वादशसंख्याका रात्रेः प
र्यायाः ते चापस्तंबेनैव स्पष्टीकृताः ।। अतिरात्रमेव षोडशिनममी मुनयस्तत्र त्रयोदशभक्ष्यमसगणेभ्यो राजानमभि
ष्वयति षोडशिना प्रचर्य रात्रिपर्यायैः प्रचरति होतृचमसमुख्यः प्रथमो गणो मैत्रावरुणचमसमुख्यो द्वितीयो ब्राह्मणा
च्छंसिचमसमुख्यस्तृतीयो च्छावाकचमसमुख्यश्चतुर्थः। प्रथमाभ्यां गणाभ्यामध्वर्युश्चरत्युत्तराभ्यां प्रतिप्रस्थातैष प्रथमः
पर्याय एवं विहितो द्वितीयस्तृतीयश्चेति ।अस्यायमर्थः ।। अतिरात्राख्यं क्रतुं यदानुतिष्ठति तदानीं चोदकप्राप्तं स
र्वमनुष्ठाय अनंतरं सायंकाले षोडशिग्रहसंबंधिनश्चमसान्भूरयित्वा तत ऊर्ध्वं त्रयोदशचमसगणपर्याप्तं सोमवस्तु
प्य षोडशिग्रहप्रचारं कृत्वा तत ऊर्ध्वं यत्रिपर्यायैः प्रचरेत् तेषु पर्यायेषु च होतृचमसमादिं कृत्वा यश्चमसगणः प्रवर्त्त

ब्रा० ३
६२

तेसोयंप्रथमः मैत्रावरुणचमसस्यादित्वेद्वितीयश्चमसगणोभवति ब्राह्मणाच्छंसिचमसस्यादित्वेतृतीयश्चमसगणो
भवति अच्छावाकचमसस्यादित्वेचतुर्थश्चमसगणोभवति तेषुचतुर्षुगणेषुप्रथमद्वितीयाभ्यांगणाभ्यामध्वर्युरस्तुति
ष्टेततृतीयचतुर्थाभ्यां तुप्रतिप्रस्थातानुतिष्ठेत् एवंगणचतुष्टयानुष्ठानमेकः पर्यायोभवति पुनरपिद्वितीयपर्यायेनतृ
वानुष्ठेयोतेषुपर्यायेषुद्वादशगणाः संपद्यन्ते एतत्सर्वमभिप्रेत्यद्वादशरात्रेःपर्यायाइत्युक्तं । तेसर्वेपिपंचदशाः तदी
यस्तोत्रेषुत्र्यृगन्तानामृचामावृत्तिविशेषेणपंचदशस्तोमस्यसामगैः संपादितत्वात्पंचदशस्तोमयुक्ताः द्वाद-
शपर्यायसंज्ञितेषु द्वौद्वौपर्यायौसंपद्येमिलित्वापंचदशसंख्यायाः द्विरावृत्तात्रिंशत्संख्यायांतेसर्वेपर्यवस्यन्ति
किंचषोडशस्तोत्रेयत्सप्तमस्तित्तदेकविंशंभवति । तदीयत्र्यृगन्तान । ऋचामावृत्त्यासामगैरेकविंशतिस्तोमसंपा
दनात् । याप्यमतित्रस्तस्यातिसंधिरेतन्नामकंस्तोत्रं तत्रत्रिवृत्स्तोमः सामगैः पठ्यते तस्यचस्तोमस्य त्रिषुत्र्यृचेष्वा
वृत्तिराहित्येषुनिष्पन्नत्वाद्चनवसंख्यासंपद्यते एकविंशतिसंख्यानवसंख्याचमिलितात्रिंशत्संख्याभवति । अ
नयात्रिंशत्संख्ययावापूर्वोक्तत्रिंशत्संख्ययावामासरात्रिसामान्यान्मासः संपद्यते । मासधर्मसादिपूर्ववद्योजनीयं । एवं
सतिवत्सरद्वारातिरात्रेग्निष्टोमंप्रविशति । प्रविशन्तमतिरात्रमनुतद्वारेणाप्तोर्यामापिप्रविशति । सद्यस्तिरात्रमतितप्रस्तो

द

त्राधिक्येनवर्त्तमानत्वादत्रनिरात्रः एकोनत्रिंशत्स्तोत्राण्यतिरात्रेऽत्र।तोर्यामेतुत्रयस्त्रिंशदित्साधिक्यंअतोनिरात्रद्वयं
शप्तोर्यामस्याग्निष्टोमेप्रवेशः।उक्तं सर्वयज्ञक्रतुलंतर्भावमुपसंहरति॥ पत्तद्वयेचपुनरस्ताद्येचोपरिष्टाद्यज्ञक्रत
वस्तेसर्वेग्निष्टोममपियंतीति॥एतद्वैएतेनैवोक्तप्रकारेणाग्निष्टोममपियंतीति॥एतद्वैएतेनैवोक्तप्रकारेणाधिग्नि
ष्टोमस्यपूर्वेभाविनइष्टाग्निहोत्रादयोयेयज्ञक्रतवःयेचोत्तरभाविनउक्थ्यवाजपेयादयोयज्ञक्रतवस्तेसर्वेग्निष्टो
मंप्राप्नुवंति।अथप्रकारांतरेणाग्निष्टोमंप्रशंसति॥तस्यसंस्तुतस्यनवतिशतं स्तोत्रियाः सायानवतिस्तद्दश
त्रिवृत्तोयथायानवतिस्तेदशपंचदशयथादशतासामेकास्तोत्रियादत्तित्रिवृत्सरिग्मिष्यतेसासावेकविंशोध्याहितस्तप
तिविषुवान्वाएषस्तोमानांदशवाएतस्मादर्वाचस्त्रिवृतोहदशपराचोमध्यएषएकविंशउभयतोध्याहितस्तप
तितद्यास्तौस्तोत्रियादत्तिसैतस्मिन्नधिस्नासयजमानस्तहृवंसूत्रंसहोवलमिति।तस्याग्निष्टोमस्योक्तैर्भिः
संस्तुतस्यस्तोत्रियाः स्तोत्रसंबंधिन्यऋचोनवत्यधिकशतंसंपद्यते।कथमितिचेत्तदुच्यतेप्रातः सवनेबहिष्प
वमानाख्यंयत्स्तोत्रंतस्यत्रिवृत्स्तोमःक्रियतेत्रिवृतश्चावृत्तिरहितत्वाद्विद्यमानेषुत्रिष्वृक्षुनवैवर्चः स्तो
त्रियाभवंति॥ततऊर्ध्वंचत्वार्याज्यस्तोत्राणितेषुएकैकस्मिन्नपिविद्यमानानांतिसृणामृचामावृत्तिविशेषेणपंच।

ब्रा०३

दशस्तोमः संपादनीयः तथा सत्येकैकस्मिन्स्तोत्रे पंचदशर्चे सत्येवं चतुर्षु स्तोत्रेषु मिलिता षष्टिः संपद्यते तदेवं प्रातःस
वन एकोनसप्ततिः । माध्यंदिनसवने माध्यंदिनपवमानाख्यमेकं स्तोत्रं तस्यापि पंचदशस्तोमयुक्तत्वात्स्तोत्रियाः

६३

पंचदश संपद्यन्ते चत्वारि पृष्ठस्तोत्राणि तेषु सप्तदशस्तोमकृते सप्तषष्टिसंख्याकाः स्तोत्रिया भवंति उभये मिलिता
माध्यंदिनसवने त्र्यशीतिः संपद्यते तृतीयसवन आर्भवपवमानस्तोत्रस्य सप्तदशस्तोमोपेतत्वात्तस्मिन्सप्तदश
स्तुचः । यज्ञायज्ञीयस्तोत्रस्यैकविंशस्तोमोपेतत्वात्तत्रैकविंशतिर्मिलित्वा तृतीयसवनेऽष्टात्रिंशत् एवं सवनत्र
ये मिलित्वा नवत्यधिकशतसंख्याकाः स्तोत्रिया भवंति मिलित्वा तृतीयसवनेऽष्टाविंशत् एवं सवनत्रये मिलित्वा
नवत्यधिकशतसंख्याकाः स्तोत्रिया भवंति । तत्र या नवतिस्तेहशसंख्याकास्त्रिवृत्स्तोमाः संपद्यंते । एकैकस्मिन्द
शके ति मामिकां परिसज्यावशिष्टानामृचां नवसंख्यापन्नत्वात्त्रिवृत्स्तोमत्वं ततो नवसु दशकेषु नव त्रिवृत्स्तोमाः
यास्तु तेषु नवकेषु परित्यक्ता नवर्चः स एकस्त्रिवृत्स्तोमः अथानंतरं पंचदशस्तोमस्ति तस्मिन्नपि या नवतिस्ते पूर्वोक्तप्रा
येन दश त्रिवृत्स्तोमा गणनीयाः अवशिष्टास्तु स्तोत्रीयास्तु त्रिवृत्स्तोमः परिशिष्यते एवं सति एकविंशतिसंख्याका ६३
स्त्रिवृत्स्तोमस्तेभ्योऽतिरिक्ताः काश्चिद्गणिताः एतावत्संपन्नं । तत्रैकविंशतिस्त्रिवृत्स्तोमसंघो योऽस्ति स सर्वोऽपि सोमंडले

दृश्यमानएवविंशतिसंख्यापूरकोध्याहितोमंडलेस्थापितआदित्यस्यप्रतिप्रकाशतेआदित्यस्यैकविंशतिसंख्यापूर
कत्वमत्रोक्तं।द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशइति।यत्तुसत्रंगवामयनाख्यंतत्र
यान्येकविंशसहानितत्सादृश्यादपियथात्स्त्रिवृत्स्तोमसंघःघ्यस्तःकथंसादृश्यमितितदुच्यते।तस्मिन्सत्रेय
न्मध्यममहस्तद्विषुवन्नामकंदिवाकीर्त्यंतस्यपुरस्ताद्दशाहान्युपरिष्टाद्दशाहानिएवमत्रापिपूर्वोक्तरीत्यासंपा
दितानामेकविंशतिसंख्याकानांत्रिवृत्स्तोमानांमध्येयस्त्रिवृत्स्तोमस्तएवविषुवान्भविष्यतिएतस्माद्विषुवद्
पास्तोमादर्वाचःपूर्वभाविनोदशत्रिवृत्स्तोमाःपरांचउत्तरभाविनोपिदशत्रिवृत्स्तोमाउभयोर्दशकयोर्मध्येएषएक
विंशतिसंख्यापूरकस्त्रिवृत्स्तोमउभयतोध्याहितःपार्श्वद्वयेदशकव्याप्तःसन्तपदादित्यवत्प्रकाशते।तत्रैकविंश
तित्रिवृत्स्तोमेष्वप्यूर्ध्वयासाहृगेकास्तोत्रियादतिरिक्ताभवतिसेयमेतस्मिन्नेकविंशतिसंघस्त्रेधृत्वाऽधि
कत्वेनावस्थापितासयजमानःअतिरिक्तस्तोत्रियारूपोयजमानस्तेनावगंतव्यःकिंचतत्स्तोत्रियारूपंदैवंक्षत्रंद
वसंबंधिनीक्षत्रियजातिःइंद्रवरुणादिरूपात्क्षत्रंसहःपराभिभवक्षमंवलंसेनएवमग्निष्टोमःस्तोत्रियद्वारेणप्र
शस्तः।उक्तार्थवेदनंप्रशंसति।अश्नुतेहवैदैवक्षत्रंसहोवलमेतस्यसायुज्यं [illegible] सरूपतांसलोकतामश्नुतेय

(82)

ब्रा॰३
६४

एवंवेदेति। उक्तार्थवेदितापराभवसहितस्मै सोपेतांइन्द्रादिदेवक्षत्रियजातिमश्नुते प्राप्नोति तत्र तेन क्षत्रेणेन्द्रादिना सा
युज्यं सहवासं सरूपतां समानरूपत्वं सलोकतां एकलोकावस्थितिं च प्राप्नोति॥ ॥इति चतुर्दशाध्याये तृतीयः खंडः
॥ ॥अथ त्रिवृत्स्तोमसचतुष्टयद्वारेणाग्निष्टोमस्तोत्रानुसारव्याख्यायिकामाह। देवा वा असुरैर्विजिग्याना ऊर्ध्वाः स्वर्गं लो
कस्याधिपतिर्वसवः प्रथमा आगच्छंस एनमब्रुवन्नतिनो र्जस्याकाशं लः कुर्विति स नास्तुनोतिस्त्वसइत्सब्रवी
त्तुलनुमीतित तथेति तेन त्रिवृता स्तोमेनास्तुवंस्तान्स्तुतोसार्जत्तितयथा लोकमगच्छन्निति। येदेवा अग्निसहिताः
पूर्वमसुरैः सहयुद्धं कृत्वा विजिग्याना विजयं प्राप्ताः सन्तो देवा ऊर्ध्वगामिनः संतः स्वर्गं लोकमायन्प्राप्नुवन्तदानीं सो
ग्निः स्वस्थान एवास्थितादिविस्पृत्कयुलोकं स्पृशन्नूर्ध्वं उन्नतः सन् उदश्रयत उपरितनं देशमाश्रितवान्। द्यु
लोकपर्यन्तं स्वकीयां ज्वालां वर्धितवानित्यर्थः। ततः सोग्निः स्वर्गलोकद्वारमवृणोत्। तयाच्छादितमकरोत्। न
चेत्तनेषु देवेषु स्थितेषु कथमग्नेरीदृक्सामर्थ्यमिति वाच्यं। यस्मादग्निरेव स्वर्गलोकस्याधिपतिः। अग्नौ ह्यग्निष्टो
मादिकर्माण्यनुष्ठाय स्वर्गं प्राप्नुवंति। तं स्वर्गद्वारनिरोधिनमग्निमष्टौ वसवः प्रथमाः पुरोगामिनो भूत्वा आगच्छन्प्राप्त
वंतः प्राप्य चैनमग्निं ते वसव एवमब्रुवन् हे अग्ने त्वं नोस्मानत्यर्ज। सित्वदीन्ज्वालामतिलंघ्य अर्जयितुं अर्हसि नोस्माकं तर

६४

स्तुतीहंना। तिस्त्र क्षे द्वारावरोधनंपरिहारायनुक्षिप्रमेवमामग्निंसुनस्तो त्रंकुरुतेति। तेवसवस्तथेसंगीकृसत्त्रिवृन्नाम
के नस्तोमेनाग्निमस्तुवन्। तस्य चस्तोमस्य विधायकंछंदोगब्राह्मणमेवमाम्नायते। तिसृभ्योहिंकरोति सप्रथमयाति
सृभ्योहिंकरोतिसमध्यमया। तिसृभ्योहिंकरोति सउत्तमयोद्यती। त्रिवृतोविष्टुतिरिति। अस्यायमर्थः। उपास्मैगाय
तानरइतियः प्रथमस्तृचः दद विद्युतसाज्ञचेति यो द्वितीयस्तृचः पवमानस्यते कवइति यस्तृतीयस्तृचः एतेषु त्रिषु।
त्रिषुतृचात्मकेषुसूक्तेषुविद्यमानानां नवानामृचां त्रिभिः पर्यायैर्गानंकर्त्तव्यं। तत्रप्रथमे पर्याये त्रिषुसूक्तेषु आद्यास्ति
स्त्रचो गातव्याः द्वितीयपर्यायेमध्यमास्तृचो गातव्याः तृतीयपर्यायउत्तमास्तृचोगातव्याः। तिसृभ्यइतितृतीयार्थेपंचमी
। हिंकरोतीत्यनेनगानमुपलक्ष्यते। सोयंयथोक्तप्रकारपेतागीतिस्त्रिवृत्स्तोमस्यविष्टुतिप्रकारविशेषः। तस्याप्यष्टु
तेरुद्धतीत्येवंनामधेयमिति। ईदृशेनस्तोमेनस्तुतोग्निः तान्वसूनप्यसौ जंतनिरुद्धद्वारमतिलंघ्यस्वर्गमध्येप्रापितवान्
तेचवसवोदेवाय्यालोकंसस्यस्वस्यापिततं लोकंस्थानविशेषमनतिक्रम्यतत्रागच्छत्। अथपंचदशस्तोमेनस्तुतिंदर्शय
ति। तेरुद्राआगच्छंस्तएनमब्रुवन्नित्यादिनास्याकाशेन्नः कुर्वितिसनाऽस्तुतोतिसृक्षपंऽसब्रवीत्स्तुतंनुमेतिनथेतितंनपं
चदशेनस्तोमेनाऽस्तुवन्स्तोस्तुतोसजनतेय्यालोकमगच्छन्निति। पंचदशनामकस्यस्वरूपंछंदोगएवमाम्नायते। पं

ब्रा०३
६५

चभ्योहिंकरोतिसतिसृभिःसएकयासएकयापंचभ्योहिंकरोतिसएकयासतिसृभिःसएकयापंचभ्योहिंकरोतिसएकया
सएकयासतिसृभिरिति।अस्यार्थः।तृचात्मकमेकंसूक्तंत्रिरावर्त्तनीयंतत्रप्रथमायामावृत्तौप्रथमास्त्वस्त्रिरभ्यासः
द्वितीयावृत्तौमध्यमायाउत्तमावृत्तावुत्तमायाः।सायंपंचदशस्तोमइति।अन्यत्पूर्ववच्चभाष्यंशं।अथसप्तदशस्तोमे
नस्तुतिंदर्शयति॥तमादित्याआगच्छंस्तएनमब्रुवन्नितिनोर्जेस्पाकाशन्तःकुर्वितिसनास्तुतोतिस्त्रस्पऽसप्तवीत्स्तुत
नुमेतितथेतितंतेसप्तदशेनस्तोमेनास्तुवंस्तान्स्तुतोसार्जंततेयथालोकमगच्छन्निति।सप्तदशस्तोमस्यस्वरूपंछं
दोगैरेवमाम्नायते।पंचभ्योहिंकरोतिसतिसृभिःसएकयासएकयापंचभ्योहिंकरोतिसएकयासतिसृभिःसएकयास
पभ्योहिंकरोतिसएकयासतिसृभिःसएकयासतिसृभिःसतिसृभिरिति।अत्रप्रथमावृत्तौप्रथमात्त्विस्त्रिरभ्यासः।
द्वितीयावृत्तौमध्यमायां।तृतीयावृत्तौमध्यमोत्तमयोः।सायंसप्तदशस्तोमइति।अन्यत्पूर्ववत्।एकविंशस्तोमेनस्तुतिंदर्श
यति।तंविश्वेदेवाआगच्छंस्तएनमब्रुवन्नितिनोर्जेसकाशन्तःकुर्वितिसनास्तुतोतिस्त्रस्पऽसप्तवीत्स्तुतनुमेतितथेतितंत
एकविंशेनस्तोमेनास्तुवंस्तान्स्तुतोसार्जंततेयथालोकमगच्छन्निति।एकविंशस्तोमस्यस्वरूपंछंदोगैरेवमाम्नायते।सप्त
भ्योहिंकरोतिसएकयासतिसृभिःसतिसृभिःसप्तभ्योहिंकरोतिसतिसृभिःसएकयासतिसृभिरिति।प्रथमपर्यायेतत्त्वसो

६५

नमापार्श्वतः सप्तत्रसाठः । द्वितीयपर्यायेप्रथमायाः सप्तत्रसाठः तृतीयपर्यायेमध्यमायाः सप्तत्रसाठः अथ शिष्टानां तु सर्वत्र त्रिरा

स वृत्तिः सौमिकविंशस्तोमहरति । अत्र सर्वत्र व्याख्येयं । स्तोमचतुष्टयमुपसंहरति । एकैकेनवैतं देवास्तोमेनास्तुवंस्तान्स्तु

तोसाजंततेयथा लोकमगच्छति । अग्निष्टोमप्रयोगेचतुर्णामुक्तानां स्तोमानां विकल्पशंकामाहसर्वेसमुच्चयं विधत्ते ॥ अ

थहेतमेषएतैः सर्वैस्तोमैस्तोमैस्तोतियोयस्तन इति । अर्थवादत्वेलक्षणेनविधित्वं घात्तिपतुमयशब्दः । योग्निष्टोमेनयज

तेएभिःस्तोमैस्तुवीत अनुष्ठातुःस्वर्गप्राप्तिफलस्यसिद्धत्वात्तेनसहसमुच्चितस्यवेदितुरपि तत्सेर्वे लदर्शयति ॥ यश्चैनमे

वंवेदानीनुतमञ्जतात इति ॥ यजमानोयेनप्रकारेणयजतेअनेनैवप्रकारेणेनमग्निष्टोमयं ञ्चवेदनमपि वेदितामें रव्वा

रनिरोधमतिलंघ्याज्ञातेवप्राप्यसेवअतौ स्त्रितिदीर्घ स्तुादसः । वेदनमात्रेणानुष्ठानसमफलत्वं प्रतिपादयितुमुनरथा

ह । अतिहवाएनमर्जतेस्वर्गेलोकमभिय एवं वेदेति । वेदनमात्रेणसिद्धपिफलेकर्मभूयस्त्वात् फलभूयस्त्वमितिन्याये

नानुष्ठानवैयर्थ्यंनास्ति ॥ ॥ इति चतुर्दशाध्यायेचतुर्थः खंडः ॥ ॥ अथाग्निष्टोमादिशब्दनिर्वचनेन प्रशंसति ॥ सवाए

षाग्निरेवयदग्निष्टोमस्तंयदस्तुवंस्तस्मादग्निष्टोमस्तमग्निष्टोमं संतमग्निष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि

देवा इति । योयमग्निष्टोमोस्ति स एष साक्षादग्निरेव स्वशरीरमेव त्रिभिश्छंदोभिस्त्रिः सवनैश्च विभज्य क्रतोर्निष्पादि

84

ब्रा० ३
६६

तस्मात्। तं क्रतुरूपमग्निं यद्यस्मात्कारणाद्देवा अस्तुवंस्तस्मादग्निविषयस्तुतियुक्तत्वादयं क्रतुरग्निस्तोमः स एतन्ना
मकः। तन्नामयुक्तं क्रतुं परोक्षराम्नायाहर्तुं सकारतकारयोरप्युकारटकारावादिश्याग्निष्टोम इति वैदिका आचक्षते। व
र्णान्तरेण व्यवहितार्थप्रतीतिरहितं नाम परोक्षमित्युच्यते। यस्माल्लोके देवाः पूज्या आचार्यादयः परोक्षनामप्रिया एव।
तस्मात्क्रतोरपि तद्युक्तं। नामान्तरस्य निर्वचनं दर्शयति। तं यच्चतुष्टया देवाश्चतुर्भिः स्तोमैरस्तुवंस्तस्माच्चतुस्तोमस्तं च
तुस्तोमं सन्तं चतुष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। चतुष्टयाश्चतुर्विधाः वसवो रुद्रा आदित्या विश्वे
देवाश्चेति। स्तोमाश्च त्रिवृत्पञ्चदशः सप्तदश एकविंश इत्येवं चतुष्टोमनामनिर्वचनं पूर्ववद्योजनीयम्। ज्योतिष्टोम
नामनिर्वचनं दर्शयति॥ अथ यदेनमूर्ध्वं सन्तं ज्योतिर्भूतमस्तुवंस्तस्माज्ज्योतिस्तोमस्तं ज्योतिस्तोमं सन्तं ज्योतिष्टोम इ
त्याचक्षते परोक्षं परोक्षप्रिया इव हि देवा इति। अथ नामद्वयानन्तरं तृतीयं नाम कथ्यत इति शेषः। अग्निर्भूमिमारभ्य द्युलो
कपर्यन्तमूर्ध्वं स्थितस्तथा प्रकाशमानत्वाज्ज्योतिर्भूतस्तं तादृशं देवा अस्तुवंस्तस्माज्ज्योतिस्तोमः। ज्योतिषः स्तोमस्तु तिर
स्कृतो स ज्योतिस्तोमः अन्यत्पूर्ववत्। नामनिर्वचनेन प्रशस्य पुनरप्याद्यन्तराहित्येन प्रशंसति। स वा एषोऽपूर्वोऽनपरो यज्ञ
क्रतुर्यथा रथचक्रमनन्तमेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथोदयनमिति॥ स एषोऽग्निष्टोमः पूर्वापररहितः पूर्वे आदिर

६६

परोंतः आद्यंतरहितो यज्ञक्रतुः यथा लोके रथचक्रमनंतं पुनः पुनः परिवर्तमानस्य रथचक्रस्य अयमादिरयमंत इति विभागः
कर्त्तुं न शक्यते। तस्मादिदमंतरहितं। आदिरहितस्याद्यंतउपलम्भणं एवं क्रतुरपि। ननु प्रायणीयेष्टिरादिरुदयनीयेष्टिरं
त इति चेत्। मेवं यग्निष्टोमो स्तित्तस्य यद्दृशं प्रायणीयं कर्मतादृशमेवोदयनीयं कर्म। तयोः समानधर्मकत्वात्। अतो विवे।
कुमशक्यत्वादाद्यंतरहितः क्रतुः उक्तमर्थं मंत्रोदाहरणेन द्रढयति। तदेषाभियज्ञगाथागीयते। पदस्य पूर्वमपरं तद
स्य पद्धस्यापरं तद्धस्य पूर्वं। अहेरिव सर्पणं शाकलस्य न विजानंति यतरत्परस्तादितीति। सर्वैरपि सुभाषितत्वेन गीयत इति
गाथा यज्ञविषया गाथा यातनस्मिन्नग्निष्टोमस्याद्यंतयोः प्रायणीयोदयनीययोरेव विषये काचिदेषा यज्ञगाथाभिर्गी।
यते सर्वत्रः पठ्यते पदस्येत्यादिगाथा। अस्याग्निष्टोमस्य यत्पूर्वमुपक्रमरूपं कर्मास्ति तद्वास्यापरं समाप्तिरूपं कर्मेय
दुयदपस्यापरं समाप्तिरूपं तदुत्तदेवास्य पूर्वमुपक्रमरूपं आदिरस्य प्रायणीयश्चरुरादिः स उदयनीयश्चरुरिति द्व्यंदेव
तयोरुभयत्रैकविधत्वात्तयोरेकत्वोपचारः आद्यंतयोरपरिज्ञाने पूर्वं ब्राह्मणे रथचक्रदृष्टांतादर्शितः। मंत्रे त्वन्यो दृष्टांत उ
च्यते। शाकल्यशब्दः सर्पविशेषवाची शाकलशब्दः सर्पाणां काले मुखेन पुच्छस्य दंशनं कृत्वा वलयाकारो भवति तत्र
किं मुखं किं वा पुच्छमिति न ज्ञायते। एवमत्राप्यादिर्न ज्ञायते। एवमत्राप्यादित्तिद्वनाकस्यचरोः सामसंनिप्रायणीयो

65

प्रा०३
६६

दयनीययोः यत्तात्कर्मपरस्तात्तस्मात्तद्विपर्यस्तपूर्वभाविकिमपि न विजानंति। अस्य गाथायास्तात्पर्यं संक्षिप्य दर्श
यति। यथा ह्येवास्य प्रायणमेवमुदयनमसदिति॥ अस्याग्निष्टोमस्य प्रायणं प्रारंभो यादृशः। एवमुदयनं समाप्तिरसदृ
भवतीत्यर्थः। अत्र केचिदाक्षेपमुद्भावयन्ति। तदाहुर्यत्त्रिवृत्प्रायणमेकविंशमुदयनं केन ते समे स्त इति। पूर्वोदाहृतत्रिवृत्स्तो
मः प्रातःसवनादौ प्रयोक्तव्यः प्रायणमुपक्रमरूपं एकविंशस्तोमस्तु तृतीयसवनान्ते प्रयोक्तव्यः उदयनं समाप्तिरूपं केन
कारणेन ते प्रायणोदयने समे भवत इत्याक्षेपः। तत्र परिहारं दर्शयति। यो वा एकविंशस्त्रिवृद्धि सः। यो ह्युभौ त्वचौ त्वचं विना
ति विविक्तिश्चपत्तेनती॥ योयमेकविंशस्तोमोस्ति स एव त्रिवृद्द्रष्टव्यः स्तोमस्याकारेण तयोरेकविधत्वात्। अथो अपि च यद्य
स्मात्कारणात्स्तोमद्वयाश्रयभूतावुभौ त्वचौ त्वचं विनाऽत्त्वलधर्मयुक्तौ तत्र त्रिवृत्स्तोमाश्रयस्य पाश्वैगायत्रानरश्मिसूक्तः
स्य तत्त्वलधर्मः प्रसिद्ध एव। एकविंशस्तोमाश्रयस्य यज्ञायज्ञीयस्य वा अग्नेयरश्मिसूक्तस्य गाथ एव तस्मिन्नृत्वचा। वाग्मायेन
तथापि स्तोत्रकाले प्रयथनेन पादादानावसर्त्तत्वलं संपाद्यते तेन तत्त्वलधर्मोपेतत्वकारणेन द्वयोः स्तोमयोरेकविधत्वमि
त्युक्तं भूयात्॥ ॥इति चतुर्दशाध्याये पंचमः खंडः॥ पुनरादित्सामन्तप्रशंसति॥ यो वा एष तपति स एषोऽग्निष्टोम एष साह्नः स तं स ८०
हैवाह्नासंस्थापयेयुः साह्नो वै नामेति। य एव प्रसिद्ध एष अस्मल्लक्ष्यः आदित्यस्तपति एषोऽग्निष्टोमः तयोरादित्याग्निष्टोम

योः सद्भावात् कथं साम्यमिति तत्र उच्यते एषोऽग्निष्टोम आदिसवत्सरः आदिसोऽग्नौ सह वर्त्तते तथायमपि। तमग्निष्टोमं
यत्त एकेनाह्ना समापयेयुस्तस्मादादिसत्त्वसाम्यात् इति क्रतोर्नामसंपन्नं। इदानीमग्निष्टोमानुष्ठाने त्वरां निषेधति।
नेना संत्वरमाणाश्चरेयुर्यथैव प्रातःसवन एवं माध्यंदिन एवं तृतीयसवन एवमु ह यजमानोऽप्रमायुको भवतीति। यस्मा
देकमहः साकल्येनानुष्ठानाय पर्याप्तं तेन कारणेन सर्वेष्वृत्विजः संत्वरमाणास्त्वरामकुर्वन्त उत्तरोत्तरानुष्ठानं सम्यक्
योऽलोचयं श्चरेयुरनुतिष्ठेयुः। यथैव प्रातःसवने मध्यरात्राद् ऊर्ध्वमारभ्य मध्याह्नात् पूर्वकालस्यानुष्ठानपर्याप्तत्वान्नास्ति त्व
रा एवमुत्तरयोरपि सवनयोः। एवमु ह अनेनैव प्रकारेणानुष्ठानेः सति बुद्धिसमाधानेनांगलोपाभावाद्यजमानो
ऽप्रमायुकः अपमृत्युरहितो भवति। विपक्षे बाधकं दर्शयति। यद्वा वा इदं पूर्वयोः सवनयोरसंत्वरमाणाश्चरंति तस्मादु
दंप्रसंविदीर्घारण्यानि भवंति तथा ह यजमानः प्रमायुको भवतीति॥ यद्वै इदं प्रथमद्वितीययोः सवनयोः कालसंकोचा
भावात् असंत्वरमाणा इदं कर्म चरंत्यनुतिष्ठेयुः। तदानीं तस्मात् तस्मादेवांगलोपाभावात्कारणादिदं दृश्यते। किमिद
मिति। तदुच्यते प्राच्यायामतः पूर्वदिग्वर्तिनो ग्रामसमूहाः बहुलाविष्टा बहुभिर्जनैः संपूर्णा भवंति। अथ तद्विपर्ययमेव
द्यदि तृतीयसवने कालसंकोचमाशंक्य संत्वरमाणा अतित्वरया युक्ता इदं कर्म चरंत्यनुतिष्ठंति तस्मात्तदानीमंगवैकल्य

श्रौ०२

संभवादेवेदंलोकेदृश्यतेप्रसंग्चिपाश्निमदिग्वर्त्तीनिर्दीर्घारण्यानिजनप्रभूतानिभवंतितथाहत्ताद्दृशेनसंभवीत्तांगवैकल्य
युक्तेनानुष्ठानेनयजमानःप्रमायुकोभवतिअयमस्तुनाम्रियतइत्यर्थः।विपक्षेवाधकमुक्त्वास्वपक्षंनिगमयति॥तेना-
संत्वरमाणाश्चरेयुर्यथैवप्रातःसवनएवंमाध्यंदिनएवंतृतीयसवनएवमुक्तेयजमानाप्रमायुकोभवतीति॥अथत्रि
ष्वपिसवनेषुशस्त्रस्योत्तरोत्तरंध्वन्याधिक्यंविधत्ते॥सएतमेवशस्त्रेणानुपर्यावर्त्ततयदावाएषप्रातरुदेत्यथमंद्रंतपतित
स्मान्मंद्रयावाचाप्रातःसवनेशंसेद्यदाभ्येत्यथवलीयस्तपतितस्माद्बलीयस्यावाचामध्यंदिनेशंसेदथयदाभि
तरामेवत्यथवलिष्ठतमंतपतितस्माद्बलिष्ठतमयावाचातृतीयसवनेशंसेदेवंशंसेद्यदिवाचईशीतवाग्घिशस्त्रंयया
नुवाचोत्तरोत्तरिण्यात्सहेतसमापनाययतयाप्रतिपद्येतैतत्सुशस्ततमामिवभवतीति॥सहोताएतमेवादित्यमनुत्यशस्त्रे
णपर्यावर्त्ततयथायथादित्यउत्तरोत्तराधिक्येनतपतितथातथैवोत्तरोत्तरध्वन्याधिक्येनहोताशंसेत्।यदावाइत्यादिनांतरे
वस्पष्टीक्रियते।यस्मिन्नेवकालेएषआदित्यः।प्रातरुदेतिप्रातःकालमभिव्यंज्यपितुमुदितोभवतिअथतदानींमंद्रमल्पं
यथाभवतितथातपति।तस्मादादित्यमनुवर्त्तमानोहोताप्रातःसवनेमंद्रयास्वल्पध्वन्युपेतयावाचाशंसेत्॥अथप्रातःका-
लादूर्ध्वंयदाभ्येतिमध्याह्नकालंनिष्पादयितुमभिमुखोभवतिअथतदानींसूर्योवलीयःप्रवलंयथाभवतितथातपति

६८

तस्माद्धोतापि वलीयस्याप्रवलध्वनियुक्तया वाचा माध्यंदिने शंसेत् । अथ मध्याह्नादूर्ध्वं यदा सूर्यो भितरामेति पश्चिमाभिमुखो
नांयुरुषाणामसंतमाभिमुख्येन गच्छति अथेदानीमादित्यो वलिष्ठतमं तपति मध्याह्नात्तापादप्यसंतप्रवलस्तपो भवति भूमौ
दिक्स्वोष्णत्वबाहुल्यात् । तस्मात्तदानीं होता माध्यंदिनसवनध्वनेरप्यधिकध्वनियुक्तया वाचा तृतीयसवने शंसेत् । यद्येवं
होता कर्विर्इशीलइश्वरो भवेत्तर्वषट्कारवान्स्यात् श्लेष्मादिदोषेण ध्वनेर्माधुर्यं न प्राप्नुयात् तदानीं येन ध्वनिना तृतीयसवने प्रारं
भः कृतः एवं तेनैव ध्वनिना शंसेत् । किमर्थं ध्वन्याधिक्यमिति तदुच्यते यस्माद्वागेव शस्त्रं वाङ्निष्पाद्यत्वात्तस्मात् यथानुयाद
प्राग्ध्वनियुक्तया वाचा उत्तरोत्तरिण्या उत्तरोत्तराभिवृद्धिभाजा समापनायोत्सहते शस्त्रं समापयितुमुत्साहवान्भवेत् । ननुम
ध्येनीचध्वनिर्भवेत् । तथात्वे यादृशध्वन्युपेतया वाचा शस्त्रं प्रतिपद्येत प्रारंभेत । तदेतदुक्तलक्षणोपेतं शस्त्रस्य शासनमभिव
भवति भक्तिविकलराहित्येनासंतं । प्राप्तमेव भवति । ननु तृतीयसवने त्वरामंतरेण शंसेदिति पूर्वत्रोक्तं तथा सति काल
साल्पत्वेन समापनात्प्रागेव सूर्योऽस्तमियादित्याशंक्य वस्तुतोऽस्तमयाभावान्नास्ति दोष इत्यभिप्रेत्याह । स वा एष न कदाचना
स्तमेति नोदेति ॥ अस्तमयः स्वरूपनाशः उदयः सूर्योत्पत्तिः । न हि सूर्यस्य कदाचिदपि स्वरूपनाशोत्पत्ती विद्येते कथं तर्हि लौ
कानां सूर्यास्तमयव्यवहार इत्याशंक्याह ॥ तं यदस्तमेतीति मन्यंते अह्न एव तदंतमित्वाथात्मानं विपर्यस्यते रात्रीमेवावस्तात्कुरुते

(3)

ग्रा०३

हः परस्तादिति । यत्र यदा अमी प्राणिनः सूर्योदयाहर्ध्वं पम चतुष्टयानंतरं सूर्योऽस्तमेतीति तं सूर्यमस्तमितं मन्यन्ते न तदानीं सूर्यस्त
स्याणि पुलेद शोधकः । शश्चपस्यान्ह एवां तमिलासमाप्तिं प्राप्य प्रानंतरं स्वात्मानं विपर्यस्यन्तिविपर्यस्तं करोति कथं विपर्यास इति
सम्युच्यते । अवस्तादतीन दशरात्रिमेव कुरुते परस्तादागामिनि दशाहः कुरुते अयमर्थः मेरोः प्रदक्षिणं कुर्वन्नादित्यो यद्दैव ।
सिनां प्राणिनां दृष्टिपथमागच्छतीति तद्देशवासिभिरयमुदेतीत्यवबुध्यते तद्देशवासिनां दृष्टिपथमतिक्रम्य सूर्ये गते सति सू
र्योऽस्तमेतीति तद्देशवासिभिरवबुध्यते अतस्तस्मिन्देशे रात्रिर्भवति आदित्ये गते अन्यदेशान्तरं तद्देशवासिप्राणिभिः सूर्यदृष्टत्वाद
हर्भवति । एवं च सति सूर्यस्य विनाशरूपोऽस्तमयः कदाचिदपि नास्तीति सिद्धं । अनेनैव न्यायेन सूर्यस्य स्वरूपासत्तिलक्षणो
दयाभावं दर्शयति ॥ अथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्तमित्वाथात्मानं विपर्यस्यते अहरेवावस्तात्कुरुते रात्रीं परस्तादि
ति । पूर्ववद्व्याख्येयं । परमार्थतोऽस्तमयस्याभावं निगमयति । स वा एष न कदाचन निम्रोचतीति । निम्रोचनमस्तमयः एतस्यो
पलक्षणत्वान्न कदाचिदुदेतीत्यपि द्रष्टव्यं । वेदनं प्रशंसति न ह वै कदाचन निम्रोचत्येतस्य ह सायुज्यं सरूपतां सलोकताम ।
श्नुते य एवं वेद य एवं वेदेति । वेदितुरस्तमयाभावो नाम अयमस्तु राहिसंस्त्वजन्मनि नाहष्णोभ त्वा पश्चादेतस्यादित्यस्य स
ह वासः समानरूपत्वसमानलोकत्वानि प्राप्नोति ॥ न च सह वासेनैव समानलोकत्वं सिध्यतीति वाच्यं । कदाचिदपि स्वेच्छया

द

श

द

यगवस्थानेपि तत्त्लोके भ्रंशो नास्तीति विवक्षया समानलोकत्वमुच्यते ॥ ॥इति माधवीये वेदार्थप्रकाशे एतरेयब्राह्मणे च
तुर्दशाध्याये षष्ठः खंडः ॥६॥ समाप्तोध्यायश्च ॥ ॥अग्निष्टोमः सर्वयज्ञक्रतूनां योनिरित्याम्नातस्तत्प्रकृतिरूपः स्तोत्रदे
वः सोमः संस्तुवां सावृत्तु मिश्रीवा चामहे मे ध्यमेरुत्तमेष्व। अग्निष्टिसंस्थादिकं वक्ष्यते ॥ तत्रादौ हरणीयेष्टः संस्थामाख्या
पिकृपादशेषयति ॥ यज्ञो वै देवेभ्यो न्नापमुदक्रामत्ते देवा अब्रुवन्यज्ञो वै नोन्नाद्यमुदक्रमीदन्विच्छामेति तेब्रुवन्कथमन्वि
च्छामेति ब्राह्मणेन च च्छन्दोभिः। अग्निलब्धु वेति ब्राह्मणेन छन्दोभिरिति सप्तसमाप्तायज्ञमतत्वामिपपत्नीः समयाजयन्स्याष्ट्रा [न]
पत्नीर्हि दीक्षणीयायामिष्टावंतमेव यज्ञं तन्वत्तपिपत्नीः संयाजयतितमनुसाय प्रैव वायन्त्रिति ॥ पुरा कदाचिद्यज्ञो
ऽप्रतिष्ठामारब्यः केनापि निमित्तेनापरक्तः सन्देवेभ्यः सकाशादुदक्रामत निःक्रांतवान्तस्मिन्नुत्क्रांते तन्त्रकलरूप
मन्नाद्यमुदक्रामत्ततो देवाः परस्परमिदमब्रुवन्नयदेतदुभयमस्मदीयमुदक्रामत्तदेतदुभयं सर्वत्रान्विच्छाम अन्वे
षणं कर्तव्यामितत्र कथं अन्वेषणमित्युपायं विचार्य ब्राह्मणमन्त्रिपजमानरूपमदीक्षयन्दीक्षणीयेष्ट्यासंस्कृतवन्तः
न स ब्राह्मणस्य यज्ञदीक्षणीयेष्टिरूपमात्रं समाप्तिपर्यन्तमतन्वन्नविस्तारितवन्तः तेयज्ञमनुष्ठायन्तो नामिकादे
वतो अपि समयाजयन्पत्नीसंयाजानामनुष्ठानमपि कृतवन्तः स्वर्थः । तस्माद्वं देवैः कृतं तस्मादेव कारणादिदा।

ब्रा० ३
७०

नीमपि दीक्षणीयायामिष्टौ चोदकप्राप्तं यद्बुं समाप्तिपर्यंतमनुतिष्ठंति। पत्नीसंयाजाननुतिष्ठंति उत्तरकालीनां गवामाहृत्तये
पत्नीसंयाजयहणं पत्नीसंयाजैरेव समाप्तिरिति अभिप्रेतांतमित्युक्तं तद्वेदवेष्टनमनु न्याय अनुक्रमगतमनुष्ठानमनुपक्ष्यन्त
ग
नुष्या अप्यन्ववायन् अवेत्यावंतः अनुष्ठितवंत इत्यर्थः। तमनु न्यायमितिवाक्यमुत्तरशेषत्वेन वायो ज्यं दीक्षणीयेष्टेः
पत्नीसंयाजेषु समाप्तिं दर्शयित्वा प्रायणीयसीयस्य शंयुवाकेन समाप्तिं दर्शयति। तेप्रायणीयतमतन्वतंत प्रायणीयेनने
दीयामागच्छंस्तेकर्मभिः समत्वरंत तत छंद्यतमकुर्वंस्तस्माद्धाप्यनर्हि प्रायणीयशंयुतमेव भवतितमनु न्यायमन्ववाय
न्निति॥ तं देवा प्रायणीया रव्यं कर्मानुष्ठितवंतः प्रायणीयेन कर्मणानंतरं वीतं दीक्षणीयेष्टिरूपं अपातिष्ठामरूपवाय
ज्ञं नदीपासंतसमी यथयथा भवति तथैवान्वगच्छन् अनुष्ठितवंतः। दीक्षणीयेष्टेरूर्ध्वं विरम्यवधानमकृत्वा प्रायणी
यमनुष्ठितवंत इत्यर्थः। तेदेवाः कर्मभिः प्रायणीयागरूपैः समत्वरंत सम्यक्त्वरां कृतवंतः दीक्षणीयेष्टौ वसत्नीसंयाजप
येनान्वतिष्ठन् किंतु त्वरां कृत्वा पत्नीसंयाजेभ्यः पूर्वमेव शंयुवाकपर्यंतं कृत्वापरताः तस्माद्देसादिपूर्ववत्। अथातिथ्ये
ष्टेरंतं दर्शयति॥ तस्मा आतिथ्यमतन्वतततमातिथ्यनं नदीपो न्वागच्छंस्तेकर्मभिः समत्वरंत तदिलांतमकुर्वंस्तस्माद्धाप्य ७०
नर्ह्यातिथ्यमिलांतमेव भवतितमनुसायमन्ववायन्निति। अनुयाजेभ्यः पूर्वं यदिडो याकानंतरं तमेवाति थ्येष्टिकर्म

कृत्वोपरताः। असत्पूर्वं वध्या रम्भं। अथोपसत्स्वनुष्ठेयं दर्शयति। तउपसदोत न्वन्तमुपसद्भिर्नोदीयो न्वागच्छं स्तेक
र्मभिः समत्सरंतत्तिस्त्रः सामिधेनीरनूच्यतिस्रोदेवताश्रपजंत्तस्मा द्वाप्येत र्हि कर्मसत्सु तिस्र एव सामिधेनीरनूच्य
तिस्रोदेवता यजंतीति मनुमायमन्ववायं न्निति। तिस्रः सामिधेन्य आश्वलायनेन दर्शिताः। उपसद्यायमीत्वपरिति तिस्र
एकैकां त्रिरनुवानुताः सामिधेन्यस्त्रतिअग्निः सोमो विष्णुश्चेसत्तास्तिस्रोदेवताः। स्पष्टमन्यत्। अथाग्नीषोमीयपशावनु
ष्ठेयं दर्शयति॥ उतपवसथमतत्वनतमुपवसथ्येह माऽनुवस्त मादवाति यज्ञमृतन्वतापिपत्नीः संयाजयस्तस्माद्वाप्ये
तर्ह्युपवसथ आंतरैमेवयज्ञं तन्वतेपिपत्नीः संयाजयंतीति। उपवसथशब्देन सोमयागसमीपवासित्वात्पूर्वस्मिन्नहः
न्यनुष्ठेयाग्नीषोमीयपशुर्विवक्षितः तं पशुं देवाउपवसथ्येहनि सोमयागदिनात्पूर्वेद्युः प्रामुवन प्राप्य चते यज्ञसमा
प्तिपर्यंतमनुष्ठितवंतः। पत्नीसंयाजानप्यन्वतिष्ठन्। दीक्षणीयेष्टिवत्पत्नीसंयाजांतत्वमेवद्रष्टव्यं स्पष्टमन्यत्। उक्ता ये
स्विष्टिषु होतुरनुवचनस्य मंद्रस्वरं विधत्ते। तस्मादेतेषु पूर्वेषु कर्मसु पानैस्तरां शनैस्तरामिवानुब्रूयादिति। यस्मादग्नी
षोमीयात्पूर्वभाविन उपक्रमरूपादीक्षणीयादयस्तस्मादेतेषु दीक्षणीयाद्युपसदंतेषु कर्मसु शनैस्तरामिवातितना
चस्वरेणैव होतानुब्रूयात्। अग्नीषोमीयपशौहोतुरनुवचने ध्वनेरितानुसारित्वं विधत्ते। अनत्सारमिवहितत्स्मादु

६७

श्रा॰३
७१

पवसथेयावत्सावाचाकामयीततावत्सानवस्यानुब्रूयादाप्नोहिसतर्हिभवतीति। अत्रसारंउत्तरोत्तरभावीसारउत्सारः
तमनुसरसेनितत्स्यार्थः। दक्षिणीयेष्टेःसारभूताप्रायणीयेष्टिःतदुपसद्यासोमयागस्यसमीपवर्तित्वात्एवमातिथ्यादि
षुद्रष्टव्यंईदृशमुत्तरोत्तरसारमनुसरन्तंतंदेवास्तेसोमयागमायन्प्राप्तवन्तः। तस्मादस्तुतत्सारउपवसथ्येऽग्नीषोमीयपशोरहो
तायावत्सावाचाकामयीततावत्तमुच्चैर्ध्वनिनेच्छेत्। तावताध्वनिनानुवचनंकुर्यात्हितस्मिन्नग्नीषोमीयपशुकालेसतसो
मयागःप्राप्तोभवतीतिह्यत्राभिप्रायः। लोकेप्यभीष्टवस्तुनिबधोवाचिरकालेनप्राप्तजातहर्षघातिनायाच्चध्वनिनागानंकु
र्वंति। नह्यत्रापिहूरस्थंदेवानांयज्ञंप्राप्तुमुपायमभिधायान्नाद्यप्राप्तुमुपायंदर्शयति। तमादेवाब्रुवन्स्विष्टस्तनोन्नाद्यापेतिस
नेसब्रुवीत्यथंवस्विष्टपतितानिक्षत्रेवततमब्रुवन्ब्राह्मणेनचनश्छंदोभिश्चसंयुक्तंभूत्वान्नाद्यायतिस्विष्टस्तस्माज्ज्ञाप्तनर्हियज्ञः
संयुक्तंभूत्वादेवेभ्योहव्यंवहतिब्राह्मणेनचछंदोभिश्चेति। तेदेवास्तंस्विष्टकृतमयमब्रुवन्हेयज्ञनास्माकमन्नाद्यसिध्य
र्थंनिष्ठस्वस्विष्टितंकुर्वितिसयज्ञस्तद्वाक्यंनिराकरोत्। अन्नाद्यनिष्पादकंसाधनमन्तरेणवायुष्मदर्थंकथंस्थितंस्यामिति भि
प्रायमब्रवीत्। तेष्वनुयहघोननायनानदेवानीक्षतेवपशुपन्नोवास्तनन्तपेक्षांकृतवान्। ततोदेवायज्ञस्याभिप्रायंज्ञात्वात
देवास्तंयज्ञमिदमब्रुवन्। हेयज्ञनोऽस्मदर्थंत्वंसाधनेनत्वस्तियजमानरूपेणब्राह्मणेनत्त्वं। मंत्ररूपेणछंदोभिश्चसंयुक्तंभूत्वा

७१

सहावस्थितो भूत्वा पश्चादुन्नायतिष्ठ स्वांगीकुर्वंति । तथा यज्ञोप्यंगीचकार यस्मादेवं तस्मादिदानीमपि यज्ञो ब्राह्मणे मंत्रस
हितो भूत्वा देवेभ्यो न्नाद्यरूपं हविर्वहति ॥ ॥ इति पंचदशाध्याये प्रथमः खंडः ॥ ॥ दक्षिणीयादिघ्नीषामीयांतं तु होतु
र्ध्वे निविशेषं विधायांते ब्राह्मणे नार्त्विज्याय ज्ञनिष्पत्तिरित्युक्तं तत्र वर्ज्यब्राह्मणविशेषं दर्शयितुं प्रस्तौति । त्रीणि ह वै यज्ञे क्रि
यते जग्धं गीर्णं वांतमिति । जग्धं भक्षितावशिष्टं भोजनपात्रे स्थितं । गीर्णमुदरे प्रविष्टं । वांतं सकृदुदरप्रविष्टं पुनर्निर्गतं ।
तान्येतानि त्रीणि दुर्बुद्धिभिर्यज्ञे क्रियते । जग्धादिस्थानीयानि त्रीणि वर्ज्यानीत्यर्थः ॥ तत्र जग्धस्थानीयं दर्शयित्वा निषेधति ।
तद्धैतद्देव जग्धं यदाशंसमार्त्विज्यं कारयत उत वा मे दद्यादुत वा मा भृ वृणीतेति तद्ध तत्सराङ्‌ वैयथा जग्धं नैव तद्यजमानं भुन ।
क्ती । ति । कश्चिद्ब्राह्मण आर्त्विज्ये आशंसते कामयते । केनाभिप्रायेणेति तदुच्यते आर्त्विज्ये आर्थ्यं यजमानं मपि गतसति यज्ञमा
नो मे मखं उत तत्त वादद्यात् किं चिद्धनं चिद्धनं वा प्रयच्छेत उत वा मा वृणीत । प्रयोगाभिज्ञं मां दृष्ट्वा त्वमार्त्विज्यं कुर्विति वृणीत तद्देव
धनार्जनलंपटः सन् अनुष्ठानतात्पर्यरहितो निरंतरमार्त्विज्यं कामयते तादृशं कामयमानं पुरुषं यजमान आर्त्विज्यं कार
यत इति यदस्ति तदेव जग्धं । यथा लोके जग्धपात्रस्थितं भक्षितावशिष्टमुच्छिष्टत्वादितरैरस्पृश्यं । तथा तदृत्विक्ष्विन्नेवया
गे तत्त लंपटस्यार्त्विज्यं पराङ्‌ वनिकृष्टमेव । तत्तादृशमार्त्विज्यं यजमानं न भुनक्ति न पालयति यज्ञो विकलो भवति ॥ गीर्णे

७०

श्री·३
७२

मुदाहृत्सनिषेधति॥ अथ यहेतद्देवगीर्णीयच्छिद्भ्यदार्लिङ्गं कारयन्तउत वा मानवाधेतात्तवाभेनयज्ञवेश्मसंकुर्यादितितदृत्तस
राडे· बृयथागीर्णं नहेवत्तद्यजमानं भुनक्तीति। यजमानाय स्मिन्व्याभेयजनेनत्र कश्चिद्ब्राह्मणाय्यामण्यीः प्रभुर्भूत्वाप्र
योगकौशलरहितो वृतिष्ठेतेन नार्लिङ्गं वर्जं प्रिलु मयं यजमानो विभेति। केनातिप्रायेण नित उच्यते अयमत्र प्रभुर्मेपि·
द्वेषं कृत्वा कालान्तरमाबाधेत। अथ कदानीमेव यज्ञवेश्मसंयज्ञविघातं कुर्यात्। ननु भयंमाभूदित्यनेनाभिप्रायेणतस्मा
द्वीति प्राप्तु वं नार्लिङ्गं तेन प्रभुणा कारयत इति यदस्ति तदत्रोक्तम्। यथा लोके गीर्णमुदरस्थं पुनर्भोगयोग्यं न भवति तथा
तद्धतस्मिन्या गेतज्ञीतिमात्र प्रयुक्तमार्लिङ्गं पराडे· वृति कष्टमेव तत्तादृशो प्रयोगकौशलरहितेन प्रभुणा कृतमार्लिङ्ग
यजमानेन पालयति। वांतं दृश्यपि ला निषेधति। अथ यहेतद्देवृवांतं यदभिशस्यमानमार्लिङ्गं कारयते यथा हवा इदं वांतं
मनुष्याबीभत्संतएवं तस्माद्वास्त्वहतसराडे· वयथा वांतं नहेवनद्यजमानं भुवंनक्तीति। कश्चित्पुरुषः प्रयोगकुशलो
पिकेन। चसा ति सापवादेन सर्वैर्निंद्यमानादभिशस्यमानं यजमानः स्वकीयवं धुत्वादिसान्निध्येन तापवादपरिहारार्थं आर्लिङ्ग
कारयत इति यदस्ति तदत्रोक्तम्। तत्रेदं निदर्शनमुच्यते। यथा लोके मनुष्यवांतं बीभत्संतं वा तं दृष्ट्वा कस्मैलमेतदिति नि
ष्ठीवनं कुर्युः एवं देवास्तस्मादभिशस्यमानकृताद्वा लिङ्गात्सर्वे बीभत्संते नतो यथा लोके वांतमिति निकृष्टं तथा तस्मि

७२

मज्ञेतदारिद्र्यमति निकृष्टं तच्च यजमानं सर्वथा न पालयति । वर्ज्ये तेनोक्तं त्रिविधमुपसंहरति स एतेषां त्रयाणां माशणेनेषा
दिति ॥ स यजमान एतेषां पूर्वोक्तानां धनलंपटभयहेतुभिर्श्च स्तानां त्रयाणामार्त्विज्यार्थमेनसपेक्षामपि न कुर्यात् । अ
घप्रमादकृतस्य प्रायश्चित्तं दर्शयति । तं यद्येतेषां त्रयाणामेकं चिदकामभ्याभवेत्तस्यास्ति वामदेव्यस्यर्त्तिरिति ॥ यदि
कदाचिदेतेषां धनलंपटादीनां त्रयाणां मध्ये वर्त्तमानं तं पुरुषं एकं चिदेकमपि अकाममबुद्धिपूर्वमभ्याभवेत् । अभि
लक्ष्यार्त्विज्यं भवेत् तदानीं तस्यैवैकस्य प्रायश्चित्तिरस्ति । कुर्वीत्रास्तोत्रमित्युच्यते वामदेव्यस्य स्तोत्रे वामदेवमह
र्षिणा दृष्टं साम वामदेव्यं ॥ कयानश्चित्र आभुवदित्यस्यामृच्युत्पन्नं च साम तच्च गायन्त उद्गातारः पृष्ठस्तोत्रमनु
तिष्ठन्ति तत्र कश्चित्त्र्ययोगविशेषः प्रायश्चित्तिः उक्तं साम प्रशंसति । इदं वा इदं वामदेव्यं यजमानलोकोऽमृतलोकः स्वर्गो
लोक इति । यजमानस्य लोकः पृथिवी अमृतलोको मुक्तिपदं स्वर्गो देवलोकः इदं वै उक्तलोकत्रयमिदं सर्वमपि इदं वा
मेतत्सर्वं कयानश्चित्र इत्यस्यामृच्युत्पन्नं इदं सामगानां प्रसिद्धं वामदेव्याख्यं साम । तस्मिन्नार्त्विके कर्त्तव्यं प्रायश्चित्तमेका
रं दर्शयति ॥ त्रिभिरक्षरैर्न्यूनं तस्य स्तोत्रमुपसंपन्नं धात्मानं विच्छिन्द्याद्यात्पुरुष इतीति ॥ तद्वामदेव्यं साम त्रिभिरक्षरैर्न्यू
नं । कयानश्चित्र इत्यस्या दिकस्तृचो गायत्रीछंदस्कः तस्य च छंदसस्त्रिषु पादेषु प्रत्येकमष्टावक्षराण्यपेक्षितानि । अभीषु

ब्रा०३
७३

एवंसेत्यस्यांतृतीयस्यामृचिप्रतिपादंसप्तैवाक्षराणिअतस्त्रिभिरक्षरैर्न्यूनत्वं।तस्यवामदेव्यस्यसाम्नःसंबंधिनिस्तोत्रेउपसृप्य
गानप्रकारमात्मानंस्ववाचकंपुरुषइतिशब्दंत्रेधाविगृह्णीयात्॥प्रस्तरंविभज्यैकैकस्मिन्पादेप्रक्षिपेत्॥तद्यथा॥अभीषु
णःसखीनामविताजरितॄणांशतंभवास्यूतिभिःपइतिप्रक्षिप्यगायेत्॥उक्तप्रकारांतरेणलिंमेवैकल्यपरिहारं
दर्शयति।सऐतेषुलोकेष्वात्मानंदधात्यस्मिन्मनुष्यलोकेस्मिन्नंतरिक्षलोकेस्मिन्स्वर्गेलोकेससर्वांदुरिष्टिमत्येतीति॥सकृज्ज
प्रायश्चित्तोयजमानएतेषुलोकेषुस्वात्मानंस्थापयतितएवत्रयोलोकाअस्मिन्नित्यादिनास्पष्टाक्रियंतोसयजमानःसर्वांदुरि
ष्टंदोषोपेतंयज्ञमत्येतिअतिक्रामति।एवंनैमित्तिकमक्षरस्यप्रयोगेऽपितंविधत्ते॥अपियदिसमृद्धाइवस्तुवीजःस्यारितिह
स्माहाथहैतज्जपेद्वेतीति।होत्रादयस्त्विजोप्यद्यपिसमृद्धास्ववर्धनलोपप्रमादिपूर्वोक्तवैकल्यरहिताएवस्युस्तथाप्येतत्तु
रुषइत्यक्षरत्रयंस्तोत्रेजपेदेवसत्तरेयोमुनिराहस्म॥ ॥इतिपूर्वदशाध्यायेद्वितीयःखंडः॥ ॥पूर्वत्रयज्ञोब्राह्मणेनछं
दोभिश्चयुग्मंस्वाहव्यंवहतीत्युक्तं।तत्रब्राह्मणयुक्तोवक्तव्यविशेषोभिहितः॥अथछंदःप्रयुक्तंविशेषमाह॥छंदांसि
वैदेवेभ्योहव्यमूढ्वाश्रांतानिजघनार्धेयज्ञस्यतिष्ठंतियथाश्वोवाश्वतरोवाहिवास्तिष्ठेदेवंतेभ्यएतंमैत्रावरुणंपशुंपुरो
डाशमनुदेवि।काहवीषि[illegible]वयेदिति।गायत्र्यादीनिछंदांसिदेवार्थंहव्यमानंवहंतःश्रांतत्वमंप्राप्ययज्ञस्यजघनार्धेपश्चि

७३

मभागेक चित्तु स्मीति। यथा लोके कश्चिदश्वो वा गर्द्दभाश्वसांकर्येण जातो श्वतरो वा ऊहिवान् भवे रह नं कृतवान् सन् इ
र्द्देशे वह मे न श्रांतस्तिष्ठेत् एवमेतानि छंदांस्यापे॥ तेभ्यः श्रांतेभ्यः श्रमपरिहारार्थं हवींषि निर्वपेत् देविकाशब्दिततत्सांहवि
विशेषाणां नाम॥ कस्मिन्काले निर्वाप इति तदुच्यते। यज्ञस्यावसाने यो यमनुवंध्याख्यः पशुर्वधस्तस्य पशोः सर्वधीमि
त्रावरुणदेवताकोपः पुरोडाशस्तमनु तस्मिन्ननुष्ठिते पश्चान्निर्वपेत्। तत्र प्रथममहविर्विधत्ते। धात्रे पुरोडाशं द्वा
दशकपालं यो धाता स वषट्कारस्वरूपः तेन पुरोडाशेन वषट्कारदेवतास्तेः श्रमोपयगच्छति द्वितीयं हविर्विधत्ते॥
॥ ।अनुमत्यै चरुं यानुमतिः सा गायत्रीति। कलाहीने सानुमतिः पूर्णा राका निशाकर इत्यभिधानाच्चतुर्दशीमिश्रा
पूर्णिमानुमतिपूर्वव्या॥ तदभिमानिन्या देवताया अपि तदेव नाम। तस्याश्चानुमतेर्गायत्रीरूपत्वात्तदीयः श्रमो
पगच्छति। तृतीयं हविर्विधत्ते। एकायै चरुं या राका सा त्रिष्टुबिति॥ पूर्ववद्व्याख्येयं। चतुर्थपंचमहविषी विधत्ते।
सिनीवाल्यै चरुं या सिनीवाली सा जगती कुह्वै चरुं या कुहूः सानुष्टुबिति॥ सा दृष्टेंदुः सिनीवाली सा नष्टेंदुः कलाकु
हूरिति समाम्नानाद्विविधमभिहितं तदभिमानिदेवतायास्तदेव नाम इति पूर्ववद्योजनीयं। इतरेषां छंदसां कथं श्रमप
रिहार इत्याशंक्य सर्वेषामन्येषां मुख्यछंदोनुवर्तित्वात् एतावतैव श्रमोपरिहार इत्यभिप्रेत्याह। एतानि वावै सर्वाणि छंदां॥

72

ब्रा·३
७४

ष्णिगायत्रंत्रैष्टुभंजागतमानुष्टुभमन्वन्यान्येतानिहियज्ञेप्रतमामिवक्रियंतइति ॥एतान्येवगायत्र्यादीनिचत्वारिसर्वछं
दोरूपाणि ।अन्यानित्युष्णिगादीनिगायत्र्यादिकमनुसृत्यैववर्त्तंतेयस्मादेतानिचत्वारियज्ञप्रयोगेप्रतमामिवप्राचु
र्येणातिशयेनैवक्रियंतेप्रयुज्यंते ।तस्मादेतदनुसारित्वमितरेषामुक्तं ।उक्तार्थवेदनपूर्वमनुष्ठानंप्रशंसति ।एतैर्हवा
अस्यछंदोभिर्यजतः सर्वैश्छंदोभिरिष्टंभवतियएवंवेदेति ।एतैर्गायत्र्यादिभिः सर्वैः उष्णिगादिभिः ।विहृत्सिध्वा
छंदांसिप्रशंसतितद्व्यदिदमाहुः सुधायांहवैवाजीसुहितोदधातीतिछंदांस्येवतत्सुधायांहवाएनंछंदांसिदध
तीति ॥वाजोन्नंहविर्लक्षणंतद्युक्तोज्योतिष्टोमोवाजीसचसुहितः सम्यगनुष्ठितः सुधायाममृतस्वर्गेदधातिप्र
जमानंस्थापयतीतिशेषः ।अनेनप्रकारेणतत्तस्मिन्नेवयज्ञप्रतिपादके[illegible]शास्त्रेयद्विवचनमभिज्ञाआहुः तत्तुछं
दांस्येवतद्वचनं ।यथोक्तगायत्र्यादिछंदांस्येवाभिलक्ष्योक्तंयस्मात्छंदांसि[illegible]नयजमानंसुधायांस्वर्गेस्थापयंतितस्मा
तछंदोभिप्रायेणतद्वचनमुक्तं ।वेदनंप्रशंसति ।अननुध्यायिनंलोकंजयतियएवंवेदेति ।मनसाअनुध्यातुमनर्हं
असंपूर्णवस्तुस्वापूतलोकंप्राप्नोति ।अत्रकेचिद्विस्पष्टंपक्षमुद्भावयंति ।तदुक्तंआहुर्होतारमेवसर्वासांपुरस्तात्पुर।
स्तादाज्येनपरियज्ञेतदास्तुसर्वासुमिथुनंदधातीतीति ।तद्व्यक्तस्मिन्नेवछंदसांभ्रमपरिहारार्थंह[illegible]षांपंचकेकेचित्

७४

वैपश्चित्ण एवमाहुः सर्वासामनुमत्यादीनां स्त्रीदेवतानां पुरस्तात्पुरुषदेवतारूपं धातारमेवाज्यद्रव्येण परितो यजेत् सर्व
संग्रहार्थं पुरस्तादिति वीप्सा । तत्तन सर्वत्र धातृविषयप्रयोगेण तासु सर्वासु स्त्रीदेवतासु मिथुनं संपादयति । तमिमं
पूर्वपक्षं दूषयति । तदु वा आहुः जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समाने ह्न्यजन्तीति । तदुवैतत्रैव
पूर्वोक्तविषये केचिदभिज्ञा एवमाहुः यत्र यस्मिन्प्रयोगे समानीभ्यामेकविधाभ्यामृग्भ्यां समाने ह्न्येकस्मिन्नेवाहनि
यजन्ति तदेतदनुष्ठानं यज्ञे जामिवं आलस्यमेव क्रियते संपाद्यते । प्रयुक्तयोः स्विष्टकृतोः पुनः प्रयोगस्य चर्वितचर्वणसदृ
शत्वात् धातृदेवताकपुरोडाशे धाता दधातु दाशुषे इति पुरोनुवाक्या धाता प्रजानामिति याज्या । तत्र यद्यपरित्तनामपि चतु
र्णां हविषां पुरस्तादाज्येन धातारं यजेत् । तदानीमिदमृग्द्वयं पुनरपि चतुर्वारमावर्त्तनीयं तथा सति नीरसो यज्ञः फलदा
तुं समर्थो न भवेदित्यर्थः । कथं तर्हि मिथुनसिद्धिः स्यादित्याशंक्य लौकिकदृष्टान्तेन तत्सिद्धिमुपपादयति ॥ यदि ह वा
अपि बह्व्य इव जायाः पतिर्वाव तासां मिथुनं न यदासां धातारं पुरस्ताद्यजति तदा सु सर्वासु मिथुनं दधातीति । यदि ह वा य
द्यपि लोके जाया बह्व्य इव बहुसंख्याका एव स्युस्तथापि पतिर्वाव पतिरेक एव सन् तासां मिथुनं संपादयति ॥ तथा सति यद्या
सामनुमत्यादीनां पुरस्ताद्धातारं सकृदेव यजति तदानीमासु सर्वास्वनुमत्यादिषु स एक एव धाता मिथुनं संपादयति ॥ व

॥ब्रा०३ ७५

क्ष्यमाणैर्हविर्भिः संकर्यसंकां वारयितुमर्थं विविच्य निगमयति । इति नु देविकानामिति । अनेनोक्तप्रकारेण देविकाभिधानां देवतानां हवींष्युक्तानीति शेषः ॥ ॥ इति पंचदशाध्याये तृतीयः खंडः ॥ ॥ हवींरंतराणि प्रतिजानीते ॥ अथ देवीनामिति ॥ अथ देवीनामकानां देवतानां हवींषि निर्वपेदिति शेषः । तत्र प्रथमं हविर्विधत्ते ॥ सूर्याय पुरोलाशमेककपालंयः सूर्यः स धाता स उ एव वषट्कार इति । एककपालं निर्वपेदिति शेषः । सूर्यस्य पूर्वोक्तं धातृस्वरूपत्वं तद्वारा वषट्काररूपत्वं चोपचर्यं तदीयः श्रमापनयाद्रूपस्य मः उत्तराणि चत्वारि हवींषि विधत्ते । दिवे चरुं या द्यौः सानुमतिः सा एव गायत्र्युषसे चरुं योषाः सा राका सो एव त्रिष्टुब्गवे चरुं या गौः सा सिनीवाली सो एव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः सो एवानुष्टुबिति ॥ प्रथमहविर्व्याख्येयं । एतेषां हविषां प्रशंसार्थं पूर्वोक्तमर्थवादं पुनरपि पठति । एता नि वाव सर्वाणि छंदांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येतानि हि यज्ञे प्रतमामिव क्रियंत एतैर्ह वा अस्य छंदोभिर्यजतः सर्वैश्छंदोभिरिष्टं भवति य एवं वेदं तद्वै यदिदमाहुः सुधायां हवै वाजी सुहितो दधातीति छंदांसि वै तत्सुधा या हवा एनं छंदांसि दधत्यननुध्यायिनं लोके जयति य एवं वेद तद्वै क आहुः सर्वमेव सर्वासां पुरस्तात्पुरस्तादाज्येन परियजेतदास्तु सर्वास्तु मिनं दधानीति तत् उ वा आहुर्जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समाने हन्यजे ।

७५

तीति यदिह वा अपि व अस्य जायाः पतिर्वावत्ता सा मिथुनं तद्यदा सांसर्ग्यं पुरस्ताद्यजति तदा सु सर्वासु मिथुनं दधातीति। धातार
मिसेतस्य स्थाने सूर्यमिसेत वा विचविशेषः। अन्यत्सर्वं पूर्ववत्। देविका नानाम्नां देवीनाम्नां चह विषांतुल्यं सामर्थ्यमभिप्रेस
विकल्पं दर्शयति। तापाइमा स्ता असर्या अमूस्ताइमा अन्यतराभिर्वावत्तं कामम् आप्नोति य एतास्मू भूयीष्ठु इति। तादेवीना
म्नाप्रसिद्धाइमाइदानीमुक्तः सूर्यायपुरोडाशमिसादयो याऽ संनिता अमूः प्राक्तनयथनोक्ताः धात्रे पुरोडाशमिसादयो
देविकाः। एवं देवीरुद्दिश्य पदे विकानादात्म्यमुक्तं अथ दे विकाउद्दिश्य देवीनां दात्म्यामुच्यते। या अमूः पूर्वत्रोक्ता दे विकाः स
तिताइमाः इदानीमुक्तो व्यः। एवमन्योन्यतादात्म्ये सति यः कामएतास उभयविधासु लभ्यते तं कामम् अन्यतराभिर्वा एकवि
धाभिरेव प्राप्नोति। तस्माद्विकल्पेन प्रयोगइत्यर्थः। अथ वैनमि ति कं मि समुच्चयं विधत्ते। ताउभयीर्गतश्रियः प्रजातिकामस्य
संनिर्वपेदिति। अनूचानादीनामधेयकं श्रिष्ठ तश्रीः। तथा चभ्र संतरश्र्यते त्रयोवैगतश्रियः शुश्रुवान् ग्रामणी राजन्य इति।
तादृशगतश्रीर्येदि प्रजातिप्रयोसादन सामर्थ्यं कामयते तदानीं तस्य नादे विका देवीश्चोभयीः संनिर्वपेत्। समुच्चिसनिर्वपेत
।धनकार्वपेत। उभयविधानं। समुच्चित्य निर्वापोनकार्यः। विपक्षे वाधकं दर्शयति। यदेनाएषिष्यमाणस्य सनिर्वपेदीश्वरोह
स्या वित्ते देवा अरत्तोर्य ह्याऽयमात्मने। लमम् स्तेनीति। वित्तमेव विषष्यमाणस्य यदा ताउभयीः समुच्चित्य निर्वपेत्तदानीमस्यध

२५

ब्रा०३ काम

७६

नस्य वित्तेदेवाः सर्वेपि अरत्तोरीश्वरः अरत्तु मत्क्री । डितुं समर्थ भवं निएतदपेक्षितं वित्तं ह्विपतीत्यर्थः ॥ तत्र हेतुरुच्यते ॥ यद्वै
यस्मादेव कारणादयं धनार्थी आत्मने स्वार्थमेव अलमभंस्त संपूर्णं वित्तमनसाध्यातवान् ॥ धनलोभेन यामादिषु प्रवृत्त
त्वादेतदपेक्षितं धनं देवा नाह्रूपायुज्यते । धनकामस्य समुच्चयं निषिध्य प्रज्ञाकामस्य पूर्वत्र विहितं समुच्चयमर्थवा
देन प्रशंसति । नाहस्तु चित्वृक्षो गोपालायनो वृद्धद्युम्नस्याभिप्रतारिणस्याभयीयं ज्ञंसं निरुवाय तस्य हरथ्यगत्सगाग
मानंदह्वो वाचेत्यमहमस्य राज्ञस्येन्ददेविकाश्च देवीश्चाभयीयं ज्ञस्समादयदस्यैत्यरथ्यगत्सोगाहतइति चतुष्पलला
वृक्षोयस्य महर्षेराश्रमे सोयं स्मुचित्वृक्ष नामकः सम्यकृत्नणोदकप्रदानेन गोशुश्रूषां करोतीति गोपाल नामाकश्चिदृषिः
तस्यापत्यं गोपालायनः पूर्वोक्त नामकः स्मुचित्वृक्षः वृद्धप्रभूतं द्युम्नं धनं यस्य राज्ञः सोयं वृद्धद्युम्नः अभित्तु शत्रून्प्रकर्षे
णनरतितिनिरकरोतीत्यभिप्रतारी कश्चिद्राजा तस्य पुत्रोभिप्रतारिणः पूर्वोक्तो वृद्धद्युम्नः तस्य राज्ञो यज्ञे देविका देवीश्च
भयीरिंस मनेन नण्वास्वोक्तप्रकारेण सम्यमादयं समुच्चित्य समादितवानस्मिस समुच्चयानुष्ठानेन वत्तद्वत्ताहर्षिं नवानस्मितस्य
सादादयरथ्यगत्सो नाज्ञपुत्रः को डार्थं जलेगाहत इति । मकेवलेस्मु चित्वृक्षेण दृष्टो रथ्यगत्स एव केः किंतु चतुःषष्टिसंख्या
काः शाश्वलवत्तिनः सर्वदा पुत्रार्थं मुपत्ताः स्मृग अस्य वृद्धद्युम्नस्य राज्ञस्तेन तथा वयस्का एव पुत्राः पौत्राश्चास्तु ॥ ॥ इतिप

७६

चद्दशाध्याये चतुर्थः खंडः ॥ ॥ ज्योतिष्टोमस्तावत्सप्तसंस्थः समाप्तिभेदात्सप्तविधः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी
वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्तसंस्था इत्याश्वलायनेनाभिहितत्वात् । तत्राग्निष्टोमसाम्नां यज्ञायज्ञीयाख्येन यत्र
समाप्तिः सोऽयं प्रथमरूपोऽग्निष्टोमः । स सर्वोऽपि पूर्वत्रोक्तः । अथोक्थ्यसंस्थारूपो ज्योतिष्टोमो वक्तव्यः । तदर्थमाख्यायिका
माह ॥ अग्निष्टोमं वै देवा अश्रयंतोक्थान्यसुरास्ते समावद्वीर्या एवासंन व्यावर्तंत तान्भरद्वाज ऋषीणामपश्यदिमे वा
असुरा उक्थेषु श्रितास्तान्नैषां कश्चन पश्यतीति सोऽग्निमुदह्वयदिति । यदा देवा अग्निष्टोममाश्रितसमाश्रितवंतः
तदानीमसुरा अप्युक्थानकानि स्तोत्राणि शस्त्राणि चाश्रित्यावस्थिताः । ततस्ते देवाश्चासुराश्च यज्ञे तुल्यवीर्या एवा
सन् न तु देवाः शौर्याधिक्येन व्यावृत्तिं प्राप्ताः । तदानीमृषीणां मध्ये सूक्ष्मदर्शी भरद्वाजस्तानसुरान् रहस्युक्थपरानपश्य
त् दृष्ट्वा चैवमुवाच इमे रहस्यवस्थिता असुरा उक्थेषु स्तोत्रशस्त्ररूपेष्वाश्रिताः । तानसुरानेषां देवानामृषीणां च मध्ये न कोऽपि
पश्यतीति । तथोक्त्वा स भरद्वाजोऽसुरनिराकरणार्थं केनचिन्मंत्रेणाग्निमुदह्वयत् उच्चध्वनिनाह्वानं कृतवान् । तमिमं
मंत्रं दर्शयति । एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिर इति । हे अग्ने एहि आगच्छ तत्र वस्तु ब्रवाणि शोभनं कार्यं कथयामि
। इतराद्देवाकार्यव्यतिरिक्ता गिरोऽसुरवाचः इत्थ इत्थमनेन प्रकारेणास्तु संतरादिति शेषः अस्मिन्मंत्र इतरशब्दार्थं दर्श

यति। असुर्यो ह्वा इतरा गिर इति। असुरेभ्यो हिता असुर्याः ताभ्यः गिरः देववाक्यात् इतरा देवविरोधिन्य इत्यर्थः। तथा-
ग्निर्वाक्यं दर्शयति॥ सोऽग्निरुपोनिष्ठन्नब्रवीत् किं स्विदेव यं कृशो दीर्घः पलितो वदिष्यतीति। भरद्वाजेनाहूतोऽग्निस्तस्
मीपं प्रसागन्तुमुनिष्ठन्नेवमब्रवीत्। महत्त्वमयं ऋषिः किं स्विदेव किं नाम वदिष्यतीति। कृशो दीर्घः पलित इत्येषि वि
शेषणानि। तानि च स्पष्टीकरोति। भरद्वाजो ह वै कृशो दीर्घः पलित आसेति। स्पष्टार्थः। किं स्वित्सलिलो वदिष्यतीत्यग्नि
ना पृष्टः स भरद्वाजस्तोत्तरं दर्शयति। सोऽब्रवीदिमे वा असुरा उच्छ्रुष्मितास्तन्वन्न कश्चन पश्यतीति॥ स भरद्वाजोऽग्निम्
सेवमब्रवीत् इमे वा इत्यादिष्टवेवव्याख्येयं। अथोक्थ्यस्तोत्रस्य साधनभूतं साकमश्वनामकं साम पदस्तितदाय्यं नाम
निर्वक्ति। तानग्निरश्वो भूत्वाभ्यसद्रवत्तत्साकमश्वं सामाभवत्तत्साकमश्वस्य साकमश्वत्वमिति। सोऽग्निर्भरद्वाजस्योत्त
रं श्रुत्वा तं नत्वा ऊर्ध्वस्वयमश्वाकारो भूत्वा तानसुरानभिलक्ष्य ऐत्यभ्यसद्रवत् अभितिरायनागच्छत् असुराणामुपरि वेगवत्त
मात्मरूपमश्वप्रवर्त्तो सुरान्मारितवानित्यर्थः। तस्मात्स्वयमश्वाकारो भूत्वानेरसुरैः साकं युद्धं कृत्वा जितवानतस्मादे
तद्व्रतं तस्य च नायत्र तत्प्रायामिह लघु प्रवाणितं इत्यादि क्रियास्ववस्थितस्य साम्नः साकमश्वमिति नाम संपन्नं। तस्य सा
म्न उक्थ्यस्तोत्रनिष्पादकत्वं विधत्ते। तदाहुः साकमश्वेनोक्थ्यानि प्रणयेदप्रणीतानि वाव तान्युक्थ्यानि यानि अन्यत्र सा

७७

कमश्वादितीति ॥ तत्त्र साकमश्वविषये प्रयोगाभिज्ञा आहुः साकमश्वनामकेन साम्ना स्तोत्राण्युक्थनामकानि प्र
णयेत् साकमश्वादन्यत्र सामांतरेण यान्युक्थानि स्तोत्राणि प्रणीयंते तान्यप्रणीतानि भवंति तस्मादिदमेव सामोक्थ
स्तोत्रनिष्पादकं । पक्षांतरं विधत्ते ॥ प्रमंहिष्ठीयेन प्रणयेदित्याहुः प्रमंहिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदंतेति
॥ प्रमंहिष्ठाय गायत इत्यस्यामृच्युत्पन्नं साम प्रमंहिष्ठीयं तेन साम्नोक्थस्तोत्राणि निष्पादयेत् । उक्थेषु प्रविष्टांस्तान
सुरान्देवा एतेन साम्ना उक्थेभ्यो निराकृतवंतः । उभयोः साम्नोरैच्छिकं विकल्पं दर्शयति ॥ तस्माद्वा प्रमंहिष्ठीये
न न यस्य साकमश्वेनेति ॥ अहस्यं शब्दोऽत्र निषेधार्थस्त्र विकल्पार्थे निपातानामनेकार्थत्वात् । नान्युक्थस्तो
त्राणि प्रमंहिष्ठीयेन साम्ना प्रणयेत् ॥ अथवा साकमश्वेन साम्ना प्रणयेत् ॥ ॥ इति पंचदशाध्याये पंचमः
खंडः ॥ ॥ उक्थस्तोत्रेषु सामविशेषं विधायोक्थशस्त्रेषु सूक्तं विधातुमादौ मैत्रावरुणशस्त्रे किंचित्सूक्तं विधत्ते
॥ ते वा असुरा मैत्रावरुणस्योक्थमश्रयंत सोऽब्रवीदिंद्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इति अहं चेत्यब्रवीद्वरुणस्तस्मा
दैंद्रावरुणं मैत्रावरुणस्तृतीयसवने शंसतीन्द्रश्च ह्येतान्वरुणश्चैतो नुदेतामिति ॥ उक्थस्य क्रतोरग्निष्टोमविकृ
तित्वादतिदिष्टमग्निष्टोमप्रयोगमनुष्ठाय ततऊर्ध्वमुक्थपर्यायास्त्रयोऽनुष्ठेयाः तथा चापस्तंब आह । उक्थ्यश्चेदग्नि

श्रो ममवसाया थ त्रिभ्यश्चमसगणेभ्यो राज्ञा नमतिचयती ति ॥ तत्र प्रथमे चमसगणे मैत्रावरुणस्य यच्छस्त्रमस्ति तस्य
स्तोत्रेषु सामान्यानि राकृतान्यस्त एवासुरा इदं मैत्रावरुणशस्त्रमभ्याश्रयंत तदानीं तत्रावस्थितः स इंद्र इतरदेवानुप्रत्येवमब्रवी
त् । असुराणामपनोदनमस्मत्समीहायो ऽपेक्षितः तत्रोह देवा युष्माकं मध्ये कश्चाहं चेमानसुरानितो मैत्रावरुणशस्त्रा
न्नोत्स्यावहे अपनोदं करिष्याव इति देवेषु व्यवस्थितो वरुणो ऽहं चेत्यब्रवीत् हे इंद्र त्वं चाहं चेत्यर्थः । यस्माद्वंतस्मादुभ
योर्मेलनेन तेषामसुराणामपनोदार्थमैंद्रावरुणं पुरुक्तं तृतीयसवने मैत्रावरुणनामकस्तूलिकः शंसति । इंद्रावरुणा
युवमध्वराय न इत्येतदृशर्चं सूक्तं मैत्रावरुणांतेन तुष्टइंद्रश्च वरुणश्च तानसुरांस्ततः शस्त्रादप्यनुदेतां । निराकुर्यातां ।
द्वितीये चमसगणे किंचित्सूक्तं द्वयं विधत्ते । तेवन ततो पहता असुरा ब्राह्मणाछंसिनस्तस्य मभ्याश्रयंत सो ऽब्रवीदिंद्रः कश्चाहं चेमा
नितोसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्बृहस्पतिस्तस्मादैंद्राबार्हस्पत्यं ब्राह्मणाछंसी तृतीयसवने शंसतींद्रश्च हितो
न्नु बृहस्पतिश्च ततोनुदेतामिति । ततो मैत्रावरुणशस्त्रान्निराकृता असुरा ब्राह्मणाछंसिनः शस्त्रमाश्रितवंतः उदप्रु
तोनवयो रस्समाणा इत्येव बृहस्पतिदेवताकं षादशर्च्चं सूक्तं । अछामइंद्रं मतयः स्वर्विद इत्येकादशर्च्चं मैंद्रं सूक्तं तदुभयं मि
लितं सदैंद्राबार्हस्पत्यं संपद्यते तत्तदेतद्ब्राह्मणाछंदसी ब्रूयात् अन्यसूक्तवद्धारम्यं । तृतीयचमसगणे सूक्तं विधत्ते ॥ ते

७८

वैतत्तोयहत्ता असुरा श्रच्छावाकस्यो क्ष्मसञ्जयंतसोब्रवीदिंद्रः कश्चाहंचेमाविंतोस्मन्नो स्यावहाऽसहंचेसब्रवीद्विष्णु
स्तस्मादैंद्रावैष्णवमच्छावाकस्तृतीयसवनेशंसतीदंश्चहिता न्विष्णुश्चततानुदेत्ता मिति। संबांकर्मणासमिषेसष्ट
च्चमैंद्रावैष्णवंसूक्तं। अन्यत्स्वंव्याख्येयं। सूक्तानां द्विदेवताकत्वंप्रशंसति॥ द्वंद्वमिंद्रेणदेवताः सस्यंतेद्वंद्वंवैमिथु
नंतस्मात्। द्वंद्वान्मिथुनंप्रजायतेप्रजात्या इति। इंद्रेण सहद्वंद्वंयुग्मंभूत्वावरुणबृहस्पतिविष्णुदेवताः क्रमेणशं
स्यंतेद्वंद्वं चलोके स्त्रीपुरुषरूपंमिथुनंतादृशान्मिथुनाद्ध्यसरूपंमिथुनंप्रजायतेतत्तोद्वंद्वसंसनंयजमानस्यप्रजा
त्यैभवति। वेदनंप्रशंसति। प्रजायतेप्रजयापशुभिर्यएवंवेदेति। शास्त्रेणांत्रयाणांहोत्रकाणांसूक्तानिविधायपोतुर्ने
ष्टुश्चमंत्रांतराणिविधत्ते अथयहेतपोत्रीयाश्चनेष्ट्रीयाश्चचत्वारस्तुयाज्याः षलृचः साविराड्दशिनी तद्विराज्येयज्ञं
दृशिन्यांप्रतिष्ठापयंतिष्ठपयतीति। अथयथपंचमेसूक्तेहोतायक्षदिसादिकौद्वितीयाष्टमौ मंत्रौपोतुर्ऋतुयाजौ तथा
तत्रैवतृतीयनवमौमंत्रौ नेष्टुर्ऋतुयाज्ञौऽसेयंचत्वारऋतुयाज्ञाः तेमिलित्वापात्रशंवंधान्नेष्ट्रसंबंधाश्चपोत्रीयानेष्ट्री
याश्चभवंति तथाप्रस्थितयाज्याः पोतुस्त्रिस्त्रऋचः नेष्टुश्चतिस्रऋचः इत्येवंषलृचोभवंति तदेतन्मंत्रदशकंप्रशंस
ति। साविराडित्यादिना। साप्रूर्वोक्ता मंत्रसमष्टिः दशिनी दशसंख्यायुक्ता सती विराट्छंदः संपद्यते दशाक्षरा विराडि

ब्रा॰ ३
७१

त्तिष्कसंतरात्र। नत्ते नदृश संप्रयोगेणादक्षिनांदृशसंख्योपेतायां विराजियज्ञस्त्विज्ञाः प्रतिष्ठापयंति॥ ॥अस्मासो ऽध्यायसमस्तसर्थः॥ ॥पंचदशाध्यायेषष्ठःखंडः॥ ॥इतिमाधवीयेवेदार्थप्रकाशेऐत्तरेयब्राह्मणेपंदशोध्यायः॥ ॥

[OrderDescription]
,CREATED=14.09.20 10:39
,TRANSFERRED=2020/09/14 at 10:53:57
,PAGES=157
,TYPE=STD
,NAME=S0003602
,Book Name=M-1051-ETREY BRAHAMAN\
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF

FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF

FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF

FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,